



आज़ादी का अमृत महोत्सव

# संस्कृतभाषा पाठ्यपुस्तकम्

## वेदविभूषणद्वितीयवर्षम् / उत्तरमध्यमा द्वितीयवर्षम् / कक्षा द्वादशी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥
वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमकल्मषम् ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम् ।
अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
न कर्म लिप्यते नरे ।
मा गृधः कस्यस्विद्धनम् ।
कृषिमित्कृषस्व ।
विद्ययाऽमृतमश्नुते ।
माता भूमिः पुत्रोऽहं पृथिव्याः ।











| | | | |
|---|---|---|---|
| 1. | ब्रह्म पुराण | 10. | ब्रह्मवैवर्त पुराण |
| 2. | पद्म पुराण | 11. | लिङ्ग पुराण |
| 3. | विष्णु पुराण | 12. | वाराह पुराण |
| 4. | वायु पुराण | 13. | स्कन्द पुराण |
| 5. | भागवत पुराण | 14. | वामन पुराण |
| 6. | नारद पुराण | 15. | कूर्म पुराण |
| 7. | मार्कण्डेय पुराण | 16. | मत्स्य पुराण |
| 8. | अग्नि पुराण | 17. | गरुड पुराण |
| 9. | भविष्य पुराण | 18. | ब्रह्माण्ड पुराण |








महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

# संस्कृतभाषा

## पाठ्यपुस्तकम्

वेदविभूषणद्वितीयवर्षम् / उत्तरमध्यमा द्वितीयवर्षम् / कक्षा द्वादशी

## महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

**महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)**

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

मार्गदर्शकः : प्रतिष्ठानस्य माननीयः सचिवः प्रो. विरूपाक्षः वि. जड्डीपालो महाभागः
विशेषज्ञाः : ..............
लेखकगणः : श्री शेषराज रेग्मी, श्री यतिराज सापकोटा, श्री सुकान्त प्रामाणिक
आवरणं सज्जा च : ..........
चित्राङ्कनम् : ...........
यान्त्रिकसहयोगः : ..........
अक्षरविन्यासः : .........

© महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी

मूल्यम् : ......
संस्करणम् : .........
प्रकाशिताः प्रतिकृतयः : ...........
पत्रस्य उपयोगः : ८० जी.एस.एम. पत्रे मुद्रितम्
प्रकाशकः : महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्
(भारतसर्वकार- शिक्षामन्त्रालस्य स्वायत्तशासि संस्थानम्)
email : msrvvpujn@gmail.com,
Web : msrvvp.ac.in
दूरभाषा (०७३४) २५१००७८

# प्रस्तावना

## (2020 राष्ट्रियशिक्षानीतेः आलोके)

राष्ट्रियवेदविद्याप्रतिष्ठानस्य स्थापनां भारतसर्वकार-शिक्षामन्त्रालयः (उच्चतरशिक्षाविभागः) माननीयस्य शिक्षामन्त्रिणः (तदानीन्तन-मानवसंसाधन-विकासमन्त्रिणः) अध्यक्षतायां नवदेहल्यां 1987 वर्षे जनवरीमासस्य 20 दिनाङ्के 1860 सोसायटीपञ्जीकरणाधिनियमान्तर्गततया अकरोत्। भारतसर्वकारः वेदानां श्रुतिपरम्परायाः संरक्षणाय, संवर्धनाय, विकासाय, प्रचाराय, प्रसाराय च प्रतिष्ठानस्य स्थापनायाः संकल्पनां 6-3/85-SKT-IV पत्र-संख्यया 30-03-1987 दिनाङ्के भारत-राजपत्रेऽधिसूचनया प्राकाशयत्। संस्थापना-स्मरणपत्रे सस्वरवेदाध्ययनस्य, श्रुतिपरम्परायाः च संरक्षणाय, वैज्ञानिकरीत्या वेदार्थानां व्याख्यानाय च दायित्वं वेदविद्याप्रतिष्ठानाय प्रदत्तम् आसीत्। 1993 तमे वर्षे मई-मासे राष्ट्रियवेदविद्याप्रतिष्ठानस्य उज्जयिन्यां स्थानान्तरणानन्तरं प्रतिष्ठानस्य नाम महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् इति परिवर्तितम् अभूत्। सम्प्रति प्रतिष्ठानमिदं मध्यप्रदेशसर्वकारेण प्रदत्तायां 23.6 एकड-भूमौ महाकालमन्दिरात् 6 किलोमीटरदूरे उज्जयिनी-नगर्याम् प्रतिष्ठितम् अस्ति।

1986 राष्ट्रियशिक्षानीतौ, 1992 संशोधितशिक्षानीतौ, 1992 कार्यप्रणाल्यां- (प्रोग्राम ऑफ एक्शन) च वैदिकशिक्षायाः संवर्धनार्थं राष्ट्रियवेदविद्याप्रतिष्ठानाय अखिलभारतस्तरीयम् उत्तरदायित्वं प्रदत्तम् अस्ति। भारतस्य प्राचीनज्ञानभाण्डागारस्य, ज्ञानविज्ञानकोषस्य, मौखिकपरम्पराणां शिक्षाप्रदानाय च गुरुशिष्य-परम्परानुरूपं पारम्परिकगुरूणां नियोजनोद्देश्यं 1992 शिक्षानीतेः कार्यप्रणाल्यां (प्रोग्राम ऑफ एक्शन) उल्लिखितमासीत्।

राष्ट्रस्य आकाङ्क्षानुरूपं, राष्ट्रियस्तरे वेदस्य संस्कृतस्य च शिक्षणार्थं, मानकीकृतपरीक्षार्थं च बोर्ड-इत्यस्य स्थापनायाः पक्षे राष्ट्रियसहमतेः, जनादेशस्य, शिक्षणनीतेः, विशिष्टोद्देश्यानां कार्यान्वयन-व्यूहस्य चानुरूपं भारतसर्वकारस्य शिक्षामन्त्रिणाम् अध्यक्षतायां महासभायाः शासिपरिषदश्च समावेशे "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृत-शिक्षाबोर्ड्" इत्यस्य स्थापना 2019

तमे वर्षे अभवत्। प्रतिष्ठानस्य नियमावल्यनुरूपं वेदसंस्कृतशिक्षाबोर्ड् अपि वैवेदशिक्षाया एकः भागः, तथा प्रतिष्ठानस्योद्देश्यानां पूर्तये नियमेषु संकल्पना च कृता वर्तते। "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृतशिक्षाबोर्ड्" इत्यस्य कृते भारतसर्वकारात् भारतीयविश्वविद्यलयसंघात्, केन्द्रीयमाध्यमिकशिक्षाबोर्ड् इत्यस्मात्, राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषदः च मान्यता प्राप्ता वर्तते।

भारतसर्वकारस्य शिक्षामन्त्रालयेन 2015 तमे वर्षे श्री एन्. गोपालस्वामी, ऐ.ए.एस् (प्रधान-निर्वाचनायुक्तचरः)-महोदयस्य आध्यक्ष्ये संरचितया समित्या "संस्कृतस्य विकासाय दूरदृष्टिः पथप्रदर्शनं च-दशवर्षाणां परिप्रेक्षायां योजना" इत्यनया अनुशंसितं यत् उच्चतरमाध्यमिकस्तरपर्यन्तं वेदसंस्कृतविषयकशिक्षणस्य पाठ्यक्रमाणां मानकीकरणाय, संवर्द्धनाय, परीक्षामान्यतायै, प्रमाणीकरणाय "वेद-संस्कृतशिक्षाबोर्ड्" इत्यस्य झटिति स्थापना आवश्य करणीया। प्राथमिकस्तरे वेदस्य संस्कृतस्य चाध्ययनम् अभिप्रेरकं, सम्प्रेरकम्, आनन्ददायकं च भवेत् । आधुनिकशिक्षाबोर्ड-व्यवस्थायां पाठ्यमानानाम् आधुनिक-विषयणाम् अपि वेद-संस्कृतपाठशालासु सम्यक् मिलित्वा अध्यापनम् आवश्यकम्। साम्प्रतिकसमाजस्य आवश्यकतानां संपूर्तये, प्राचीनज्ञानस्य सम्यक् उपयोगं कृत्वा वेद-संस्कृतपाठशालानां पाठ्यक्रमसामग्र्यः आधुनिकसमस्यानां निवारणोपायान्वेषणाय विकसिताः स्युः इति च समितेः अनुशंसा आसीत् ।

संस्कृतस्य आधुनिकविषयाणां च सुमेलनेन स्तरानुगुणं पाठ्यसामग्र्याः विकासपुरस्सरं सस्वरवेदपाठे कौशलसंवर्धनस्य, वेदकण्ठस्थीकरणे, वेदमन्त्रोच्चारणे च अखिलभारतस्तरे मानकीकरणस्यावश्यकता वर्तते । यतो हि वेदच्छात्रा अन्ततोगत्वा वेदभाष्याणाम् अध्ययने, वेदार्थचिन्तने समर्था भवेयुः। वेद-संस्कृत-छात्राणां वृत्तिप्राप्ति-लक्ष्यं मनसि निधाय मुख्यधारायाम् अपि भावि अध्ययनं सुशकं भवेत्। समुचितस्तरे वेदविकृतिपाठानामध्ययने ध्यानं दात्तव्यम् इति च वेदपाठशालानां सम्बन्धे समितिः संस्तुतवती। वेदानां सस्वरपाठः आभारतं सर्वत्र राज्येषु समानरूपेण नास्ति इति हेतोः समितेः सदस्यैः चिन्ता प्रकाशिता। अतः वेदानां

सस्वरपाठस्य शैल्यादीनां, शिक्षणपद्धतेश्च क्षेत्रीयविविधतानामुपरि हस्तक्षेपम् अकृत्वा विद्यमानायाः स्थितेः समाधानाय, समीकरणाय शीघ्रं समुचितव्यवस्था प्रतिष्ठानेन करणीया इति च वेदपाठशालानां सम्बन्धे समितिः संस्तुतवती ।

वेदः संस्कृतं चेति द्वयम् अविभक्तम्, एकम् अपरस्य उपोद्बलकं च वर्तते। परं तु आभारतं समेषां वेदपाठशालानां संस्कृतपाठशालानां च परीक्षा-मान्यतायाः, सम्बद्धतायाः च समस्या चिरकालात् सम्मुखं वर्तते, एतदर्थं वेद-संस्कृतयोः परीक्षादिविषये सहैव राष्ट्रस्तरे वेदसंस्कृतबोर्ड् इत्यस्य स्थापना भवेत्। समितिः एतदपि संस्तुतवती यत् बोर्ड-माध्यमेन आयोजयिष्यमाणा परीक्षा विधिसम्मता सर्वकारेण मानिता च भवेत्, शिक्षाया आधुनिकबोर्ड् प्रणाल्या तुल्या च भवेत्। समित्या एवमपि अनुशंसा कृता यत् "महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्" "महर्षिसान्दीपनि-राष्ट्रियवेदसंस्कृतविद्यापरिषद्" इति परीक्षा बोर्ड् संज्ञया उद्घोषितं मानितं च भवेत्, एतस्य मुख्यालयः उज्जयिनी भवेत्। परीक्षाबोर्ड् कार्याणि अतिरिच्य अद्यावधि प्रचलितानां वेदप्रसार-प्रचार-संवर्धन-कार्यक्रमाणाम् अन्येषां वेदाध्ययन-संवर्धन-गतिविधीनाञ्च सञ्चालनं प्रतिष्ठानस्य पक्षतः एव यथापूर्वं भवेत् इति समितिः संस्तुतवती ।

वेदशिक्षायाः संचालनं, संवर्धनं, प्रचारः च भारतस्य गौरवशालिज्ञानपरम्पराया एकं सुविस्तृतं व्यापकं च अध्ययनमस्ति । वेदाध्ययने (संहिताः, विकृतिपाठाः, स्वराणां सम्यक् प्रयोगः ज्ञानादयश्च) सस्वरपाठकौशलम्, मन्त्रोच्चारणम्, संस्कृतज्ञानप्रणाल्याः बहुस्तरीया श्रुतिपरम्परा सम्मिलिता भवति। 2020 राष्ट्रियशिक्षानीतेः (NEP-2020) अनुरूपं पुनर्व्यवस्थापितायां 3 + 4 सप्तवर्षीयायां प्रतिष्ठानस्य पाठ्यक्रमयोजनायां वेदाध्ययननिरतान् पारम्परिकच्छात्रान् मुख्यधारायाम् आनेतुं नीतेः दृष्टौ आधुनिकविषयाः यथा-संस्कृतम्, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः इत्यादयः विषयाः नीतिनिर्धारकनिकायेषु वैदिकशिक्षाया उपरि राष्ट्रियसम्मत्यनुरूपम् उपलब्धसमयाधारेण पाठ्यक्रमानुरूपम् अध्येयाः विषयाः समावेशिताः। रा.शि.नी. 2020 इत्यस्य अनुसरणाय प्रतिष्ठानेन प्रवर्तिता अध्ययनस्येयं विशिष्टा

पाठ्यक्रमयोजना भारतीयज्ञानप्रणाल्याः पाठ्यक्रमसामग्रीषु आधुनिकज्ञानविज्ञानैः च सह भारतीयचिन्तनधारायाः, वैदिकज्ञानस्त्रोतसः च उपयुक्तज्ञानसामग्रीणां समायोजनं वर्तते।

प्रतिष्ठानस्य बोर्ड्-सम्बद्धानां पाठशालानां, गुरुशिष्य-इकाई-इत्यादीनां, गुरुकुलानां च पाठ्यक्रमस्य आधारभूतः मुख्यः विषयः भवति सम्पूर्णवेदशाखाया कण्ठस्थीकरणेन सह सस्वराध्ययनम्। तेन सह नियमानुरूपं संस्कृतभाषा व्याकरणं च, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, समाजोपयोगि-उत्पादकविषयाः (SUPW) इत्यादयः पञ्चान्यूनं यथाचयनं विषया भवन्ति।

इतिहासविद्भिः विदितो विषयो वर्तते यत् महर्षेः पतञ्जलेः काले ऋग्वेदस्य 21 शाखाः, यजुर्वेदस्य 101 शाखाः, सामवेदस्य 1000 शाखाः, अथर्ववेदस्य च 9 शाखाः चेति वेदानां 1131 शाखा आसन्। याते काले बह्वीनां वेदशाखानाम् अध्येतृपरम्परायाः लोपात् बह्व्यः शाखाः कालकवलिता अभूवन्, सम्प्रति केवलं 10 शाखाः अवशिष्यन्ते, तेषु ऋग्वेदस्य एका, यजुर्वेदस्य चतस्रः, सामवेदस्य तिस्रः, अथर्ववेदस्य च द्वे शाखे सस्वरपाठपरम्परायां समुपलभ्यन्ते। एतासामुपरि एव भारतीयज्ञानप्रणाली आश्रिता वर्तते। एतासां 10 शाखानां कण्ठस्थीकरणेन सस्वर-पाठेषु प्रवीणाः पण्डिताः ये वेदपाठपरम्परां वेदज्ञानपरम्पराञ्च पूर्णरूपेण प्राचीनपद्धत्या च संरक्षितवन्तः ते विरला एव तथा अध्येतारोऽपि न्यूनमात्रया एव सन्ति । यावत् श्रुतिपरम्परानुसारेण कण्ठस्थीकरणपूर्वकं वेदशिक्षाम् आश्रित्य मूलरूपेण चिन्तनं न क्रियते, दृष्टिः न दीयते तावत् वेदशिक्षाव्यवस्था सुदृढा न भवति। सामान्यविद्यालयीयाध्ययने वेदस्य सस्वरपरम्पराया अध्येयविषयत्वेन अध्यापनं न भवति, न तु विद्यालयीयपाठ्यक्रमे वेदपाठ्यक्रमसमायोजनाय सञ्चालनाय वा विशेषज्ञता सामान्यबोर्ड्-मध्ये वर्तते। केवलं मुद्रितवेदपुस्तकवाचनं पारम्परिकं वेदाध्ययनं नैव भवति। अत एव एषा स्थितिः वर्तते।

वेदछात्राः ये श्रुतिपरम्परया सस्वरं वेदं गुरुमुखात् परम्परया अधियन्ति, ते सुदूरे ग्रामेषु नगरेषु वा स्थितेषु वेदगुरुकुलेषु, आश्रमेषु, पाठशालासु वा निवसन्ति, पठन्ति च। वेदाध्ययनाय वेदविद्यार्थिनः प्रतिवर्षम् अन्यूनं 1900-2100 होराः उपयुञ्जते। ते आधुनिक-

विद्यालयीयशिक्षणप्रणालेः समयात् द्विगुणितं समयं वेदाध्ययनाय उपयुञ्जते। वैदिकछात्राः गुरोः सम्मुखम् उपविश्य शब्दशः वेदोच्चारणशिक्षणं प्रभुवन्ति, वेदस्य एकैकं शाखायां स्वाध्यायविधया सस्वरम् उच्चारणेन सह कण्ठस्थीकरणमपि अवश्यं कुर्वन्ति। आधुनिकान् च विषयान् यथासामर्थ्यम् अधियन्ति।

अत्रेदं ज्ञातव्यं भवति यत् वेदाध्ययनस्य, वेदमन्त्राणां पाठविधेः, गुरुशिष्ययोर्मध्ये प्रचलितायाः अनूचानायाः वेदानां श्रुति-परम्परायाः, पाठपरम्परायाः एव कारणात् वेदानां श्रुतिप्रचालितं मौखिकप्रसारणं मानवताया अमूर्तसांस्कृतिकनिधिरूपेण विश्वसंस्थायाः यूनेस्को (UNESCO) इत्यस्य मौखिकसांस्कृतिकनिधेः सूच्यां मानितं विद्यते। अतः वैदिकशिक्षायाः प्राचीनताम् अखण्डतां च चिरकालं स्थापयितुं योग्या फलप्रदात्री कार्यनीतिः आवश्यकी वर्तते। अतः प्रतिष्ठानं, प्रतिष्ठानस्य बोर्ड् च 2020 राष्ट्रियशिक्षानीतौ निर्दिष्टैः कौशलविषयैः, व्यावसायिकविषयैः,आधुनिकविषयैः च सह यथा- संस्कृतम्, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, सङ्गणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, इत्यादिभिः मिलित्वा विशिष्टं सस्वर-वेदपाठ्यक्रमं सर्वासु उपलब्धशाखासु सञ्चालयति, स पाठ्यक्रमः सर्वकारेण मानितः, सर्वकारेण मानितं बोर्ड्-प्रमाणपत्रं च प्रदीयते।

वेदितव्ये परा अपरा चेति द्वे विद्ये अधीत्य मानवः सुखीभवति। अस्मिन् प्रपञ्चे अधीता विद्या अविद्या च सुखेन जीवनयापनार्थं मनुष्यान् समर्थान् करोति, परलोके मुक्तियोग्यान् च विधत्ते। वेदे वर्णितानां भौतिकानां विषयाणां ज्ञानं, भौतिकज्ञानस्य साहाय्यशाखाः, भौतिकरुच्यनुगुणाः विषयाः च अपरा विद्येति नाम्ना कथ्यन्ते। उपनिषत्सु प्रतिपादितम् आत्मचिन्तनम् आत्मनः अन्वेषणं च परा विद्येति नाम्ना कथ्यते। प्राचीनभारते प्रसिद्धाः, वेदाः सहयोगिन्यः ज्ञानविषयिण्यः विद्याः चतुर्दश (14) वर्तन्ते। ता यथा- चत्वारः वेदाः, षड्वेदाङ्गानि, पुराणानि, न्यायः, मीमांसा, धर्मशास्त्रं च । चतुर्दशभिः विद्याभिः सह आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रम् (स्थापत्यवेदः वा) इति चतुरः उपवेदान् संयोज्य 18 विद्याः वर्तन्ते। सहस्रशः वर्षेभ्यः अत्र भरतखण्डे भारतभूमौ सर्वेषां ज्ञानानां, विज्ञानानां, शिक्षणस्य च भाषा

संस्कृतभाषा आसीत्, यतो हि अस्मिन् भरतखण्डे भारतमहाद्वीपे भारतभूखण्डे दीर्घकालं यावत् एकमात्रं भाषितभाषा संस्कृतभाषा एव आसीत्। तस्मात् तदा वेदार्थानां सुलभतया ज्ञानाय जनाः समर्थाः एव आसन्।

प्राचीनस्य तक्षशिला-विश्वविद्यालयस्य विषये वयं सर्वे शृणुमः एव। तत्र अष्टादश (18)-शिल्पानां, प्रौद्योगिकविषयाणां च अध्ययनम् अध्यापनं च प्राचलत्, आनुभविकं प्रयोगपूर्वकं शिक्षणं प्राचलत् इति च वयं जानीमः एव। छान्दोग्योपनिषदि[1] केषुचित् नीतिशास्त्रग्रन्थेषु च एतासां विद्यानां विवरणं लभ्यते। तदनीन्तनाः ते 18 व्यावसायिकपाठ्यविषया अद्यापि अध्ययनयोग्यविषया इति ज्ञायन्ते । ते यथा- 1. गायनसङ्गीतम् 2. वाद्यसङ्गीतम् 3. नृत्यम् 4. चित्रकला 5. लेखशास्त्रम् 6. अभियान्त्रिकी 7. मूर्तिकला 8. प्रसूतितन्त्रम् 9. वाणिज्यम्, 10. गणितम् 11. आयुर्वेदः, चिकित्सा 12. कृषिः 13. रथनिर्माणम्, परिवहनम् 14. राज्यशासनम्, प्रशासनिकप्रशिक्षणम्, 15. धनुर्विद्या, दुर्गनिर्माणम्, सैन्यकला च, 16. विविध-वस्तुनिर्माणम्, उत्पादनं च , 17. सर्पविद्या 18. गुप्तनिधेरन्वेषणम् । उपर्युक्तासु कलासु शिल्पेषु च अभियान्त्रिक्याः शिक्षणाय, कौशलसम्पादनाय च प्राचीनकाले प्रशिशिक्षुप्रणाली विकसिता आसीत्।

समग्रे विश्वे प्राचीनसभ्यतासु सर्वदौ गण्यमानायां भारतीयसभ्यतायां शास्त्राणां, ज्ञानस्य, विज्ञानस्य, प्रौद्योगिक्याः च शिक्षणस्य विशाला सुदृढा च परम्परा वर्तते । भारतं प्राचीनकालादेव ऋषीणां, ज्ञानिनां, विदुषां वैज्ञानिकानां च भूमिः अपि वर्तते। अनुसन्धानैः इदं ज्ञातं यत् भारतं विद्यानाम् (विद्या आध्यात्मिकं ज्ञानम् , अविद्या भौतिकं ज्ञानम्) अध्ययने अध्यापने च विश्वगुरुः आसीत् भविष्यति च, समग्रे प्रपञ्चे भारतं सक्रियं योगदानं च सर्वेषु क्षेत्रेषु प्रादात्, ददाति च। प्राचीनकालादेव भारतस्य नानभागेषु आधुनिकविश्वविद्यालयेन तुल्यानां बृहतां शिक्षणकेन्द्राणां गुरुकुलानां च स्थापना अभवत्, तत्र सहस्राधिकाः विद्यार्थिनः नानास्थानेभ्यः नानादेशेभ्यः च आगच्छन्ति स्म। प्राचीनै ऋषिभिः अन्विष्टाः ज्ञान-विज्ञान-प्रौद्योगिक्यभियान्त्रिक्यादीनाम्

---

[1] नाम वा ऋग्वेदो यजुर्वेदः, सामवेदः, आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्त्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नाम---। छान्दोग्ये 7.1.4

अध्ययनपद्धतयः, प्रयोगात् परीक्षणविधानानि, सिद्धान्ताः च अनेकेषु विषयेषु विश्व-ज्ञानस्य मूलसिद्धान्तान् स्थापयामासुः, चिन्तनस्य उत्साः च अभूवन्, खगोलविज्ञाने, भौतिक्यां, रसायनविज्ञाने, गणिते, चिकित्साविज्ञाने, प्रौद्योगिक्यां, ध्वन्यनुसन्धाने, व्याकरणे एवम् अन्यत्र च तादृशेषु विविधेषु विषयेषु सिद्धान्तप्रतिपादने प्राचीनकालादेव भारतस्य योगदानम् अतीव महत्त्वपूर्णं वर्तते इति अनुसन्धानेन आविश्वं प्रथितमेव । अतः भव्यस्य भारतस्य नागरिकाः बालकाः बालिकाः च अवश्यमेव ऋषिप्रदत्तं मूलं वैदिकं ज्ञानं प्राप्नुयुः गौरवमनुभूय भारतभाग्यं चिन्तयेयुः, रचयेयुः च । भारत-संसद्भवनस्य मुख्यद्वारि उट्टङ्कितं "वसुधैव कुटुम्बकम्" इति, विविधेषु अवसरेषु गणमान्यैः संवैधानिकप्राधिकरणैः उद्धृतानां वेदमन्त्राणामर्थज्ञानं वेदाध्ययनेन, वेदमन्त्रार्थचिन्तनेन एव सम्भवति। वेदेषु, सम्पूर्णे वैदिकसाहित्ये च सत्, चित्, आनन्द-तत्त्वचिन्तनं समेषां प्राणिनाम् अन्तर्णिहितयाः समानतायाः उपरि बलं प्रददाति।

वेदाः वैज्ञानिकज्ञानस्य स्रोतांसि वर्तन्ते। अतः बह्वीनाम् आधुनिकसमस्यानां समाधानाय वेदमूलकानां भारतीयज्ञानस्रोतसां श्रद्धया पुनः पुनः अन्वेषणम् आवश्यकम्। वेदानां पाठं, वैदिकज्ञानसामग्रीं, वैदिकदर्शनं वा आध्यात्मिकज्ञानस्य वैज्ञानिकज्ञानस्य च रूपेण यावत् वयं छात्रान् न बोधयामः तावत् आधुनिकभारतस्य अपेक्षा-पूर्त्यर्थं वेदे निहितानां विविधानां ज्ञान-विज्ञान-विचाराणां देशे सर्वत्र, विश्वस्तरे च प्रसारः पूर्णरूपेण नैव भविष्यति।

वेदाध्यापनं वेदशिक्षा वा (वेदपाठः, मौखिकी, श्रुतिपरम्परा वा, वेदज्ञानपरम्परा) केवलं धार्मिक- शिक्षामात्रं नैव । वेदानामध्ययनं नाम धर्मविषयकमेव निर्देशमात्रम् इति कथनं सर्वथा अनुचितमेव। वेदः धार्मिकवाङ्मयमात्रम् एव न, वेदेषु केवलं धार्मिकसिद्धान्तमात्रम् एव न प्रतिपादितम्, अपितु वेदाः ज्ञानविज्ञानकोषाः सन्ति, तत्र ज्ञानं विज्ञानं च वर्तते । मानवजीवनसाफल्याय, आनन्दाय च आवश्यकानां समेषां ज्ञानानां कोषरूपः वेदः, स वेदः सर्वज्ञाननिधिः । अतः वेदशिक्षणं वेदाध्ययनं वा धार्मिकशिक्षणम्, धार्मिकनिर्देशः इति वा चिन्तनं सर्वथा युक्तियुक्तं न विद्यते।

2004 वर्षस्य 6736 नागरिक-प्रतिवेदनसंख्यान्वितम् अभियोगम् (AIR 2013: 15 SCC 677) अनुलक्ष्य 03-07-2013 दिनाङ्के प्रकाशिते माननीयसर्वोच्चन्यायालयस्य निर्णये स्पष्टं यत् वेदाः केवलं धार्मिकग्रन्थाः नैव सन्ति, वेदेषु गणितं, खगोलविज्ञानं, ऋतुविज्ञानं, रसायनविज्ञानं, द्रवचालिकी (हाइड्रोलिक्स) भौतिकविज्ञानं, प्रौद्योगिकी, कृषिः, दर्शनं, योगः, शिक्षा, काव्यशास्त्रं, व्याकरणं, भाषाविज्ञानम् इत्यादयः विषयाः सम्मिलिताः सन्ति इति।

**2020 राष्ट्रियशिक्षानीतेः अनुसरणपूर्वकं प्रतिष्ठानस्य, बोर्ड् इत्यस्य च माध्यमेन वेदशिक्षणम्-**

2020 राष्ट्रियशिक्षानीतौ भारतीयज्ञानप्रणाली नाम्ना संस्कृतज्ञानप्रणाली संज्ञिता अस्ति। तत्र भारतीयज्ञान-प्रणाल्याः महत्त्वं, पाठ्यक्रमे तस्याः समावेशः, विविधविषयाणां संयोजने नम्या दृष्टिः स्पष्टं शिक्षानीतौ प्रकाशिता अस्ति। कलायाः, वाणिज्यस्य, मानविक्याः च छात्रा विज्ञानविषयाध्ययनाय समर्था भविष्यन्ति, प्रौद्योगिकीछात्राः विज्ञानछात्राश्च कलादिविषयान् अध्येतुमर्हन्ति। अध्येतारः सर्वे इच्छानुगुणं व्यावसायिकं, व्यावहारिकं च कौशलं (सॉफ्ट स्किल्स) प्राप्नुयुः इति। कलासु, विज्ञानेषु, इतरेषु क्षेत्रेषु च भारतस्य गौरवशालिनी परम्परा अनया शिक्षणव्यवस्थया संवर्धयितुं शक्यते। भारतस्य समृद्धां प्राचीनसंस्कृतिम्, आधुनिकजीवनपद्धतिं, भारतीयज्ञानप्रणालीं, परम्परां च संयोजयितुं संवर्धयितुं च सर्वकारेण शिक्षानीतिरियं निर्मिता।

भारतस्य शास्त्रीयभाषाणां साहित्यानां च महत्त्वं, प्रासङ्गिकता, सुन्दरता च उपेक्षितुं न शक्यते। संस्कृतं नाम संविधानस्याष्टमानुसूच्यां निर्दिष्टा एका महत्त्वपूर्णा आधुनिकी भाषा वर्तते। समग्रं लैटिन-ग्रीकसाहित्यं च संस्कृतसाहित्येन गुणे परिमाणे च तुलनायां कथमपि समानतां न प्राप्नोति। संस्कृतसाहित्ये गणितम्, दर्शनम्, व्याकरणम्, संगीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कथा आख्यायिका, कविता इति वाङ्मयविधानां विशालः कोषः वर्तते, स संस्कृतज्ञानप्रणालीरूपेण ज्ञायते। संस्कृतज्ञानप्रणाली न केवलं विश्वज्ञाननिधेः पोषणाय संरक्षणाय च भवेत् अपि तु संस्कृतज्ञानप्रणाली अनुसन्धानैः संवर्धनीया, नवीनैः चिन्तनैः संस्कृतज्ञानप्रणाली अस्माकं शिक्षाप्रणाल्यां सम्यक् उपयुक्ता च भवेत्। विगतेषु बहुषु सहस्राब्देषु विविध-विषयक-विद्वज्जनैः विविधासु सामाजिकपृष्ठभूमिषु कार्याणि कुर्वद्भिः विस्तृतजीवनदर्शनेन

सह संस्कृतज्ञानप्रणाल्या वाङ्मयसर्वस्वं प्रोपितं निर्मितं च अस्ति। संस्कृतविषयाः रुचियुक्तैः विधिभिः आकर्षकविधानैः प्रासङ्गिकविधिभिः च पाठयिष्यन्ते। अस्याः प्रणाल्या उपयोगः विशिष्टरूपेण ध्वनिरूपेण उच्चारणेन च वर्तते। माध्यमिकस्तरे संस्कृतविषयान् संस्कृतमाध्यमेन पाठयितुं, संस्कृताध्ययनम् आनन्दप्रदं कर्तुं संस्कृतपाठ्यविषयाणां लेखनं सरलमानकसंस्कृतेन (एस्. एस्. एस्.) भविष्यति। वेदानां श्रुतिपरम्परायां मौखिकपरम्परायां वा ध्वन्यात्मकम् उच्चारणं प्रवर्तते, वेदशिक्षायाः आधारः सस्वरोच्चारणं, ध्वन्यात्मकोच्चारणं च वर्तते।

कलाविज्ञानयोः पाठ्यक्रम-पाठ्येतरक्रिययोः शैक्षणिक-व्यावसायिकधारयोश्च मध्ये परस्परं स्पष्टो भेदो न कृतः शिक्षानीत्याम्, एतेषां सम्मिश्रणं पाठ्यचर्यायां भवितुमर्हति। समेषां विषयाणाम् अन्तस्सम्बन्धम् एकताम् अखण्डतां च सुनिश्चित्य अध्ययनाय बहुविषयकः आधारः शिक्षानीत्यां निर्मितः अस्ति, तेन च विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादिभिः सह बहुविषयिण्याः समग्रशिक्षाया उपरि बलं प्रदत्तमस्ति। नैतिकता, मानवसम्बद्धानि संवैधानिकमूल्यानि, सहानुभूतिः, परेषां कृते सम्मानः, स्वच्छता, शिष्टाचारः, लोकतान्त्रिकी भावना, सेवाभावना, सार्वजनीनसम्पदां सम्मानः, वैज्ञानिकचिन्तनं, स्वतन्त्रता, उत्तरदायित्वं, नानाविचारवादः, समानता, न्यायः इति भावानाम् उपरि बलं प्रदत्तमस्ति।

2020 राष्ट्रियशिक्षानीतेः 4.23 बिन्दु-संख्यायां अनिवार्यतया अध्येयविषयाणां, कौशलसंवर्धनस्य, शिक्षाक्रमस्य च विषये निर्देशो वर्तते। विद्यार्थिनाम् इच्छानुगणं अध्येयविषयाणां चयनविकल्पाः अधिकतया नमनीयाः भवेयुः, पाठ्यक्रमाः नमनीयाः स्युः । अपि च अधुना झटिति परिवर्तिनि विश्वे विद्यार्थिनः उत्तमाः, यशस्विनः, सफलाः, उद्योगशीलाः, उद्योगयोग्याः, उत्पादकशीलाश्च भवेयुः चेत् केचन अध्येयज्ञानविषयाः कौशलविषयाः अनिवार्याः करणीयाः, वृत्तिसामर्थ्यप्राप्तिः च अनिवार्या विद्यते, छात्रहितदृष्ट्या तत् महत्त्वपूर्णं च।

वैज्ञानिकः चिन्तनस्वभावः, प्रमाणाधारितं चिन्तनं, रचनात्मिकी नवीनता च, सौन्दर्यशास्त्रं कलायाः च भावना, मौखिकं लिखितं च अभिव्यक्तिसामर्थ्यं, संवादकौशलं च, स्वास्थ्यं संपोषणं च, शारीरिकशिक्षा, दैहिकसामर्थ्यं स्वास्थ्यं क्रीडा च, सहयोगः

सामूहिककार्यम्, समस्यायाः समाधानं तार्किकं चिन्तनं, व्यावसायिकाभिप्रकाशः  कौशलं च, तन्त्रज्ञानप्रयोगकौशलं, संख्यासाक्षरता, कूटचिह्नसंज्ञानं, संगणकीयं चिन्तनं, नैतिकता, नैतिक-तार्किकक्रिया, मानवीयानां संविधानीयानां मूल्यानां ज्ञानम् अभ्यासश्च, स्त्रीपुंस-संवेदनशीलता, मौलिककर्तव्यम्, नगरिकता-कौशलं मूल्यं च, भारतस्य ज्ञानम्, पर्यावरणसम्बद्धा जागरा, तत्र जलसंसाधन-संरक्षणम्, स्वच्छता, समकालिकविषयाः स्थानीयविषयाश्च, देशेन, राज्यैः, प्रपञ्चेन वा सम्मुखीक्रियमाणानां विषयाणां ज्ञानं, नानाभाषासु कौशलेन सह अत्रोक्तानां कौशलानामपि अध्येयविषयेषु  समायोजनं विद्यते । बालकानां भाषाकौशलसंवर्धनाय, समृद्धभाषाणां तत्रस्थानां च कलाकोषाणां च  संरक्षणाय सर्वकारीयेषु स्वनिधिपोषितेषु विद्यालयेषु च सर्वेभ्यः छात्रेभ्यः एकां शास्त्रीयभाषां तत्साहित्यं च अधिगन्तुं वर्षद्वयस्य अवसरः भविष्यति।

2020 राष्ट्रियशिक्षानीतेः 4.27  बिन्दु-संख्यायां "भारतस्य ज्ञानम्" इति विषये महत्त्वपूर्णः निर्देशो वर्तते। "भारतस्य ज्ञानम्" इत्यस्मिन् विषये आधुनिकभारतस्य प्रतिस्पर्धानां सफलतया सम्मुखीकरणे,  आधुनिकभारतस्य सफलतायै, प्राचीनभारतस्य ज्ञानं योगदानञ्च, भारतीयज्ञानप्रणाली यथा- गणितं, खगोलविज्ञानं, दर्शनं, योगः, वास्तुकला, चिकित्सा, कृषिः, अभियान्त्रिकी, भाषाविज्ञानं, साहित्यं, क्रीडया सह शासनं, राजव्यवस्था, संरक्षणं च इत्यादीनां विषयाणां यत्रापि प्रासङ्गिकता भविष्यति तत्र विषयाणां सम्यक् योजनं भविष्यति । एतेषु औषधपद्धतयः, वनप्रबन्धनं, पारम्परिक (जैविकी) कृषिपद्धतिः, प्राकृतिक-कृषिपद्धतिः, स्वदेशीयक्रिडाः, विज्ञानादिषु क्षेत्रेषु प्राचीनार्वाचीनयोः भारतयोः प्रेरकाणां महापुरुषाणां ज्ञानप्रदाः विषयाः भवन्ति।

2020 राष्ट्रियशिक्षानीतेः 11.1  बिन्दु-संख्यायां समग्रशिक्षां बहुविषयकशिक्षां प्रति च प्रवृत्त्यर्थं निर्देशाः सन्ति। भारते समग्रतया बहुविषयकाध्ययनं काचित् प्राचीना परम्परा विद्यते। तक्षशिला, नालन्दा-प्रभृतिविश्वविद्यालयेषु अध्यापितानि 64 कला-कौशलानि, सङ्गीतकला, चित्रकला इत्यादिकलाविषयाः, रसायनशास्त्रं, गणितम्, इत्यादिवैज्ञानिकक्षेत्राणि, काष्ठतक्षणकार्यम्, वस्त्रसीवनकला, इत्यादिवृत्तिपरकक्षेत्राणि, औषधीयकार्यम्, अभियान्त्रिकी

इत्यादिव्यावसायिकक्षेत्राणि, सम्प्रेषणम्, चर्चा, संवादः इत्यादिव्यावहारिककौशलानि (सॉफ्ट स्किल) च अन्तर्भूतानि । गणितम्, विज्ञानम्, वृत्तिपरकविषयान्, व्यवहारिकविषयान्, व्यावसायिकविषयान् च अन्तर्भाव्य मानवसर्जनस्य सर्वाणि क्षेत्राणि कला इति भारतीयं चिन्तनमस्ति। विविधकलानां यत् ज्ञानम् अस्ति, तत् आधुनिककाले समान्यतः कथ्यते उदारकला (कलानाम् उदारकल्पना ) इति। विविधकला-ज्ञानानां भारतीयशिक्षायां पुनः समायोजनम् अवश्यं भवेत् । ईदृशी शिक्षा एकविंशे (21) शताब्दे अपेक्षिता विद्यते।

2020 राष्ट्रियशिक्षानीतेः 22.1 बिन्दु-संख्यायां भारतीयभाषाणां, कलायाः, संस्कृतेश्च संवर्धनाय निर्देशो भवति। सहस्रेण वर्षैः निरन्तरं विकसितं भारतं विशिष्टस्य संस्कृतेः समृद्धः भाण्डागारः वर्तते। सा भारतसंस्कृतिः कलासु, साहित्यकृतिषु, प्रथाषु, परम्परासु, भाषाभिव्यक्तिषु, कलाकृतिषु, ऐतिहासिकेषु, सांस्कृतिकसम्पत्तिस्थलेषु च परिलक्षिता भवति। भारते भ्रमणम्, भारतीयातिथ्यसत्कारस्यानन्दः, भारतस्य सुन्दरहस्तशिल्पानां हस्तनिर्मितवस्त्रणां च क्रयणम्, भारतस्य प्राचीनसाहित्यस्य पठनम्, योग-ध्यानयोः अभ्यासः, भारतीयदर्शनशास्त्रेण प्रेरणा, भारतस्य विभिन्नपर्वसु उत्सवेषु वा भागग्रहणम्, भारतस्य वैविध्यपूर्णसंगीतस्य कलायाश्च प्रशंसनम्, भारतीयचलचित्रणां दर्शनम् इत्यादयः केचनायामाः वर्तन्ते येषां माध्यमेन विश्वस्य कोटिशः जनाः अस्यां भारतीय-सांस्कृतिकविविधतायां सम्मिलिताः भवन्ति। एवम् अस्य आनन्दम् अनुभवन्ति, लाभान्विताः च भवन्ति।

एषा सांस्कृतिकी प्राकृतिकी च सम्पद् वर्तते, तस्याः भारत-सांस्कृतिकसम्पदः संरक्षणम्, संवर्धनम्, प्रसारः च देशस्य सर्वेत्तमं प्राथम्यं स्यात्, यतो हि इयं सांस्कृतिकसम्पत् देशस्य अभिज्ञानाय अर्थव्यवस्थाविकासाय च अत्यन्तं महत्त्वपूर्णा वर्तते।

2020 राष्ट्रियशिक्षानीतेः 22.2 बिन्दु-संख्यायां कलानां विषये निर्देशो वर्तते। भारतीयकलायाः संस्कृतेश्च संवर्धनं न केवलं राष्ट्राय एव आवश्यकं, राष्ट्रियजनानां कृते अपि महत्त्वपूर्णं वर्तते। बालेषु बालिकासु च स्वाभिज्ञता, देश्य-जनेषु मामकीनभावः, अन्यसंस्कृतीनां तदीयलक्षणानां च कृते गौरवबुद्धिं जनयितुं सांस्कृतिकप्रज्ञायाः जागृतिः, अभिव्यक्तिः इत्यादीनां

सामर्थ्यानां विकासस्य अपेक्षा वर्तते। बालकेषु बालिकासु च स्वकीयसांस्कृतिकेतिहासे, कलायां, भाषासु, परम्परासु च स्वकीयभावनाया विकासेनैव गुणपूर्णस्य सांस्कृतिकाभिज्ञानस्य संस्कारः उत्पादयितुं शक्यते। अतः स्वकल्याणाय समाजकल्याणाय राष्ट्रकल्याणाय च सांस्कृतिकी जागृतिः अभिव्यक्तिश्च अधिकं महत्त्वं प्राप्नेति।

प्रतिष्ठानस्य मुख्यः पाठ्यक्रमः सस्वरवेदशिक्षणरूपः (मौखिकी, श्रुतिपरम्परा च- वेदपाठेन वेदज्ञानपरम्परया च सह) वर्तते। तेन सह इतरे अनिवार्या आवश्यकाः आधुनिकविषयाः यथा- संस्कृतभाषा व्याकरणं च, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, समाजोपयोगि-उत्पादकविषयाः (SUPW) महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षाबोर्ड् इत्यस्य प्रतिविषयं पाठ्यपुस्तकेषु संयोजिताः सन्ति। इतरे आवश्यकाः आधुनिकविषयाः भारतीयज्ञानपरम्परायाः (आई.के. एस्.) विषयाणां अनुप्रविष्टीनाम् उपरि (इनपुट) आधारिता वर्तन्ते। एते सर्वे पाठ्यपुस्तकविषया 2020 राष्ट्रियशिक्षानीतेः दिशानिर्देशस्य अनुरूपं संयोजिताः वर्तन्ते। 2020 राष्ट्रियशिक्षानीतिं, महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य वैदिक-शैक्षिकचिन्तकानां प्राधिकरणानां च परामर्शं च ध्यात्वा प्रापणीय-अभिलेख-संचिका- (PDF) (ऑनलाईन पुस्तकम्) पुस्तकानि प्रस्तुतानि सन्ति। एन.सी.ई.आर्.टी-संस्थया प्रकाशनीयायाः नवीन-राष्ट्रियपाठ्यचर्या-रूपरेखायाः अनुरूपम् एतानि पुस्तकानि अद्यतनानि करिष्यन्ते, ततः परमेव मुद्रितरूपेण पुस्तकानि उपलब्धानि भविष्यन्ति।

प्रतिष्ठानस्य राष्ट्रियादर्शवेदविद्यालयस्य अध्यापकाः, वेदाध्यापने समर्पिता वेदाचार्याः, संबद्ध-विविधवेदपाठशालानां संस्कृताध्यापकाः संस्कृतपाठ्यपुस्तकानां प्रत्नरूपम् अभिलेखम् निरन्तरं परिश्रम्य निरमन्। तदुपरि प्रतिष्ठानेन संबद्धानां वेदपाठशालानां नैके संस्कृताध्यापकाः सुपरिश्रम्य इत्थंरूपाणि संस्कृतपाठ्यपुस्तकानि सुष्ठु निर्मितवन्तः । तान् सर्वान् प्रति धन्यवादान् अर्पयामि । राष्ट्रस्तरीयाः संस्कृतभाषाविशेषज्ञाः समये समये पाठ्यपुस्तकेषु गुणवत्तामानेतुं विविधाः संस्तुतीः दत्त्वा दोषनिवारणं च कृत्वा पुस्तकानां गुणाधिक्ये साहाय्यं कृतवन्तः । तान्

सर्वानपि धन्यवादैः सभाजयामि। अक्षरयोजनाय, मुद्राक्षरदोषदूरीकरणाय, चित्राङ्कनाय च मम सहयोगिनः कर्मचारिणः कार्यं कृतवन्तः। तेभ्यः हार्दान् धन्यवादान् अर्पयामि।

पाठ्यपुस्तकानां गुणवत्ताविकासाय पुनः परिष्काराय च रचनात्मकविचाराणां कृते स्वागतवचांसि व्याहरामि। किं बहुना--

**आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।**

**बलवदपि शिक्षितानाम् आत्मन्यप्रत्ययं चेतः॥**

(अभिज्ञानशाकुन्तलम् १.०२)

प्रो. विरूपाक्ष वि जड्डीपाल्

सचिवः

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी

महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड, उज्जयिनी

# पाठ्यपुस्तकविषये प्रस्तावना

सस्वरवेदाध्ययनस्य, श्रुतिपरम्परायाः च संरक्षणाय प्रतिष्ठापितस्य महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य, प्राथमिकस्तरात् उच्चतरमाध्यमिकस्तरपर्यन्तं वेद-संस्कृत-शिक्षण-पाठ्यक्रमाणां मानकीकरणाय, संवर्द्धनाय, परीक्षामान्यतायै, प्रमाणीकरणाय च संस्थापितस्य "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृतशिक्षाबोर्ड्" इत्यस्य वेदविभूषण-द्वितीय-कक्ष्यायाः, सामान्यशिक्षणव्यवस्थायाम् द्वादश-कक्ष्यायाः कृते निर्धारितम् इदं पाठ्यपुस्तकम् अध्येतृहस्ते अस्ति इति नितराम् आनन्दस्य विषयः। 2020 राष्ट्रियशिक्षानीतेः (NEP-2020) अनुरूपं पुनर्व्यवस्थापितायां 3 + 4 सप्तवर्षीयायां प्रतिष्ठानस्य वेदाध्ययनपाठ्यक्रमयोजनायां वेदाध्ययननिरतान् पारम्परिकच्छात्रान् मुख्यधारायाम् आनेतुं, संस्कृतपाठ्यपुस्तकद्वारा भाषादक्षतां संवर्धयितुं च प्रयत्नः कृतः अस्ति।

वेदवाङ्मय-संस्कृतग्रन्थस्थविषयाणाम् उपयोगं कृत्वा वेद-संस्कृतपाठशालानां पाठ्यक्रमसामग्र्यः आधुनिकसमस्यानां निवारणोपायान्वेषणाय विकसिताः स्युः इति नीतिगतं चिन्तनमस्ति। अत्र पाठ्यपुस्तके यथास्थानम् आधुनिकज्ञानविज्ञानैः च सह भारतीयचिन्तनधारायाः, वैदिकज्ञानस्रोतसः च उपयुक्तज्ञानसामग्रीणां समायोजनं वर्तते। भारतस्य समृद्धां प्राचीनसंस्कृतिम्, आधुनिकजीवनपद्धतिं, भारतीयज्ञानप्रणालीं, परम्परां च संयोजयितुं संवर्धयितुं च सर्वकारेण शिक्षानीतिरियं निर्मिता। पाठ्यसामग्रीद्वारा एतस्याः अनुभवः भवेत् इति अनुभवपूर्वकम् अधिगमाय च सामग्री अत्र प्रदत्ता।

सर्वस्तरेषु संस्कृतस्य अध्ययनम् अभिप्रेरकं, सम्प्रेरकम्, आनन्ददायकं भाषाशिक्षणसोपानानुगुणं च भवेत्। सरलतया संस्कृतभाषाशिक्षणाय, विविधविषयाध्यापनाय च उपयोगि पाठ्यपुस्तकानि भवेयुः । पुस्तकम् अभ्यस्य सरलतया संस्कृतेन संभाषितुं योग्यता छात्राणां स्वतः भवेत् । अन्यभाषामाध्यमेन संस्कृतस्य पठनं पाठनं च न भवेत्, संस्कृतमाध्यमेन

एव भवेत् , संस्कृतपाठ्यविषयाणां लेखनं सरलमानकसंस्कृतेन भवेत् इत्यादीनि संकल्पनानि अस्य पाठ्यपुस्तकस्य निर्माणावसरे मनसि स्थापितानि।

संस्कृताध्यापनाय अस्य पाठ्यपुस्तकस्य उपयोगं ये कुर्वन्ति ते पुनः पुनः अभ्यासं कारयित्वा भाषण-पठन-लेखन-कौशलानां विकासाय, विशिष्टविषयज्ञानप्रदानाय च अध्यापकाः प्रयत्नं कुर्युः। पाठ्यसामग्रीनिर्माणावसरे विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादिभिः सह बहुविषयिण्याः समग्रशिक्षाया उपरि, संस्कृतभाषादक्षताविषये च बलं प्रदत्तमस्ति। शिष्टाचारः, स्वच्छता, सेवाभावना, मौलिककर्तव्यम्, नगरिकता-कौशलं मूल्यं च, सामूहिककार्यम्, मौखिकं लिखितं च अभिव्यक्तिसामर्थ्यं, संवादकौशलं च, मानवसम्बद्धानि संवैधानिकमूल्यानि, सहानुभूतिः, लोकतान्त्रिकी भावना, वैज्ञानिकचिन्तनं, न्यायः इति भावाः आनुभविकाधिगमाय तत्र तत्र पाठ्यसामग्र्याम् अन्तः निवेशिताः । इमे संस्कृतविषयाः रुचियुक्तैः विधिभिः आकर्षकविधानैः प्रासङ्गिकविधिभिः च पाठनीयाः प्रयत्नतः। संस्कृतस्य स्तरानुगुणं पाठ्यसामग्र्यां वेदसम्बद्धाः संस्कृतभाषाविषयाः योजिताः सन्ति। संस्कृतस्य सम्यक् अध्ययनं, भाषण-पठन-लेखन-कौशलविकासःभवेत्। संस्कृतभाषादक्षता अपि कौशलं भवति, वृत्तिसामर्थ्यप्राप्तये भाषाकौशलप्राप्तिः अनिवार्या अस्ति। विज्ञानादिषु क्षेत्रेषु प्राचीनार्वाचीनयोः भारतयोः प्रेरकाणां महापुरुषाणां ज्ञानप्रदाः विषयाः अपि पाठ्यसामग्र्याम् अन्तः निवेशिताः सन्ति।

कलाविज्ञानयोः सम्मिश्रणं, बहुविषयकः आधारः, विविधविषयाणां सङ्गमः च पाठ्यपुस्तके विषयदृष्ट्या द्रष्टुं शक्यम्। विविधपाठेषु विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादीनि संस्कृतवाङ्मयस्य विविधानि मुखानि उद्घाटितानि सन्ति। आधुनिकभारते प्राचीनभारतीयज्ञानस्य योगदानम्, भारतस्य ज्ञानम्, भारतीयज्ञानप्रणाल्याः गणितं, खगोलविज्ञानं, दर्शनं, योगः, वास्तुकला, चिकित्सा, कृषिः, अभियान्त्रिकी, भाषाविज्ञानं, साहित्यं, क्रीडया सह शासनं, राजव्यवस्था, ज्ञान-संरक्षणं, पर्यावरणसंरक्षणम्, जलसंसाधन-संरक्षणं च इत्यादीनां विषयाणां समायोजनं विद्यते पाठ्यपुस्तके। अध्येतारः एतस्य

संस्कृतभाषा-व्याकरण-पाठ्यपुस्तकस्य सम्यक् अध्ययनेन लाभान्विता भविष्यन्ति इति विश्वसिमः।

प्रतिष्ठानेन संबद्धानां वेदपाठशालानां संस्कृताध्यापकाः श्रीसुरेशचन्द्रशर्मा, श्रीमणिशङ्करमिश्रः, डॉ. नरेशगोपालकटारा, डॉ. विजयकुमार उपाध्यायः, श्रीमनोजकुमारशर्मा, श्री अखलेशकुमारः, डॉ.ब्रजबिहारीपाण्डेयः, प्रतिष्ठानस्य अध्यापकचरः डॉ. अनूपकुमारमिश्रः च संस्कृतपाठ्यपुस्तकस्य प्राग्रूपतया (ड्राफ्ट) कांश्चन पाठान् निर्मितवन्तः। आदितः संस्कृतपाठ्यपुस्तक-निर्माण-कार्ये अस्मिन् संपूर्णतया संयुक्ताः डॉ.श्रीशेषराजरेग्मी, डॉ.यतिराज-सापकोटा, डॉ.सुकान्तप्रामाणिकः च संशोधन-प्रश्नसंयोजन-योग्यताविस्तारादियोजनेन, दोषदूरीकरणेन च अन्तिमं पुस्तकनिर्माणं कृतवन्तः। राष्ट्रियादर्शवेदविद्यालयस्य इदानीन्तनः संस्कृताध्यापकः डॉ. वेणुधरदाशः संस्कृतपाठ्यपुस्तकानां मुद्रणशोधने साहाय्यम् अकरोत्। तान् सर्वान् प्रति धन्यवादान् अर्पयामः ।

राष्ट्रस्तरीयाः विविधाः संस्कृतभाषाविशेषज्ञाः यथासमयं संस्तुतीः दत्त्वा दोषनिवारणं कृतवन्तः । तेषां सर्वेषां कृते धन्यवादाः समर्प्यन्ते। अक्षरयोजनाय, मुद्राक्षरदोषदूरीकरणाय, पत्रसंयोजनाय, चित्राङ्कनाय च श्रीमती मिताली रत्नपारखी, श्रीमती किरण-पारमार, श्रीशैलेन्द्र डोडिया एवम् अन्ये च सहयोगिनः कर्मचारिणः कार्यं कृतवन्तः। तेभ्यः ताभ्यश्च हार्दान् धन्यवादान् अर्पयामः।

पाठ्यपुस्तकानां परिष्काराय विद्वांसः सूचनाः प्रयच्छन्तु इति प्रार्थनां कुर्मः।

पाठ्यपुस्तकनिर्मातृगणसदस्याः अध्यापकाः

# किमर्थमध्येयं संस्कृतम् ? ...... अतः अध्येयं संस्कृतम्।

1. अस्माकं भारतराष्ट्रस्य अत्यमूल्यः ज्ञाननिधिः संस्कृतभाषा। संस्कृते ज्ञानं, विज्ञानं, शब्दसम्पत्, नूतनशब्दनिर्माणशक्तिः,चिन्तनसम्पत्, देशस्य एकसूत्रे ग्रन्थनशक्तिश्च च सन्ति। संस्कृतभाषया तत्र विद्यमानेन लौकिकेन अलौकिकेन च ज्ञानेन विश्वस्मिन् विश्वे भारतस्य महान् आदरः, प्रतिष्ठा च वर्तते। भारतं प्रति वैश्विकस्य समादरस्य रक्षणाय संवर्धनाय च, वसुधैव कुटुम्बकमिति, यत्र विश्वं भवत्येकनीडमिति च भावनायाः संपोषणाय संवर्धनाय च संस्कृतस्याध्ययनं वयं कुर्याम, संस्कृताध्ययनाय विश्वजनान् बोधयेम, संस्कृताध्ययने समादरं च दध्याम।

2. भारतीयसंस्कृतेः ज्ञानं संस्कृतभाषां विना नैव सम्भवति । भारतीयसंस्कृतेः भारतीयजीवनपद्धतेः, विविधानां पर्वणां च सम्यक् ज्ञानम् आचरणं च संस्कृताध्ययनं विना न सम्भवति। संस्कृतिः संस्कृताश्रिता। उक्तं च "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" ।

3. मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, सत्यं वद, धर्मं चर, सत्यान्न प्रमदितव्यम्, धर्मान्न प्रमदितव्यम्, कुशलान्न प्रमदितव्यम्, वसुधैव कुटुम्बकम्, सङ्गच्छध्वं संवदध्वं, सह नाववतु सह नौ भुनक्तु, सत्यमेव जयते नानृतम्, उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत, ईशावास्यमिदं सर्वम्, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, श्रुतं मे गोपाय, उद्धरेदात्मनात्मानम् इत्यादीनाम् अमूल्यानां प्रेरकाणां जीवनपथदर्शकाणां नीतिवाक्यानां सर्वाद्यं स्रोतः संस्कृतम्। मानवजीवनस्य साफल्याय, एतेषां नीतिवाक्यानां परिज्ञानाय च अध्येयं संस्कृतम्।

4. सर्वेषां मानावानां कृते अविनाशी सनातनः ज्ञाननिधिः वेदराशिः। वेदार्थज्ञानाय वेदभाष्यज्ञानम् आवश्यकम्, वेदभाष्यज्ञानाय संस्कृतम् अध्येयम्।

5. उदात्त-अनुदात्त-स्वरित-स्वरपूर्वकं समुच्चारितो वेदो ज्ञाननिधिः वैश्विकं सृष्टिरहस्यम्, यच्च एतावता कालेन नैवोद्घाटितं प्रमाणितं वा अन्यैः वैदेशिकैः संशोधनैः, स वेदः

संस्कृतभाषामय एव ऋषिभिः दृष्टः समाम्नातश्च। सृष्टिरहस्यस्य परिज्ञानाय मन्त्र-सृष्टिरहस्यपरिज्ञानाय चाध्येयं संस्कृतम्।

6. वेदाः, उपनिषदः, ब्राह्मणानि, आरण्यकानि, पुराणानि, शिक्षादिषड्वेदाङ्गानि, स्मृतयः, ब्रह्मसूत्र-योगसूत्रादीनि सूत्राणि, रामायणम्, महाभारतम्, भगवद्गीता, पञ्चतन्त्रम्, हितोपदेशः, नीतिशतकम्, कालिदासादिकविरचितानि विविधानि काव्यानि, भासादिरचितानि विविधानि नाटकानि च संस्कृतभाषया एव रचितानि सन्ति । एतेषां वाङ्मयविशेषाणां ज्ञानाय सततं छात्रैः, सर्वैः जिज्ञासुभिः जनैश्च अध्येयं संस्कृतम्।

7. संस्कृते दर्शनशास्त्रम्, अर्थशास्त्रम्, राजनीतिशास्त्रम्, धर्मशास्त्रम्, नीतिशास्त्रम्, इतिहासपुराणानि आयुर्वेदादयः नानाज्ञानविषयाः विद्यन्ते। समृद्धस्य संस्कृतेः समृद्धं वाङ्मयम् अस्ति संस्कृते, तस्मात् संस्कृतम् अध्येतव्यम्।

8. संस्कृतवाङ्मयस्थानां विविधजीवनसूत्राणाम्, मानवान्तर्निहितस्य देवत्वस्य, आनन्दस्रोतसां च ज्ञानस्य, तेषां समुद्घाटनाय, आविष्काराय अमूल्यज्ञाननिधीनां ज्ञानाय च छात्रैः, सर्वैः जिज्ञासुभिः जनैश्च अध्येयं संस्कृतम्।

9. प्राचीनैः वैज्ञानिकैः चरक-सुश्रुत-कणाद-भास्कर-बोधायन-नागार्जुन-भारद्वाज-आर्यभट्ट-वराहमिहिरादिभिः रचितानां विविधानां वैज्ञानिकग्रन्थानां विज्ञानसिद्धान्तानां च सुष्ठु ज्ञानाय अध्येयं संस्कृतम्।

10. सर्वासां भारतीयभाषाणां नानावैश्विकभाषाणां च जननी पोषयित्री च संस्कृतभाषा। सर्वासु भारतीयभाषासु 95% शब्दाः संस्कृतभाषासमुत्पन्नाः एव शब्दा विलसन्ति। नानाराज्यवासिभिः जनैः भाषितानां विविधानां भाषाणां सुलभावगमाय, सुबोधाय च, अस्माकं भारतदेशस्य एकतायै अखण्डतायै च अध्येयं संस्कृतम्।

11. संस्कृतभाषा कंप्यूटर-यन्त्रस्य प्रोग्राम-समारचानाय योग्या भाषा अस्ति, भगवद्गीतायाः भाषा अस्ति, उपनिषदां भाषा अस्ति, वास्तु-खगोल-ज्यौतिष-आयुर्वेदादि-विज्ञनस्य भाषा अस्ति, नाट्यशास्त्र-सङ्गीत-चित्रादि-ललित-कालादीनां भाषा अस्ति, मानवविकासस्य ज्ञापिका भाषा अस्ति, संस्कृते अस्ति धर्मार्थकाममोक्षोपदेशः, जीवननिर्वाहाय हितावहः

श्रुतिस्मृत्युपदेशः अस्ति, राज्यशासनाय विश्वक्षेमङ्करः अर्थशास्त्रोपदेशः च अस्ति। लोकोपकाराय आत्मोद्धाराय च विश्वजनीनं तादृशं संस्कृतम् अध्येयम् ।

12. विविधेषु देशेषु वैदेशिकाः विद्वांसः संस्कृतभाषायाः ज्ञानमहिम्ना एव संस्कृताभिमुखाः अनुसन्धाननिरताः च दृश्यन्ते। संस्कृतवाङ्मये औषधित्वेन द्रव्यगुणत्वेन च उल्लिखितान् औषधिवनस्पतीन् आश्रित्य अनुसन्धानं विधाय ते वैदेशिकाः संशोधनतत्त्वं प्राप्तवन्तः सन्ति। अस्माभिरपि भारतीयस्य ज्ञानतत्त्वस्य रक्षायै प्रकाशाय देशहिताय च अनुसन्धानार्थम् अवश्यम् अध्येतव्यं संस्कृतम्।

13. भारतराष्ट्रस्य एकतायै अखण्डतायै च अत्यावश्यकमस्ति संस्कृताध्ययनम्। आसहस्त्रं वर्षेभ्यः अद्यावधि भारतस्य प्रतिग्रामं, सर्वेषु प्रदेशेषु, क्षेत्रेषु, राज्येषु संस्कृतस्य प्रभावः अविच्छिन्नतया दृश्यते। सर्वविधैः ज्ञानैः परिपूर्णा इयं भाषितभाषा देववाणी संस्कृतिशेवधिः, सुमधुरा, सरला, सरसा, सुबोधा, मनोज्ञा च । भारतवासिनां प्रत्येकं जनेन मनोयोगसाधनाय, मनस्सन्धानाय, नानाराज्यवासिभिः जनैः भाषितानां विविधानां भाषाणां, तत्रस्थानां शब्दानां च सुलभतया ज्ञानाय, भारतीयतायाः रक्षायै च अवश्यम् अध्येयं संस्कृतम्।

14. संस्कृतभाषायां विविध-विषयाणां ज्ञानस्य च अपरिमितत्वात् अगाधत्वात् च ज्ञान-महिम्ना एव चिराय भारतराष्ट्रं विश्वगुरुः आसीत्। तादृशं विश्वगौरवं पुनः प्राप्तुं, विश्वजनीनसौहार्दाय, विश्वशान्तये च जानीयाम संस्कृतम्, अधीयीमहि संस्कृतम्, अध्यापयेम संस्कृतम्।

15. भाषण-भूषण-आहार-विहार-व्यवहारसम्बद्धानां सदाचाराणां ज्ञानाय, कायिक-वाचिक-मानसिकव्यवहाराणां सम्यक् परिज्ञानाय, जीवनोपयोगिनां विषयाणां सम्यक्परिशीलनपूर्वकम् अनुभवाय समाजस्योपयोगिनां नानाविषयाणां शेवधिः संस्कृतभाषा अस्ति।

16. चरकसंहिता-सुश्रुतसंहिता-अष्टाङ्गहृदयाद्यायुर्वेदग्रन्थानां परिशीलनपुरस्सरं वात-पित्त-कफानां शरीरगतानां लक्षणज्ञानपुरस्सरं स्वस्थवृत्ताचारादिज्ञानेन निरामयाय निरामयजीवनयापनाय निश्श्रेयसे चाध्येयं संस्कृतम्।

17. संस्कृतभाषानिबद्धानां षड्दर्शनानां परिशीलनेन, योगादिशास्त्राणां प्रयोगेण निरन्तरम् अष्टाङ्गयोगाभ्यासेन च आत्मोद्धाराय, निश्श्रेयसे, मनश्शान्तये, स्वान्तस्सुखाय चाध्येयं संस्कृतम्, अध्याप्यं संस्कृतम्।

18. भारतस्य प्राचीनेतिहासप्रकाशकाः पुराणादयो ग्रन्थाः संस्कृतमाध्यमेन एव संरचिताः। अष्टादशसु पुराणेषु, अन्यत्र ग्रन्थेषु, प्राचीनशिलालेखेषु च भारतस्य प्रत्येकम् ऐतिहासिक-क्षेत्रस्य इतिहासः निगूढः अस्ति। यथार्थतया अस्मद्देशस्य इतिहासमधिगन्तुं प्रकाशयितुं च संस्कृतस्य ज्ञानमावश्यकम्। अतः संस्कृतम् अध्येयम्।

19. सर्वेषां विश्वजनीनानां मानवानाम् उपयोगी ज्ञानराशिः यथा - वैद्यकम्, योगः, ध्यानम्, जलस्रोतोन्वेषणम्, राष्ट्ररक्षासूत्राणि, नक्षत्रज्ञानम्, खगोलज्ञानम्, वैश्विकसृष्टिः, यज्ञयागादिः, भौतिकज्ञानं, रासायनिकं ज्ञानं, भौगोलिकाः पर्यावरणीयाः सामाजिकाः ज्ञानाधाराः, नीतिः, न्यायः इत्यादयः विषयाः, अन्यानि चिरन्तनानि चिन्तनानि च विलसन्ति संस्कृतग्रन्थेषु। तादृशानां विविधविषयाणां ज्ञानाय अध्येयं संस्कृतम्।

20. भाषाभिमानस्य, धनाभिमानस्य, मताभिमानस्य, आभिजात्याभिमानस्य, क्षेत्राभिमानस्य, अहङ्कारस्य च दूरीकरणपूर्वकं सत्यं, शिवं, सुन्दरम् इति भावनापूर्वकं सर्वत्र समबुद्धित्वस्य साधनाय अनुभवाय च, ततः भारतस्य राष्ट्रियैकतायै, अखण्डतायै, विकासाय च अध्येयं संस्कृतम्।

21. जीवनस्य सर्वाङ्गीणविकासाय, ज्ञानं (अध्यात्मं), विज्ञानं, कौशलं, कला चेति सर्वेऽपि विषयाः नूनमेव अपेक्षिताः। एतेषां चतुर्णां भारतीयविषयाणां ज्ञानाय, संवर्धनाय, अनुभूत्यै च संस्कृतस्य ज्ञानम् अनिवार्यम् अस्ति। अतः संस्कृतम् अध्येयम्।

## वेदविभूषणद्वितीयवर्षम्

## उत्तरमध्यमायाः द्वितीयवर्षेण/द्वादशवर्गेण समकक्ष्यम्

## पाठोद्देश्यानि

- ✓ कृषिः मानवमात्रस्य कृते उदरपोषणेन सह धनधान्यपशुपुत्रदारादीनां कृते भौतिकसमृद्धिप्रदात्री, लौकिकवस्तूपलम्भनद्वारा लोकहितस्य साधयित्री, आवश्यकनानावस्तूत्पादनसमर्था चेति मत्वा तादृशी कृषिवृत्तिः अनुसरणीया इति जानन्ति।
- ✓ यत्किञ्च जगत्यां लोकत्रये जगत् जङ्गमादि चलत्स्वभावं स्वस्वामिभावसम्बन्धयुक्तम्। तेन सर्वेण त्यक्तेन भोगान् भुञ्जीथाः। मा गृधः। मा भिकाङ्क्षीः। ममेदमिति धीः त्यक्तव्या। इत्यादेः सुखमयजीवनस्य यापनाय प्रेरयति अयं पाठः।
- ✓ मेघदूतम् इति काव्यस्य अध्ययनेन काव्यस्य रसास्वादनक्षमतायाः अभिवर्धनं तथा प्राचीनभारतीयभौगोलिकसौन्दर्याणाम् अवगमनं भवति।
- ✓ भूमिः नानाप्रभावपूर्णान् ओषधीन्, वृक्षान्, वनस्पतिविशेषान् च धारयति, सा पृथिवी अस्माकं कृते सुविस्तीर्णा भवति, अस्माकं कृते सिद्धिदा शोभिता च भवति, अतः वयं पृथिव्याः पुत्राः पृथिवीं मातृसमां पूजयामः इति भावः सर्वेषु जागर्ति।
- ✓ प्रजानां योगक्षेमाराधनम् इति पाठमाध्यमेन राज्ञः प्रजानां पालनकर्तव्य-विषये एवं प्रजानां च स्वदेशस्य कर्तव्याकर्तव्यविषये च अवगच्छन्ति। गद्यपद्यवाचनलेखनयोः कौशलमवाप्नुवन्ति।
- ✓ नीतिश्लोकाः इति पाठमाध्यमेन लोकाचारं जानन्ति। एवम् अन्त्याक्षर्यां भागग्रहणाय प्रेरिता भवन्ति।

- ✓ आर्यावर्तवर्तनम् इति पाठ्यांशस्य अध्ययनेन छात्राः सुसमृद्धं प्राचीनकालिकं भारतं ज्ञातुं प्रभवन्ति। भारतवर्षे विद्यमानां प्राचीनकालिकीम् उन्नतां समाजव्यवस्थां नगरव्यवस्थां च अभिजानन्ति।
- ✓ मुद्राराक्षसम् इति नाटकमाध्यमेन चाणक्यस्य कूटनीतिं प्रखरां बुद्धिं दूरदृष्टितां च जानन्ति। चाणक्यस्य राजनैतिकबुद्धिं स्वाचरणे आनीय समाजस्य राष्ट्रस्य च दुर्जनेभ्यो रक्षणाय प्रेरिता भवन्ति।
- ✓ ज्योतिषम् इति पाठमाध्यमेन पञ्चाङ्गविषयकं ज्ञानं, ग्रहनक्षत्रराशीनां मानवजीवने प्रभावं, शुभाशुभमुहुर्तं च अभिजानन्ति।
- ✓ रामायणम् इति पाठेन सर्वप्राथम्येन विरचितस्य इतिहासपरकस्य महाकाव्यस्य ज्ञानं, तस्य प्रणेतुः महर्षेः वाल्मीकेः च ज्ञानं सम्पादयन्ति। एवं मर्यादापुरुषोत्तमस्य श्रीरामस्य राज्यव्यवस्थां, तात्कालिकसमाजस्य श्रीरामं प्रति स्नेहं च ज्ञातुं शक्नुवन्ति।
- ✓ महाभारतम् इति पाठ्यांशेन विश्वस्य लक्षश्लोकात्मकस्य इतिहासपरकस्य महाभारतस्य महाकाव्यस्य परिचयं महिमानञ्च विदन्ति। एवञ्च राजनीतिं तात्कालिकं समाजं च ज्ञास्यन्ति। विदुरनीतिमाध्यमेन स्वव्यवहारस्य कर्तव्याकर्तव्यकं ज्ञात्वा व्यवहारेऽपि अनुकुर्वन्ति।
- ✓ जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते इति पाठे भरद्वाजभृग्वोः संवादमाध्यमेन वृक्षाणां चैतन्यं विद्यते न तु जडत्वम् इति विजानन्ति। अतः वृक्षाणां कर्तनं न करणीयम्, अपि तु सर्वथा ते संरक्षणीयाः इति विषये जागरूका भवन्ति।
- ✓ नैषधीयचरितम् इति पाठांशेन महाकविश्रीहर्षस्य काव्यप्रावीण्यं, नैषधीयचरितस्य सामान्यज्ञानं, राज्ञः नलस्य चतुर्दशविद्याविषये पारङ्गतत्वं च जानन्ति।

- ✓ भारतीयसंस्कृतवाङ्मयस्य मूलाधारभूतानां वेदानां संरक्षकाणां विविधभाष्यकाराणां योगदानं अवगच्छन्ति। वेदराशेः अमूल्यतत्वानां अक्षुण्णार्थं ऋजुमार्गेण यथार्थज्ञानार्थं च भाष्यस्य योगदानविषये भोत्स्यन्ति।
- ✓ संस्कृतवाङ्मयेषु अन्यतमानां पुराणानां लक्षणस्य रचयितुः च परिचयं प्राप्नुवन्ति। तत्तत्पुराणेषु विद्यमानानां सृष्ट्यादीनां ज्ञानं पुराणानाम् अध्ययनेन लब्धुं शक्यते इति जानन्ति। श्रीमद्भागवतस्थ-आचार्याविर्होत्रक्तवेदविहितकर्मविषयम् अवगच्छन्ति अनुकुर्वन्ति च।

**टिप्पणी** - पाठ्यपुस्तकेऽस्मिन् मुख्यांशानामेव समायोजनं कृतं वर्तते। समग्रज्ञानार्थं **शिक्षकैः मूलग्रन्थाः अध्याप्याः छात्रैश्च अध्येतव्याः।** अत्र सर्वेषां पाठगतानाम् उद्देश्यानां सामान्यतया ज्ञानाय एकत्र समायोजनेन उल्लेखः कृतः अस्ति। कक्ष्यायां साक्षात् पाठावसरे अन्तर्निहितान् उद्देश्यान् मनसि निधाय तं तं पाठम् अध्यापकः पाठयेत्, विद्यार्थिनः विद्यार्थिनीश्च बोधयेत्।

# पाठानुक्रमणिका


| | | | |
|---|---|---|---|
| | | प्रार्थना | |
| प्रथमः पाठः | - | श्रीमद्भागवते कृषिधर्मः | 1 - 11 |
| द्वितीयः पाठः | - | ईशावास्योपनिषद् | 12 - 22 |
| तृतीयः पाठः | - | मेघदूतम् | 23 - 33 |
| चतुर्थः पाठः | - | माता भूमिः पुत्रोऽहं पृथिव्याः | 34 - 48 |
| पञ्चमः पाठः | - | प्रजानां योगक्षेमाराधनम् | 49 - 55 |
| षष्ठः पाठः | - | नीतिश्लोकाः | 56 - 63 |
| सप्तमः पाठः | - | आर्यावर्तवर्णनम् | 64 - 71 |
| अष्टमः पाठः | - | मुद्राराक्षसम् | 72 - 80 |
| नवमः पाठः | - | ज्योतिषशास्त्रम् | 81 - 89 |
| दशमः पाठः | - | रामायणम् | 90 - 98 |
| एकादशः पाठः | - | महाभारतम् | 99 – 109 |
| द्वादशः पाठः | - | जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते | 110 - 117 |
| त्रयोदशः पाठः | - | नैषधीयचरितम् | 118 - 124 |
| चतुर्दशः पाठः | - | वेदभाष्यकाराः | 125 - 134 |
| पञ्चदशः पाठः | - | पुराणानि | 135 - 143 |

# श्रीवेदपुरुषाय नमः

## मङ्गलम्

स्व॒स्ति नो॑ मिमीताम॒श्विना॒ भगः॑ स्व॒स्ति दे॒व्यदि॑तिरन॒र्वणः॑।
स्व॒स्ति पू॒षा असु॑रो दधातु नः स्व॒स्ति द्यावा॑पृथि॒वी सुचेतुन॥
स्व॒स्तये॑ वा॒युमुप॑ ब्रवामहै॒ सोमं॑ स्व॒स्ति भुव॑नस्य॒ यस्पतिः॑
बृह॒स्पतिं॒ सर्व॑गणं स्व॒स्तये॑ स्व॒स्तये॑ आदि॒त्यासो॑ भवन्तु नः
विश्वे॑ दे॒वा नो॑ अ॒द्या स्व॒स्तये॑ वैश्वान॒रो वसु॑र॒ग्निः स्व॒स्तये॑।
दे॒वा अ॑वन्त्वृ॒भवः॑ स्व॒स्तये॑ स्व॒स्ति नो॑ रु॒द्रः पा॒त्वंह॑सः
स्व॒स्ति मि॑त्रावरुणा स्व॒स्ति प॑थ्ये रेवति।
स्व॒स्ति न॒ इन्द्र॑श्चा॒ग्निश्च॑ स्व॒स्ति नो॑ अदिते कृधि
स्व॒स्ति पन्था॒मनु॑ चरेम सूर्या॑चन्द्र॒मसा॑विव।
पुन॒र्दद॒ताघ्न॑ता जान॒ता सं ग॑मेमहि
स्व॒स्त्यय॑नं॒ तार्क्ष्य॒मरि॑ष्टनेमिं म॒हद्भू॑तं वा॒यसं॑ दे॒वता॑नाम्।
असु॒र॒घ्नमिन्द्र॑सखं स॒मत्सु॑ बृहद्यशो॒ नाव॑मि॒वा रुहेम॥
अं॒हो॒मुच॑माङ्गि॒रसं॒ गयं॑ च स्व॒स्त्या॑त्रेयं मन॑सा च॒ तार्क्ष्य॑म्।
प्रय॑तपाणिः शरणं प्र प॑द्ये स्व॒स्ति सं॑बा॒धेष्वभ॑यं नो अस्तु॥

(ऋग्वेद)

# प्रथमः पाठः

## श्रीमद्भागवते कृषिधर्मः

कृषिः मानवमात्रस्य कृते उदरपोषणेन सह धनधान्यादिदात्री, अन्नस्य प्रसादिका च। कृषिशास्त्रस्य प्रथमोपदेष्टा प्रजापतिरेव, स मनवे शास्त्रमिदमुपदिदेश। ततो राजा पृथुः कृषिशास्त्रं शिशिक्षे। स धनुः निस्स्फाल्य पृथिव्याः कर्षणं कृत्वा कृषियोग्यां समां च तामकरोत्। कृषिशास्त्रवित् पृथुः गोरूपधरां, मनुं स्वायम्भुवं वत्सं कृत्वा दुदोह। श्रीमद्भागवतपुराणस्य चतुर्थस्कन्धस्य सप्तदशाध्याये ज्ञानी विदुरः प्रश्नद्वारा पुराणकालिकं कृषिधर्मरहस्यम् उद्घाटयति। ततः परं तत्राष्टादशेऽध्याये पृथुधरणीसंवादे ओषधिवनस्पतिप्रभृतीनां संस्तम्भनकारणानि, पुनः तत्प्राप्तिमार्गान् च प्राह गोरूपधारिणी धरा तत्सर्वम् आधुनिककालेऽपि युक्तियुक्तं कृषिधर्मं समुपस्थापयतीति अत्र प्रतिपाद्यते।

कृषिः मानवमात्रस्य कृते भौतिकसमृद्धिप्रदात्री, लौकिकवस्तूपलम्भनद्वारा लोकहितस्य साधयित्री, आवश्यकनाना-वस्तूत्पादनसमर्था चेति मत्वा तादृशी कृषिवृत्तिः अनुसरणीयेति प्रभुसम्मितं वेद आदिदेश "कृषिमित् कृषस्व" इति। तत्र गावः, जाया इति च संकेतेन धर्मानुबन्धिधनार्जनाय कृषिकर्मणः मूलत्वं धनधान्यपशुपुत्रदारादि भौतिकसुख-साधनत्वं च वेद उपदिशति -

**अक्षैर्मा दीव्यः कृषिमित् कृषस्व वित्ते रमस्व बहुमन्यमानः।**
**तत्र गावः कितव! तत्र जाया तन्मे विचष्टे सवितायमर्यः॥**

*ऋग्वेदः१०-३४-१३*

ईदृशं वेदोपदिष्टं कृषिकर्म, वेदोपदिष्टम् अन्नं च प्रसादकम्। अन्नं नाम प्राणिभिः भूतैर्वा यत्किञ्चिदद्यते, भक्ष्यते, पाच्यते वा जठराग्निना अन्नमयकोशरूपं शरीरं प्राप्य जीवन्ति वर्धन्ते च प्राणिनः। अन्नप्रसादकं कृषिकर्म यत्नेन कृषकः कुर्यादिति संस्तुतिं चकार पाराशरः कृषिपाराशरे। वेदेषु, पुराणेषु, उपनिषत्सु अन्यत्र शास्त्रे काव्यवाङ्मये च कृषिकर्म, तन्महत्त्वं च संस्मर्यते। मध्यकालतः नानाप्रदेशेषु रुद्रदाम-पुलिकेशि-राजेन्द्रचोल-प्रभृतयो राजानः सुदर्शनादिसरो-निर्माणेन प्रथितयशसः श्रूयन्ते।

कृषिशास्त्रप्रवर्तको राजा पृथुः वैन्यः कृषिशास्त्रस्य प्रथमोपदेष्टा प्रजापतिरेव, स मनवे शास्त्रमिदमुपदिदेश। तस्मादादिपुरुषान्मनोः पृथुः कृषिशास्त्रं शिशिक्षे। परं पृथुः एव कृषिकर्म

वैज्ञानिकविधानैः सेतु-सरः कुल्यादिनिर्माणद्वारा प्रवर्तयामास। मनोः सकाशात् कृषिशास्त्रं विज्ञाय पृथुः अश्विनीकुमाराभ्यां कर्षविधिमधिगम्य प्रयुज्य च, प्रजारञ्जनाय, लोकहिताय, जीवनधारणाय च प्रजानां वृत्त्यर्थं भूमिं प्रददौ। पुराकाले अकृष्टपच्यानामोषधीनामुपभोगेन बीजानि समाप्तप्रायाण्यासन्, पृथिवी-कठोरा, रूक्षा, ऊषरा, चाभवत्। प्राकृतिकोच्चावचभूभागवत्त्वात् कृषियोग्या च नासीत्। स्वयमेव धनुः निस्स्फाल्य पृथिव्याः कर्षणं कृत्वा समां तामकरोत्। कृषिभूमिसेचकान् अयूयुजत्, ततो भूमिमाद्रामकार्षीत् कृषियोग्यां च कृषिशास्त्रवित् राजा पृथुः गोरूपधरां मनुं स्वायम्भुवं वत्सं कृत्वा दुदोह। तदुक्तं ब्रह्मपुराणे -

**"स कल्पयित्वा वत्सं तु मनुं स्वायम्भुवं प्रभुम्।**

**स्वपाणौ पुरुषव्याघ्रो दुदोह पृथिवीं ततः॥**

सस्यजातानि सर्वाणि पृथुर्वैन्यः प्रतापवान्।" धरा विष्णुपत्नी पृथुं कृष्युपायानुपदिदेश इति पुराणान्याचक्षते। काश्यपीय-कृषिसूक्तिरपि पुराणसारम् इदमुल्लिखति। भागवते प्रतिपादितः कृषिधर्मः श्रीमद्भागवतपुराणस्य चतुर्थस्कन्धस्य सप्तदशाध्याये ज्ञानी विदुरः प्रश्नद्वारा पुराणकालिकं कृषिधर्मरहस्यम् उद्घाटयति। तत्र विदुरस्य प्रश्ना इत्थम् -

**कस्माद्दधार गोरूपं धरित्री बहुरूपिणी।**

**यां दुदोह पृथुस्तत्र को वत्सो दहनं च किम्॥**

*भागवते ४-१७-३*

प्रकृत्या विषमा देवी कृता तेन समा कथम् इति अर्थात् (१) केन वा कारणेन भूमिः गोः सास्नादिमत्याः रूपं धृतवती? (२) पृथुः कथं दुदोह (३) को वा दोहनानुकूलः वत्सः (४) दोहनपात्रं वा किम् आसीदिति। ऋषिशापाद् वेने लयं गते, तत्पुत्रः पृथुः भगवतः नारायणस्यांशः राज्यं शशास। तदनु प्रजाः निरन्नाः क्षुधापीडिताः क्षामदेहाश्च संबभूवुः। ततश्च ताः प्रजा आहुः - हे राजन्, यावत् अन्नाभावात् वयं न नङ्क्ष्यामहे तावत् क्षुधार्दितानामस्माकमन्नं दातुमीहताम्। यतो भवानेव अस्माकं जीविकायाः पतिः, लोकानां रक्षिता च। तदुक्तम् -

**तन्नो भवानीहतु रातवेऽन्नं क्षुधार्दितानां नरदेवदेव।**

**यावन्न नङ्क्ष्यामह उज्झितोजो वार्तापतिस्त्वं किल लोकपालः॥**

*भागवते ४-१७-१०-११*

प्रजावत्सलः पृथुः प्रजानां करुणं परिदेवितं निशम्य, क्रुद्धो धृतशरासनो भूमिं लक्ष्यीकृत्य विशिखं सन्दधे। उदायुधं पृथुं वीक्ष्य वेपमाना धरणी गोरूपं धृत्वा ततः अपाद्रवत्। पृथुरपि कुपितोऽरूणेक्षणः शरं धनुषि सन्धाय, दिशो विदिशो रोदसीं च अभिधावन्ती गोरूपां धरणीम्

अनुद्धाव। अन्ते श्रान्ता गोरूपधरा धरित्री त्राहि त्राहीति वेपमाना प्रभुमेव विद्रूयता हृदयेन शरणं ययौ॥

**सा दिशो विदिशो देवी रोदसी चान्तरं तयोः।**
**धावन्ती तत्र तत्रैनं ददर्शानूद्यतायुधम्॥**
**लोकेनाविन्दत त्राणं वैन्यान् मृत्योरिव प्रजाः।**
**त्रस्ता तदा निववृते हृदयेन विदूयता॥**

*भागवते ४-१७-१६/१७*

ततश्च सा गोरूपा धरणी आह - हे राजन्! आकृतिकिल्बिषां मां कथं जिघांसते भवान्? योषिदेषा अहन्तव्या खलु? इमां गोरूपां भूमिं मां विपाट्य, धनुषा संविध्य, आत्मानं प्रजाः प्रतिष्ठितं विश्वं च जले कथं वा धास्यसि? इति च अपृच्छत्? तदा पृथुराह - राज्ञः शासनपराङ्मुखीं त्वां वधिष्यामि, राज्ञो मम आज्ञातिलङ्घनमेव भूमेः प्रथमापराधः। भूमिः या त्वं पृथुराज्ये यज्ञे देवतारूपेण भागं भजसे, परं धान्यादिकं त्वं न सृजसि, न तनोषि, न ददासि, एष उपकारानभिज्ञायास्तव भूमेः द्वितीयोऽपराधः। स्वयम्भुवा ब्रह्मणा भूतानां जीवनार्थत्वेन प्राक्कल्पादौ सृष्टानि ओषधिबीजानि त्वया भूम्या आत्मनि भूमौ अन्तः रुद्धानि, ग्रस्तानि कृतानि। मां राजानम् अन्नदानादिना प्रजा-भूतपालनाधिकृतमवज्ञाय ओषधिबीजानि न मुञ्चसि। अतः उद्यतधनुर्भूत्वा तव मांसपिण्डेन प्रजानां क्षुधां शमयिष्यामीति इत्थं राज्ञो वचो निशम्य गोरूपा पृथिवी करुणोक्तिभिः पृथुं श्रीमन्नारायणांशं तुष्टाव भीतभीता।

**वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीम्।**
**भागं बर्हिषि या वृङ्क्ते न तनोति च नो वसु॥**
**यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः।**
**तस्यामेवं हि दुष्टायां दण्डो मात्रा न शस्यते॥**
**त्वं खल्वोषधिबीजानि प्राक् सृष्टानि स्वयम्भुवा।**
**न मुञ्चस्यारीतानामार्तानां परिदेवितम्।**
**शमयिष्यामि मद्बाणैः भिन्नायास्तव मेदसा॥**

*भागवते ४-१७-२२-२५*

तत्राष्टादशेऽध्याये ओषधि-वनस्पतिप्रभृतीनां संस्तम्भनकारणानि प्राह गोरूपधारिणी धरा। तथा च पुरुषार्थस्य निष्पत्तये तत्त्वदर्शिभिः मुनिभिः अस्मिँल्लोके कृषिगोरक्षवाणिज्यादयः

जीवनोपाया निर्णीताः, परलोकसाधनभूता अहिंसा-दया-सत्य-यागादियोगा अपि प्रयुक्ताः। यो विद्वान् शास्त्रज्ञः, अविद्वान् अज्ञानी वा तान् तत्त्वदर्शिभिः मुनिभिः पूर्वदर्शितानुपायान् अनादृत्य, स्वबुद्धिमात्रेण तर्केण एव पुरुषार्थसाधनत्वेन अर्थान् आरभते ते पुनः पुनः अनुष्ठिता अपि न फलजनकाः भवन्ति।

**इत्थं पृथुमभिष्टूय रूषा प्रस्फुरिताधरम्।**
**पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना॥**
**सन्नियच्छाभिभो मन्युं निबोध श्रावितं च मे।**
**सर्वतः सारमादत्ते यथा मधुकरो बुधः॥**
**अस्मिँल्लोकेऽथवामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः।**
**दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धये॥**
**तानातिष्ठति यः सम्यगुपायान् पूर्वदर्शितान्।**
**अवरः श्रद्धयोपेत उपेयान् विन्दतेऽञ्जसा॥**
**ताननादृत्य योऽविद्वानर्थानारभते स्वयम्।**
**तस्य व्यभिचरन्त्यर्था आरब्धाश्च पुनः पुनः॥**

*भागवते ४-१८-१-५*

पुनराह गोरूपधारिणी धरा सगद्गदम् -

पुरा ब्राह्मणा जीवनार्थत्वेन स्वर्गाद्यर्थानुष्ठानत्वेन च सृष्टा या ओषधयः ताः लोकपालनयज्ञाद्यनुष्ठानरूपव्रतरहितैः भुज्यमानाः दृष्टाः। असद्भिः भुज्यमाना इमाः समूलं नश्येयुः इति भावना।

**पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशाम्पते।**
**भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः॥**
**अपालितानादृता च भवद्भिर्लोकपालकैः।**
**चोरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः॥**

प्राचीनैः लोकपालैः पृथिवी अपालिता अनादृता च। सर्वोऽपि लोकः चोरप्रायः सञ्जातः। तस्मात् यज्ञनिमित्तम् ओषधीरग्रसे गिलितवती। असद्भिर्भुज्यमाना ओषधयः न रोक्ष्यन्ति, ततश्च यज्ञादयो न सिद्ध्यन्ति इत्यालोच्य गिलितवती। मया गीर्णा ओषधयः महता कालेन मयि जीर्णाः

अभूवन्। निश्चितेन उपायेन ते पुनः आदातुं शक्यन्ते। **के ते उपायाः, येभ्यः जीर्णाः ओषधयः पुनः प्राप्यन्ते?**

यदि भवान् राजा भूतानाम् ऊर्जस्वद् बलप्रदमन्नं वाञ्छति तर्हि मम (भूमेः) गोरूपायाः अनुरूपं वत्सं, दोहनपात्रं, दोहनकर्तारं च उपकल्पय। वत्स-दोहन-पात्र-दोहनरूपैः सामग्रीसम्भारैः प्रीता वत्सला गोरूपधारिणी धरा क्षीरमयान् क्षीरप्रकृतिकान् कामान् इच्छाविशेषान् ओषधीः छन्दस्सोमवीर्यौजोबलासवादयः तान् धोक्ष्ये, क्षीररूपेण पूरयिष्यामि।

पर्वतादिभिः निम्नोन्नतां पृथिवीं समां कुरु। वर्षासु देवेन पर्जन्येन वृष्टं जलं वर्षर्तोः अपगमेऽपि अवृष्टिकालेऽपि यथा भूमेः सर्वतो वर्तेत तथा कुरु। इत्थं समीकरणाभावे क्वापि भूमौ मयि जलं न तिष्ठेत् इत्यतः समा अहं कर्तव्या। हे विभो ते तुभ्यं भद्रं भवतु। दोहनसमीकरणाभ्यां भद्रं भूयादित्यर्थः।

**वत्सं कल्पय मे वीर येनाहं वत्सला तव।**
**धोक्ष्ये क्षीरमयान् कामाननुरूपं च दोहनम्॥**
**दोग्धारं च महाबाहो भूतानां भूतभावनम्।**
**अन्नमीप्सितमूर्जस्वद्भगवान् वाञ्छते यदि॥**
**समां च कुरु मां राजन्देववृष्टं यथा पयः।**
**अपर्तावपि भद्रं ते उपावर्तेत मे विभो॥**

*भागवते ४-१८-९-११*

एतच्छ्रुत्वा पृथुः, ओमित्यङ्गीचकार। स्वायम्भुवं मनुं वत्सं कृत्वा, पाणौ दोहनपात्रे स्वयं दोग्धा भूत्वा सकलौषधिप्रकृतिभूतं क्षीरम् अधोक्। पृथुः क्षीरं प्रदुह्य, धरित्र्यां तद् विकिरन् ओषधीः प्रादुर्भावयामास। अपि च भूमिं कृषियोग्यां समां चकार। तदुक्तम्-

**चूर्णयन् स्वधनुष्कोट्या गिरिकूटानि राजराट्।**
**भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः॥**

*श्रीमद्भागवतम् - ४-१८-२९*

इत्थं च अन्नकाङ्क्षिणः पृथ्वादयः समीचीनमन्नं, स्वाभीष्टमन्नं च आकाङ्क्ष्य वत्सभेदेन, दोहपात्रभेदेन, दोग्धृभेदेन च दुदुहुः।

**सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक् पयः।**
**सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताम्॥**

**एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः।**

**दोहवत्सादिभेदेन क्षीरभेदं कुरुद्वहः॥**

*भागवते ४-१८-२६-२७*

एतत्परमेव ऋषयः, सुरगणाः, दैत्याः दानवाश्च, गन्धर्वाप्सरसः, पितरः, सिद्धाः, मायिनः, यक्षरक्षोभूत-पिशाचाः, अहिदन्दशूक-सर्पाः, पशवः, क्रव्यादाः, वटवत्साः, गिरयश्च स्वमुख्यवत्सं परिकल्प्य पृथक् पृथक् पयः धरित्रीं दुदुहुः।

**तथापरे च सर्वत्र सारमाददते बुधाः।**

**ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम्॥**

*भागवते ४-१८-१३*

## प्राचीनकालतः कृषिजन्याः पदार्थाः -

प्राचीनकालत आरभ्य अन्न-शाक-कन्दमूल-पुष्प-फल-कार्पास-शण-चन्दनागरु- कुङ्कुम-केसर-लवङ्गैला-ताम्बूल-पूगादिपदार्थाः समुत्पाद्यन्ते। अकृष्टपच्याः स्वयमेवोत्पन्नाः विना कृष्यादिप्रयत्नम्। कृष्टपच्या व्रीहिशालि-कुलत्थ-यव-गोधूम-चणक-कुसुम्भ-मसूर-सर्षप-तिल-मुद्ग-माष-शण-कलायादयः। वनौषधयश्च शण-हरीतक-ब्रह्म-शङ्खपुष्पीप्रभृतयः। ओषधयः फलपाकान्ताः बहुपुष्प-फलोपगाः। वनस्पतयस्तु अपुष्पाः, फलवन्तः स्मृताः वट-अश्वत्थ -उदुम्बरादयः। एते सर्वेऽपि कृषियोग्याः कृष्यपदार्था इत्युच्यन्ते प्राचीनवाङ्मये। इत्थं पृथुधरणी संवादप्रतिपादितं कृषिधर्मं समुपस्थापयति इति ज्ञायते।

# शब्दार्थाः

| | |
|---|---|
| धनधान्यादिदात्री | धनधान्यादीनि ददाति या सा |
| अन्नस्य प्रसादिका | सस्यदात्री |
| उपदिदेश | उपादिशत् |
| शिशिक्षे | शिक्षितवान्/ज्ञातवान् |
| निस्स्फाल्य | सन्धानं कृत्वा |
| कृषिशास्त्रविद् | कृषिशास्त्रज्ञः |
| दुदोह | दोहनम् अकरोत् |
| प्रथितयशसः | सुख्यातं यशः येषां |
| कुल्यादिनिर्माणेन | वारिप्रणाल्यादिनिर्माणेन |
| प्रवर्तयामास | प्रवर्तितवान् |
| अकृष्टपच्यानाम् | येषां पाको न भवति तेषाम् |
| रूक्षा | अचिक्कणा |
| ऊषरा | क्षारभूमिः/लवणमयी |
| अयूयुजत् | योजितवान् |
| नङ्क्ष्यामहे | नष्टा भविष्यामः |
| विशिखः | बाणः |
| सन्दधे | सन्धानं कृतवान् |
| वेपमाना | कम्पमाना |
| अपाद्रवत् | अपलायत |
| अरूणेक्षणः | रक्तनेत्रयुक्तः |
| अनुदधाव | अनुजगाम |
| अकृतकिल्बिषाम् | यया पापं नाचरितं ताम् |
| जिघांसते | अत्तुमिच्छति |
| तुष्टाव | अस्तौत् |
| ऊर्जस्वद् | ऊर्जवद् /बलवद् |

| छन्दस्सोमवीर्यौजोबलासवादयः | |
|---|---|
| बर्हिषि | यज्ञे |

# अभ्यासः

**१. सर्वे प्रश्नाः समाधेयाः -**

(क) कृषिशास्त्रप्रवर्तको राजा कः आसीत् ?

(ख) केन कारणेन भूमिः गोरूपं धृतवती ?

(ग) क्रुद्धो धृतशासनः पृथुः कां लक्ष्यीकृत्य विशिखं सन्दधे ?

(घ) 'वसुधे ! त्वां वधिष्यामि मच्छासनपराङ्मुखीम्' इति कः प्रोवाच ?

(ङ) 'अपालिता अनादृता च भवद्भिर्लोकपालकैः' इति कस्य वचनम् ?

(च) भद्रं ते उपावर्तेत विभो इति विशेषणं कस्य कृते ?

**२. पूर्णवाक्येन प्रश्नान् समाधत्त -**

(क) वैन्यः किं रूपां धरणीम् अनुदधाव ?

(ख) भूमेः प्रथमापराधः कः ?

(ग) 'भागं बर्हिषि या वृङ्क्ते न तनोति चनो वसु' इति कस्य वचनम् ?

(घ) के पुनः पुनः अनुष्ठिता अपि फलजनकाः न भवन्ति ?

(ङ) भूमिं कृषियोग्यां समां च कः चकार ?

**३. रिक्तस्थानं भरत -**

(क) अक्षौमां दीव्यः ............................ बहुमन्यमानः।
तत्र ............................ सवितायमर्थः॥

(ख) सा दिशो ............................ तयोः।
.................................... आयुधम्॥

(ग) दृष्टा योगाः ............................ प्रसिध्ये।
.................................. पूर्वदर्शितान्॥

(घ) एवं पृथ्वादयः ............................ मात्मनः।
......................................... कुरुद्वहः॥

(ङ) तथापरे च ............................. बुधाः।

...................................... पृथुभावितामॢ॥

### ४. अधोलिखितक्रियापदानां धातु-लकार-पुरुष-वचनानि लिखत -

| | क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | उपदिशति | ............... | ............... | ............... | ............... |
| (ख) | दुदोह | ............... | ............... | ............... | ............... |
| (ग) | आचक्षते | ............... | ............... | ............... | ............... |
| (घ) | शशास | ............... | ............... | ............... | ............... |
| (ङ) | अपाद्रवत् | ............... | ............... | ............... | ............... |
| (च) | अनुदधाव | ............... | ............... | ............... | ............... |
| (च) | वधिष्यामि | ............... | ............... | ............... | ............... |
| (ज) | कुरु | ............... | ............... | ............... | ............... |
| (झ) | आददते | ............... | ............... | ............... | ............... |

### ५. अधः प्रदत्तानां पदानां पर्यायपदानि लिखत -

| | | | | | |
|---|---|---|---|---|---|
| (क) | वैन्यः | ............... | (ख) | धरणी | ............... |
| (ग) | प्रजाः | ............... | (घ) | पयः | ............... |
| (ङ) | दुष्टाः | ............... | (च) | मुनिः | ............... |
| (छ) | कालः | ............... | (ज) | सुरगणाः | ............... |
| (झ) | पुष्पम् | ............... | (ञ) | बर्हिः | ............... |

### ६. अधोलिखितपदानां प्रकृतिप्रत्ययौ विभजत -

| | | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | निस्स्फाल्य | ............... | ............... |
| (ख) | कृत्वा | ............... | ............... |
| (ग) | बहुमन्यमानः | ............... | ............... |
| (घ) | वैन्यः | ............... | ............... |
| (ङ) | वेपमाना | ............... | ............... |

(च) अभिधावन्ती ............... ...............

(छ) भीतभीता ............... ...............

(ज) गिलितवती ............... ...............

(झ) भुज्यमाना ............... ...............

## ७. अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासं निर्दिशत -

| | विग्रहः | समासः |
|---|---|---|
| (क) बहुरूपिणी | ............... | ............... |
| (ख) तन्महत्त्वम् | ............... | ............... |
| (ग) मच्छासनपराङ्मुखीम् | ............... | ............... |
| (घ) प्रस्फुरिताधरम् | ............... | ............... |
| (ङ) लोकपालकैः | ............... | ............... |
| (च) कृषिशास्त्रप्रवर्तकः | ............... | ............... |

## ८. प्रयोगपरिवर्तनं क्रियताम् -

(क) राजा पृथुः कृषिशास्त्रं शिशिक्षे।

(ख) भूम्या गोरूपं धृतम्।

(ग) अन्नमयकोशरूपं शरीरं प्राप्य जीवन्ति वर्धन्ते च प्राणिनः।

(घ) अस्माभिः वेदेषु पुराणेषु उपनिषत्सु च कृषिकर्म तन्महत्त्वञ्च संस्मर्यते।

(ङ) कृषिशास्त्रस्य प्रवर्तको राजा पृथुः अस्ति।

(च) राजा भूतानाम् ऊर्जस्वद् बलप्रदमन्नं वाञ्छति।

## ९. रेखाङ्कितपदानि स्वीकृत्य कारकविभक्ती निर्णयत।

(क) आदिपुरुषाद् मनोः पृथुः कृषिशास्त्रं शिशिक्षे।

(ख) पृथुः गोरूपधरां पृथिवीं सकलौषधिप्रकृतिभूतं क्षीरम् अधोक्।

(ग) समा अहं कर्तव्या।

(घ) प्राचीनैः लोकपालैः पृथिवी अपालिता अनादृता च।

(ङ) स मनवे शास्त्रमुपदिदेश।

(च) पृथिव्याः कर्षणं कृत्वा समां तामकरोत्।

## योग्यता-विस्तारः

वेदः विश्वसाहित्यस्य प्राचीनतमवाङ्मयस्य निधिर्वर्तते। येषां ज्ञानमितरेण साधनेन न सम्भवति, तेषां ज्ञानं वेदात्सम्भवति।

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**
**एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥**

वेदः आद्यर्षीणां केवलमाध्यात्मिकजगत एव न अपि तु भारतीयवसुन्धरायाः समग्राधिभौतिकवैभवस्य दिग्दर्शनं कारयति। माता भूमिः पुत्रोऽहं पृथिव्याः। विश्वसाहित्ये अनया दृष्ट्या सूक्तमिदमपूर्वं कथ्यते। धरणीं प्रति अनुरागं तथा समग्रसमाजाय कल्याणं प्रकटयति सूक्तमिदम् -

**गिरस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवी स्योनमस्तु।**
**बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्॥**
**अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम्॥**

*अथर्ववेदः - १२.१.११*

**यत् ते भूमे विखनामि क्षिप्रं तदपि रोहतु।**
**मा ते मर्म विमृग्वरि मा ते हृदयमर्पितम्॥**

*अथर्ववेदः - १२.१.३५*

असंबाधं मध्यतो मानवानां यस्य उद्वतः प्रवतः समं बहु।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः॥

*अथर्ववेदः - १२.१.२२*

# द्वितीयः पाठः

# ईशावास्योपनिषद्

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥१॥**

**अन्वयः** - जगत्यां यत् किञ्च जगत् अस्ति इदं सर्वम् ईशा वास्यम्। तेन त्यक्तेन भुञ्जीथाः। कस्यस्वित् धनं मा गृधः॥

ईशा ईशेन इदं प्रत्यक्षतो दृश्यमानं सर्वं वास्यं वसनीयम् आच्छादनीयम्। सर्वं परमात्मना व्याप्तम् इति परमात्मनः सर्वत्र स्थितिं चिन्तयेत्। यत्किञ्च जगत्यां लोकत्रये जगद् जङ्गमादि चलत्स्वभावं स्वस्वामिभावसम्बन्धयुक्तम्। तेन सर्वेण त्यक्तेन त्यक्तस्वस्वामिभावसम्बन्धेन भोगान् भुञ्जीथाः। मा गृधः। माभिकाङ्क्षीः। ममेदमिति धियं त्यज। कस्यस्विद्धनम्। धनं कस्य स्वित्? कस्य पुनरेतद्धनम्?, न कस्यापि सर्वार्थस्य स्वस्वामिभावसम्बन्धः अविद्या।

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥२॥**

**अन्वयः** - इह कर्माणि कुर्वन् एव शतं समाः जिजीविषेत्। एवं त्वयि नरे इतः न अन्यथा अस्ति येन कर्म न लिप्यते॥

निष्कामानि मुक्तिहेतुकानि अग्निष्टोमादीनि कर्माणि कुर्वन् शतं समाः शतवर्षपर्यन्तं जिजीविषेत्। त्वं जीवितुमिच्छेः। शतं समाः शतवर्षपर्यन्तं यावदायुः पर्यवसानं तावदित्यर्थः। नान्यथेतोस्ति इतः प्रकारात् अन्यथा मुक्तिर्नास्ति। निष्कामकर्मानुष्ठानेन शुद्धान्तःकरणस्यैव मुक्तिर्नान्यथा, मुक्तये न अन्यः उपायः इत्यर्थः। न कर्म लिप्यते नरे। मुक्त्यर्थं क्रियमाणं कर्म नरे मनुष्ये न लिप्यते न सम्बध्यते, मुक्तिकारणान्तःकरणशुद्ध्यापादकत्वेनोपक्षीणत्वात्। उक्तं च बृहदारण्यके "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन" इति।

**असुर्या नाम ते लोका अन्धेन तमसावृताः।**
**तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥३॥**

**अन्वयः** - असुर्याः नाम अन्धेन तमसा आवृताः ते लोकाः सन्ति। ये के च जनाः आत्महनः सन्ति ते प्रेत्य तान् अभिगछन्ति॥

असुर्याः असुराणामिमे। असुषु प्राणेषु रमन्ते असुराः प्राणपोषणरताः। असुर्या नामकाः ते लोकाः। लोक्यन्ते दृश्यन्ते अनुभूयन्ते कर्मफलानि यत्र इति लोका नाम जन्मानि। अन्धेन तमसा अज्ञानलक्षणेन तमसा अन्धकारेण आवृताः सर्वतोवृताः। आत्मानं घ्नन्ति इति ये जनाः ते आत्महनः। यद्यपि आत्मा नित्यः अविनाशी च। अत्र आत्महन इति पदेन अविद्वांसः काम्यकर्मपराः लक्षिताः, विद्यमानस्य अजरामरस्य आत्मनः अविद्यादोषेण तैः जनैः तिरस्करणात्। ते जनाः जनित्वा म्रियन्ते, मृत्वा च जायन्ते। ते आत्महनः प्रेत्य मृत्वा देहं त्यक्त्वा तान् लोकान् असुर्यानामकान् गच्छन्ति। अन्यानि जन्मानि स्थावरान्तानि अपि गच्छन्ति। प्राप्नुवन्ति।

**अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।**
**तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधाति॥४॥**

**अन्वयः** - तत् एकम् अनेजत् मनसः जवीयः देवाः एनत् न आप्नुवन् यस्मात् पूर्वम् अर्षत्। तत् तिष्ठत् धावतः अन्यान् अत्येति। तस्मिन् सति मातरिश्वा अपः दधाति॥

त्रिष्टुप्-छन्दः अत्र। परब्रह्मणः आत्मत्वेन उपास्यास्य स्वरूपम् उक्तमस्ति। अनेजदेकम्। न एजत्। न चलत्। न कम्पनशीलम्। एकम् अद्वितीयम्। मनसो जवीयः ब्रह्म। मनः सङ्कल्पविकल्पात्मकत्वेन जववत् वेगवत्। शीघ्रगामि। आत्मा परब्रह्म मनसः अपि शीघ्रतरं गच्छति। वेगवत्तरं ब्रह्म। न एनत् ब्रह्म देवा आप्नुवन्। न प्राप्नुवन्। देवा अपि न एतत् प्राप्तुं शक्ताः। पूर्वं पूर्वकाले। अविनश्यत् अविनाशि ब्रह्म। तत् मनः धावतः द्रुतं गच्छतः अन्यान् मनोवागिन्द्रियादीन् अत्येति। अतीत्य गच्छति। तिष्ठत्। स्वयम् अविक्रियं सर्वत्र तिष्ठति। तस्मिन् आत्मतत्त्वे ब्रह्मणि सति। मातरिश्वा वायुः। मातरि अन्तरिक्षे श्वयति गच्छति। अपः जलं दधाति धारयति। ब्रह्मणि सत्येव सर्वप्राणभृत् वायुः अग्नि-रवि-मेघादीनां ज्वलन-दहन-प्रकाशाभिवर्षणादीनि च कर्माणि दधाति, धारयति वा।

**तदेजति तन्नैजति तद् दूरे तद्वन्तिके।**
**तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥५॥**

**अन्वयः** - तत् एजति। तत् न एजति। तत् दूरे। तत् उ अन्तिके। एतत् अस्य सर्वस्य अन्तः। तत् उ सर्वस्य अस्य बाह्यतः॥

तत् ब्रह्म एजति कम्पवत् भवति। क्रियायुक्तं भवति। न एजति। स्थावरं सत् क्रियारहितं भवति। तत् दूरे आदित्यनक्षत्रादिरूपेण अवस्थितम्। तद् उ अन्तिके। तत् एव अन्तिके। पृथिव्यादिरूपेण अवस्थितम्। उः सम्मुच्चये। तदेव अस्य सर्वस्य प्राणिसमूहस्य अन्तः मध्यत

आस्ते। तदेव सर्वस्य अस्य बाह्यतः जनरूपेण अवस्थितं च। चेतनाचेतनरूपम् अनन्तं सर्वगं ब्रह्म सर्वं खल्विदं ब्रह्म इति श्रुतेः वाक्यतः प्रमाणितं च।

**यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।**

**सर्वभूतेषु चात्मानं ततो न विचिकित्सति॥६॥**

**अन्वयः -** यः तु सर्वाणि भूतानि आत्मनि एव अनुपश्यति च सर्वभूतेषु आत्मानम्। ततः न विजुगुप्सते॥

यः तु मुमुक्षुः मोक्षं प्राप्तुमिच्छुः सर्वाणि भूतानि अचेतनानि चेतनानि च आत्मनि एव अनुपश्यति मय्येव सर्वाणि भूतानि अवस्थितानि न मद्यतिरिक्तानि इति। अहं ब्रह्म अस्मि इति कारणात्। सर्वभूतेषु आत्मानम् अवस्थितम् अव्यतिरिक्तं पश्यति। तेषां भूतानाम् अत्मानम् आत्मत्वेन पश्यति। ततः तस्मात् दर्शनात् न विचिकित्सति, न संशते।

**यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः।**

**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥७॥**

**अन्वयः -** यस्मिन् विजानतः आत्मा एव सर्वाणि भूतानि अभूत्। तत्र एकत्वम् अनुपश्यतः कः मोहः कः शोकः॥

यस्मिन् अवस्थाविशेषे सर्वाणि भूतानि चेतनानि अचेतनानि च आत्मैव अभूत् परमार्थदर्शनात् आत्मैव संवृत्तः इति विजानतः। आत्मैवेदं सर्वं, सर्वं खल्विदं ब्रह्म इति ज्ञातवन्तः। एकत्वमनुपश्यतः सर्वाणि भूतानि आत्मत्वेन अनुपश्यतः। योगिनः कृतचेतसः कः शोकः? कः मोहः?। न दुःखं नापि स्वकीय-परकीयबुद्धिजनको मोहः।

**स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्।**

**कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः॥८॥**

**अन्वयः -** सः स्वयम्भुः पर्यगात् अकायम् अस्नाविरम् अपापविद्धं शुक्रम् अव्रणं शुद्धं कविः मनीषी परिभुः। सः याथातथ्यतः शाश्वतीभ्यः समाभ्यः अर्थान् व्यदधात्॥

जगती छन्दः। सः यः एवम् आत्मानं पश्यति। ईदृशं ब्रह्म पर्यगात्। परिगच्छति। ब्रह्म प्राप्नोति। कीदृशं ब्रह्म? शुक्रं शुद्धं सत्त्वरजस्तमोभिः अमिश्रं, ज्ञानरूपम्। अकायं शरीररहितम्। शरीररहितत्वादेव व्रणरहितम्। अस्नाविरम्। शरीररहितत्वादेव शिरो-रहितम्। अपापविद्धम्। अधर्मादिवर्जितम्। क्लेशकर्मादिफलैः अविद्धम् अस्पृष्टम्। अमिश्रितम्। शुद्धम्। दीप्तिमत्। इत्थंभूतं ब्रह्म प्रपद्यते।

आत्मोपासनायुक्तस्य फलमाह - यः उपासकः ईदृशः कविः क्रान्तदर्शनः। मनीषी मनसः ईषिता सर्वज्ञः। मेधावी। परिभूः सर्वेषाम् उपरि उपरि भविता। सर्वतो भविता ज्ञानबलात् स्वयम्भूः ज्ञानबलेन ब्रह्मरूपेण भविता। शाश्वतीभ्यः समाभ्यः अनन्तवर्षेभ्यः याथातथ्यतः यथास्वरूपं यथाभूतकर्मफलसाधनतः अर्थान् कर्तव्यपदार्थान् कर्माणि व्यदधात् अकरोत्। सः अपि ब्रह्म परिगच्छति। ब्रह्म प्राप्नोति।

**अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते।**

**ततो भूय इव ते तमो य उ सम्भूत्यां रताः॥९॥**

**अन्वयः -** ये असम्भूतिम् उपासते ते अन्धं तमः प्रविशन्ति। ये उ सम्भूत्यां रताः ते ततः भूयः इव तमः प्रविशन्ति॥

असम्भूतिः असम्भवः। सम्भवः पुनर्जन्म। असम्भवः अपुनर्जन्म। पुनर्जन्माभावः। ये पुनर्जन्म नास्तीति उपासते। आत्मभिन्नं वा उपासते, सम्भूतिः आत्मा, सम्भवति अस्या इति सम्भवः आत्मा। मृतस्य पुनः पुनः जन्म नास्ति इति ये उपासते अनुतिष्ठन्ति ते अन्धन्तमः प्रविशन्ति। अज्ञानलक्षणं तमः प्रविशन्ति। ये पुनः उ निश्चयेन केवलं सम्भूत्यां रताः। सम्भूतिः आत्मा, सम्भवति अस्या इति सम्भवः आत्मा। आत्मज्ञानमात्ररताः कर्मपराङ्मुखाः। कर्म-ज्ञानयोः सम्बन्धम् अजानानाः। ततो भूय इव। ततः अपि बहुतरम्। ते तमः प्रविशन्ति। आत्मज्ञानमात्ररताः कर्मपराङ्मुखाः बहुतरं तमः प्रविशन्ति इत्यर्थः।

**अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्।**

**इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे॥१०॥**

**अन्वयः -** सम्भवात् अन्यत् एव आहुः। असम्भवात् अन्यत् आहुः। इति धीराणां शुश्रुम ये नः तत् विचचक्षिरे॥

सम्भवात्, सम्भवपरिज्ञानात्। सम्भवति अस्या इति सम्भवः आत्मा ब्रह्म। आत्मोपासनायाः फलम् अन्यत्। असम्भवपरिज्ञानात् कर्मपराङ्मुखत्वेन अव्याकृतोपासनायाः आत्मज्ञानमात्रतत्त्वस्य फलम् अन्यत्। इत्येवंविधं धीराणां विदुषां वचः शुश्रुम वयं श्रुतवन्तः। ते धीराः नः अस्माकं सम्भूत्यसम्भूत्युपासनाफलं विचचक्षिरे। व्याख्यातवन्तः।

**सम्भूतिञ्च विनाशञ्च यस्तद्वेदोभयं सह।**

**विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते॥११॥**

**अन्वयः -** सम्भूतिं च। सर्वजगत्सम्भवकारणं ब्रह्म। विनाशं च विनाशि शरीरं च। यः योगी तदुभयं तत् द्वयं जानाति। सह एकीभूतम्। विनाशिना शरीरेण ज्ञानोत्पत्तिकारणानि निष्काम-

कर्माणि कृत्वा अन्तःकरणशुद्धिं सम्पादयति। सम्भूत्या ब्रह्मोपासनेन हिरण्यगर्भोपासनेन आत्मज्ञानेन अमृतं मुक्तिम् अश्नुते।

**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**

**ततो भूय इव ते तमो य उ विद्यायां रताः॥१२॥**

**अन्वयः** - ये अविद्याम् उपासते ते अन्धं तमः प्रविशन्ति। ये उ विद्यायां रताः ते तमः भूयः तमः इव प्रविशन्ति ॥

ये उपासकाः साधकाः वा अविद्याम् उपासते, केवलानि स्वर्गार्थानि अग्निहोत्रादीनि कर्माणि अनुतिष्ठन्ति कुर्वते। ते अन्धन्तमः प्रविशन्ति तमः अज्ञानलक्षणं प्राप्नुवन्ति। संसारचक्रे एव भ्रमन्ति। संसारपरम्पराम् अनुभवन्ति। ये उ पुनः अन्तःकरणशुद्धिहेतुकानि कर्माणि सर्वथा त्यक्त्वा केवलं विद्यायाम् एव रताः। देवताज्ञाने एव रताः। ते पुनः भूय इव। बहुतरमेव। ज्ञानानुदयात् तमः अज्ञानलक्षणं प्राप्नुवन्ति। लोकयात्रायाः एव अभावेन दुष्करत्वात् अन्तःकरणशुद्ध्यभावात् च।

**अन्यदेवाहुर्विद्यायाऽन्यदाहुरविद्याया।**

**इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे॥१३॥**

**अन्वयः** - विद्याया अन्यत् आहुः। अविद्याया अन्यत् एव आहुः। इति धीराणां शुश्रुम ये नः तत् विचचक्षिरे ॥

विद्यायाः आत्मज्ञानस्य फलम् अन्यत् इति आहुः। अविद्यायाः कर्मोपासनायाः फलम् अन्यत् पितृलोकादिकम्। "कर्मणा पितृलोको विद्यया देवलोक" इति। तत् ज्ञानं कर्म च ते धीराः ज्ञानिनः नः अस्माकं विचचक्षिरे व्याख्यातवन्तः।

**विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह।**

**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥१४॥**

**अन्वयः** - यः विद्यां च अविद्यां च तत् उभयं सह वेद अविद्यया मृत्युं तीर्त्वा विद्यया अमृतम् अश्नुते॥

विद्याम् आत्मज्ञानं ब्रह्मज्ञानं देवताज्ञानं तथा अविद्यां अन्तःकरणशुद्धिहेतुकानि कर्माणि च उभयं द्वयं सह एकीभूतं वेद एकेनैव करणीयं वेद। कर्मकाण्डं ज्ञानकाण्डस्य अङ्गमिति वेद तथा अनुतिष्ठति च। सः योगी उपासकः अविद्यया उपासनया अन्तःकरणशुद्धिकारणैः अग्निहोत्रादिभिः मृत्युं तीर्त्वा, इह लोकयात्रां सम्यक् उत्तीर्य विद्यया आत्मज्ञाने ब्रह्मज्ञानेन देवताज्ञानेन अमृतम् मुक्तिम् अश्नुते प्राप्नोति।

**वायुरनिलममृतमथेदं भस्मान्तं शरीरम्।**

**ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर॥ १५॥**

**अन्वयः -** अथ वायुः अनिलम् अमृतम्। इदं शरीरं भस्मान्तं भूयात्। ओं क्रतोस्मर कृतं स्मर॥

कृतब्रह्मोपासनस्य योगिनः शरीरपातोत्तरं यद्भवति तदुक्तम् अत्र। वायुः अनिलं भवति, प्रकृतिमापद्यते, अमृतं परां ब्रह्म सम्पद्यते। वायुग्रहणं सप्तदशकलिङ्गोपलक्षणार्थम्। एकादश इन्द्रियाणि, पञ्च महाभूतानि, जीवात्मा एकः। स्थूलशरीरं भस्म एव भवति। ओम् इति ब्रह्मणः नाम प्रतीकं वा। हे क्रतो स्मर, यन्मम कृते कर्तव्यं तत् स्मर। प्रत्युपकारस्य कालः आगतः तत् स्मर इत्यर्थः। अस्मै को वा लोकः देयः इति हे अग्ने स्मर। कृतं स्मर। बाल्यात् प्रभृति मया अनुष्ठितं कर्म स्मर इत्यर्थः।

**अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।**

**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥ १६॥**

**अन्वयः -** अग्ने अस्मान् राये सुपथा नय। देव विश्वानि वयुनानि विद्वान् अस्मत् जुहुराणाम् एनः युयोधि ते भूयिष्ठां नम विधेम॥

हे अग्ने अस्मान् सुपथा शोभनेन मार्गेण देवयानेन नय। किमर्थम् ? राये धनाय, मुक्तिलक्षणाय धनाय। हे देव अग्ने त्वं विश्वानि सर्वाणि वयुनानि कर्माणि प्रज्ञानानि वा विद्वान् जानन्। जुहुराणं कुटिलं प्रतिबन्धकम् एनं पापम् अस्मत् अस्माकं सकाशात् युयोधि पृथक् कुरु वियोजय। ततो विशुद्धा वयं ते तुभ्यं नम उक्तिं नमस्कारवचनं विधेम कुर्याम।

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**

**योऽसावादित्ये पुरुषः सोऽसावहम्। ओम् खम् ब्रह्म॥ १७॥**

**अन्वयः -** हिरण्मयेन पात्रेण सत्यस्य मुखम् अपिहितम् (अस्ति)। पूषन् तत् सत्यधर्माय दृष्टये त्वम् अपावृणु॥

आदित्योपासना अत्र उल्लिखिता अस्ति। हिरण्मयेन हिरण्यवर्णेन तेजोरूपेण, ज्योतीरूपेण वा। पिबन्ति यत्र स्थिता रश्मयः रसान् इति पात्रं मण्डलम्। तेजोरूपेण मण्डलेन सत्यस्य आदित्यमण्डलस्थस्य अविनाशिनः पुरुषस्य (पुरि शेते अथवा पूर्णमनेन जगत्सर्वम् इति) मुखम् अग्रभागः शरीरम् इति यावत्। यः असौ प्रत्यक्षः आदित्यमण्डलस्थः पुरुषः सः अहमस्मि इति उपासनां कुर्यात्।

ओमिति नामनिर्देशो ब्रह्मणः। खं ब्रह्मेति आकाशरूपम् अन्ते ध्यायेत्।

# शब्दार्थाः

| | |
|---|---|
| ईशावास्यम् | ईश्वरेण व्याप्तम् |
| त्यक्तेन | त्यागभावेन |
| भुञ्जीथाः | भोगं कुर्वीथाः |
| जगत् | गच्छति इति जगत्। सततं परिवर्तमानः प्रपञ्चः। |
| मा गृधः | आकाङ्क्षारहितः |
| प्रेत्य | मरणं प्राप्य |
| जिजीविषेत् | जीवितुमिच्छेत् |
| असुर्याः | प्रकाशहीनाः |
| आत्महनः | आत्मानं ये घ्नन्ति |
| अनेजत् | क्रियारहितः |
| न आप्नुवत् | न अलभत |
| अर्षत् | गच्छत् |
| एजति | कम्पते/गच्छति |
| मातरिश्वा | प्राणवायुः |
| विचिकित्सति | जिज्ञासते |
| पर्यगात् | परितः अगच्छत् |
| अकायम् | शरीररहितम् |
| अस्नाविरम् | शिरोरहितम् |
| अपापविद्धम् | अधर्मादिवर्जितम् |
| सम्भूतिम् | सर्वजगत्सम्भवकारणं ब्रह्म |
| असम्भूतिम् | पुनर्जन्माभावः |
| विचचक्षिरे | स्पष्टमुपदिष्टवन्तः |

# अभ्यासः

## १. सर्वान् प्रश्नान् समाधत्त -

(क) जगत्यां यत् किञ्च जगदस्ति तत् केन व्याप्तम् ?

(ख) शुद्धान्तःकरणस्य मुक्तिः केन अनुष्ठानेन भवति ?

(ग) विद्यया किं तरति ?

(घ) अमृतं कया अश्नुते ?

(ङ) अन्धन्तमः के प्रविशन्ति ?

## २. पूर्णवाक्येन उत्तरत -

(क) ईशावास्योपनिषद् माध्यन्दिनसंहितायाः कस्मिन्नध्याये विद्यते ?

(ख) शतं समाः कथं जिजीविषेत् ?

(ग) विद्याया अविद्यायाश्च वर्णनं क्वोपलभ्यते ?

(घ) असुर्या नाम ते लोकाः केन आवृताः ?

(ङ) केन पात्रेण सत्यस्य मुखमपिहितम् ?

## ३. रिक्तस्थानं पूरयत -

(क) अन्धं तमः प्रविशन्ति येऽ.................... उपासते।

(ख) विद्यां चा.................... यस्तद्वेदोभयं सह।

(ग) विद्ययाऽ.................... अश्नुते।

(घ) मा गृधः कस्यस्विद् ....................।

(ङ) असूर्या नाम ते लोका .................... वृताः।

## ४. समुचितं मेलयत -

| | | |
|---|---|---|
| (क) | ईशावास्यमिदम् | भोगं कुर्वीथाः |
| (ख) | अमृतमश्नुते | स्पष्टमुपदिष्टवन्तः |
| (ग) | जिजीविषेच्छतं समाः | विद्यया |
| (घ) | अन्धं तमः प्रविशन्ति | जगत् |
| (ङ) | विचचक्षिरे | येऽसम्भूतिमुपासते |
| (च) | भुञ्जीथाः | कुर्वन्नेवेह कर्माणि |

## ५. अधोलिखितानां पदानां ससूत्रं सन्धिविच्छेदं कुरुत -

| | | सन्धिविच्छेदः | सूत्रम् |
|---|---|---|---|
| (क) | कुर्वन्नेवेह | ........... + ........... | .................. |
| (ख) | तांस्ते | ........... + ........... | .................. |
| (ग) | नैनद्दे | ........... + ........... | .................. |
| (घ) | चात्महनः | ........... + ........... | .................. |
| (ङ) | तद्वन्तिके | ........... + ........... | .................. |
| (च) | ततो न | ........... + ........... | .................. |
| (छ) | नान्यथेतोऽस्ति | ........... + ........... | .................. |

## ६. उचितपदैः रिक्तस्थानानि पूरयत -

(क) ................. अमृतमश्नुते। (विद्याम्/विद्यया)

(ख) येऽविद्याम् .................। (उपासते/उपासन्ते)

(ग) हिरण्मयेन ............सत्यस्यापिहितं मुखम्। (पात्रेण/पात्रे)

(घ) ...............त्यक्तेन भुञ्जीथाः। (तस्मै/तेन)

(ङ) ............... जिजीविषेच्छतं समाः। (कुर्वन्नेवेह/कुर्वतेवेह)

## ७. अधोलिखितानि पदान्याश्रित्य वाक्यरचना क्रियताम् -

| | | |
|---|---|---|
| (क) | समाः | .............. .............. .............. |
| (ख) | ईशावास्यमिदम् | .............. .............. .............. |
| (ग) | अविद्यया | .............. .............. .............. |
| (घ) | धीराणाम् | .............. .............. .............. |
| (ङ) | विचचक्षिरे | .............. .............. .............. |
| (च) | उपासते | .............. .............. .............. |
| (छ) | अर्षत् | .............. .............. .............. |
| (ज) | अभिगच्छन्ति | .............. .............. .............. |
| (झ) | असुर्याः | .............. .............. .............. |
| (ञ) | पर्यगात् | .............. .............. .............. |

८. **अधोलिखितवाक्येभ्यः समस्तपदं चित्वा विग्रहपूर्वकं समासं निर्दिशत -**

(क) ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।

(ख) तांस्ते प्रेत्याभिगच्छन्ति।

(ग) अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।

(घ) सर्वभूतेषु चात्मानं ततो न विचिकित्सति।

(ङ) अग्ने ! नय सुपथा राये अस्मान्।

९. **विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सः............॥ मन्त्रं पूरयित्वा तस्य भावार्थं स्पष्टयत।**

१०. **अधोलिखितस्य उपनिषन्मन्त्रस्य अन्वयः क्रियताम् -**

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥

## योग्यता-विस्तारः

निखिलेऽस्मिन् जगति ज्ञानस्य मूलं वेदराशिरिति मनीषिणः आचक्षते। तादृशवेदस्य तत्त्वम् उपनिषत्सु निहितमस्ति। उपनिषदां ब्रह्मविद्या ज्ञानकाण्डं ब्रह्मसूत्रं वेदान्तः इत्यपि नामानि वर्तन्ते। उप-नि इत्युपसर्गपूर्वकात् "षद्लृ विशरणगत्यवसादनेषु" इत्यस्माद्धातोः क्विपि प्रत्यये उपनिषत्-शब्दो निष्पन्नः। येन अज्ञानस्य विनाशो भवति, आत्मनो ज्ञानं वरीवृध्यते। मायारूपसंसारस्य दुःखं शिथिलीभवति, तादृशो ज्ञानराशिरुपनिषच्छब्देन अभिधीयते। उपगुरूपविश्याध्यात्मिकीविद्याग्रहणं भवतीति कारणाद् उपनिषद् इति शब्दः सार्थको भवति।

प्रमुखासु अष्टोत्तरशते (१०८) उपनिषत्स्वपि एकादश उपनिषदः अतीवमहत्त्वपूर्णाः महनीयाश्च सन्ति। ता यथा - ईश-केन-कठ-प्रश्न-मुण्डक-माण्डुक्य-ऐतरेय-तैत्तिरीय-छान्दोग्य-बृहदारण्यक-श्वेताश्वतराख्या उपनिषदः।

आदिमायाम् ईशावास्योपनिषदि ईश्वराधीनं जगतसर्वम् इति प्रतिपाद्य भगवदर्पणमत्या भोग उपदिश्यते। उपनिषदि जगत्यां जगत् इति वचनेन समग्रब्रह्माण्डस्य या गत्यात्मकता निरूपिता सा आधुनिकगवेषणाभिरपि सत्यापिता। निरन्तरं परिवर्तमाना ब्रह्माण्डगता चलनस्वभावा या सृष्टिः पशूनां प्राणिनां, तेजःपुञ्जानां, नदीनां, तरङ्गानां, वायोर्वा, या च स्थिरत्वेन अवलोक्यमाना सृष्टिः पर्वतानां वृक्षाणां, भवनादीनां वा सा सर्वाऽपि सृष्टिः ईशाधीना सती चलत्स्वभावैव। भगवतो विभूत्या सर्वाऽपि सृष्टिः परिपूर्णा चलत्स्वभावा च शोशुभ्यते। तदुक्तं भगवद्गीतायाम् -

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्॥

वेदानधीत्य धर्मेण राजशास्त्राणि चानघ।
सन्तानादिनी कर्माणि कृत्वा सोमं निषेव्य च॥
पालयित्वा प्रजाः सर्वा धर्मेण वदतांवर।
राजसूयाश्वमेधादीन्मखानन्यांस्तथैव च॥
अर्चयित्वा पितृन् सम्यक् पितृयज्ञैर्यथाविधिः।
देवान्यज्ञैर्ऋषीन्वेदैरर्चयित्वा तु यत्नतः॥

*(शान्तिपर्व. ६३.१६,१७,२०)*

# तृतीयः पाठः

# मेघदूतम्

संस्कृतकाव्यस्योदयः विकासश्च राज्ञां प्रासादे आश्रये वाऽभूत्, राज्ञा विक्रमादित्येन विना कालिदासस्य, हर्षवर्धनाद् ऋते बाणभट्टस्य प्रसिद्धिर्नासीत्। संस्कृतगद्यकाव्यम्,पद्यकाव्यम्, पुराणम्, रामायणम्, महाभारतञ्च मूलाधारस्वरूपं विद्यते। यद्यपि वेदेषु ऋचः संहितारूपेण दरीदृश्यन्ते तथापि परोक्षभावेन काव्यबीजत्वं भजन्ते। परन्तु रामायणमहाभारतादीनि तु प्रत्यक्षभावेनैव काव्यस्य बीजानि वक्तुं शक्यन्ते।

महाकविः कालिदासो पूर्वमेघः, उत्तरमेघः इति खण्डद्वयात्मकं गीतिकाव्यं मेघदूतं प्रणिनाय। मेघ एव दूतः यस्मिन् तद् मेघदूतं काव्यम् इति। महाकविकालिदासस्य कालनिर्धारणं निश्चितं नास्ति। तथाऽपि ख्रीस्तपूर्वप्रथमशताब्दौ स्वीक्रियते। यतोहि महाकविः स्वविषये किमपि नोल्लिखितवान्। कालिदासस्य जन्मस्थानं क्व इति विषयेऽपि महान् मतभेदो दरीदृश्यते। महाकविः कालिदासः ब्राह्मणवंशे जनिं लेभे। खण्डकाव्येऽस्मिन् उज्जयीन्याः प्रासादादीनां, नदीनां, तुङ्गगिरीणाञ्च वर्णनम् अत्यन्तं सुमधुरं मनोहारि च विद्यते। अतः महाकवेः निवासस्थानं उज्जयिनीति मन्वते।

खण्डकाव्येऽस्मिन् पूर्वमेघे (६३) उत्तरमेघे (५२) आहत्य पञ्चदशोत्तरैकशतम् (११५)। मल्लिनाथमते एकविंशत्यधिकैकशतम् (१२१) पद्यात्मकोऽयं मेघदूतग्रन्थः किमप्यव्यक्तम् आल्हादकतत्त्वमभिसिञ्चति। कवेः रागात्मिका वृत्तिरेव गीतिकाव्यस्य जननी विद्यते। मानवमनोविज्ञानं, संस्कृतिसौन्दर्यचेतना, प्रकृतिप्रेम, लोकरागप्रेमामृतसाधना इत्यादिभिः कविकल्पनाविलासादिभिर्गुणैः "मेघदूतखण्डकाव्यम्" गीतिकाव्यानां चूडामणिरिव विराजते। समग्रे मेघदूते मान्दाक्रान्ता छन्दः, वैदर्भी रीतिः, विप्रलम्भश्रृङ्गारश्च विद्यते । अतः विद्वद्भिरुच्यते यत् **माघे मेघे गतं वयः** इति। खण्डकाव्यस्यास्योपजीव्यं ब्रह्मवैवर्त-पुराणमस्ति। दूतस्य कल्पना वाल्मीकिरामायणात् स्वीकृताऽस्ति। काव्यजगत्यस्मिन् कविरेव प्रजापतेः भूमिकां निर्वहति। तस्मै विश्वं यथा रोचते तादृशं वर्णयति। तथा चोक्तम् -

**अपारे काव्यसंसारे कविरेव प्रजापतिः।**
**यथास्मै रोचते विश्वं तथैव परिकल्पते॥**

पाठेऽस्मिन् केषाञ्चन श्लोकानां सङ्ग्रहः कृतोऽस्ति। तद्यथा -

**कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः**

**शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।**

**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**

**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥१॥**

**अन्वयः** - स्वाधिकारात् प्रमत्तः कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः शापेन अस्तङ्गमित-महिमा कश्चित् यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धच्छाया तरुषु रामगिर्याश्रमेषु वसतिं चक्रे।

**तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी**

**नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।**

**आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं**

**वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥२॥**

**अन्वयः** - तस्मिन्नद्रौ अबलाविप्रयुक्तः कनकवलयभ्रंशरिक्तप्रकोष्ठः कामी स कतिचित् मासान् नीत्वा आषाढस्य प्रथमदिवसे आश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं मेघं ददर्श।

**तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो**

**रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ।**

**मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेतः**

**कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे॥३॥**

**अन्वयः** - राजराजस्य अनुचरः अन्तर्बाष्पः (सन्) कौतुकाधानहेतोः तस्य पुरः कथमपि स्थित्वा चिरं दध्यौ। मेघालोके सुखिनः अपि चेतः अन्यथा वृत्तिः भवति, कण्ठाश्लेषप्रणयिनि दूरसंस्थे जने किं पुनः।

**प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी**

**जीमूतेन स्वकुशलमयीं हरयिष्यन् प्रवृत्तिम्।**

**स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै**

**प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार॥४॥**

**अन्वयः** - नभसि प्रत्यासन्ने दयिताजीवितालम्बनार्थी जीमूतेन स्वकुशलमयीं प्रवृत्तिं हरयिष्यन् (सः) प्रीतः (सन्) प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतिप्रमुखवचनं स्वागतं व्याजहार।

**धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः**

**सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे**
**कामार्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु ॥५॥**

**अन्वयः** - धूमज्योतिः सलिलमरुतां सन्निपातः मेघः क्व ? पटुकरणैः प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व ? इति औत्सुक्यात् अपरिगणयन् गुह्यकः तं ययाचे, हि कामार्ताः चेतनाऽचेतनेषु प्रकृतिकृपणाः।

**जातं वंशे भुवनविदिते पुष्करावर्तकानाम्**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वयि विधिवशात् दूरबन्धुर्गतोऽहम्**
**याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा॥६॥**

**अन्वयः** - (हे मेघ) त्वां भुवनविदिते पुष्करावर्तकानां वंशे जातम्, मघोनः कामरूपं प्रकृतिपुरुषं (अहं) जानामि, तेन विधिवशात् दूरबन्धुः अहं त्वयि अर्थित्वं गतः (अस्ति), (हि) अधिगुणे मोघा (अपि) याञ्चा वरम्, (किन्तु) अधमे लब्धकामा (अपि) न (वरम्)।

**सन्तप्तानां त्वमसि शरणं तत्पयोद ! प्रियायाः,**
**सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।**
**गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां**
**बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥७॥**

**अन्वयः** - हे पयोद ! त्वं सन्तप्तानां शरणमसि, तत् धनपतिक्रोधविश्लेषितस्य मे सन्देशं प्रियायाः हर। ते बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या अलका नाम यक्षेश्वराणां वसतिः गन्तव्या (अस्ति)।

**त्वमारूढं पवनपदवीमुद्गृहीतालकान्ताः**
**प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः।**
**कः सनद्धे विरहविधुरां त्वय्युपेक्षेत जायां**
**न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः॥८॥**

**अन्वयः** - पवनपदवीम् आरूढं त्वां प्रत्ययात् आश्वसत्यः उद्गृहीतालकान्ताः पथिकवनिताः प्रेक्षिष्यन्ते, त्वयि सन्नद्धे (सति) विरहविधुरां जायां कः उपेक्षेत, अन्यः अपि यः जनः अहमिव पराधीनवृत्तिः न स्यात्।

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि॥९॥

**अन्वयः** - (हे मेघ) दिवसगणनातत्पराम् (अत एव) अव्यापन्नां ताम् एकपत्नीं भ्रातृजायां च अविहतगतिः (त्वम्) अवश्यं द्रक्ष्यसि। हि आशाबन्धः अङ्गनानां कुसुमसदृशं (अत एव) विप्रयोगे सद्यःपाति प्रणयिहृदयं प्रायशो रुणद्धि।

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्,
वामश्चायं नदति मधुरं चातकस्ते सगन्धः।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः॥१०॥

**अन्वयः** - अनुकूलः पवनः त्वां मन्दं मन्दं यथा नुदति, ते वामः अयं सगन्धः चातकः च मधुरं नदति नूनं गर्भाधानक्षणपरिचयात् खे आबद्धमालाः बलाकाः नयनसुभगं भवन्तं सेविष्यन्ते।

कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामबन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।
आकैलासाद् विसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः॥११॥

**अन्वयः** - यत् च महीम् उच्छिलीन्ध्राम् अबन्ध्यां कर्तुं प्रभवति, तत् श्रवणसुभगं ते गर्जितं श्रुत्वा मानसोत्काः विसकिसलच्छेदपाथेयवन्तः राजहंसाः नभसि आकैलासाद् भवतः सहायाः सम्पत्स्यन्ते।

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानाम्
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥२८॥

**अन्वयः** - यदपि उत्तराशां प्रस्थितस्य भगवतः पन्थाः वक्रः (तथापि) उज्जयिन्याः सौधोत्सङ्गप्रणयविमुखः मास्म भूः। तत्र पौराङ्गनानां विद्युद्दामस्फुरितचकितैः लोलापाङ्गैः लोचनैः न रमसे यदि वञ्चितोऽसि।

**वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः**
**संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।**
**निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य**
**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥२९॥**

**अन्वयः** - वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः स्खलितसुभगं संसर्पन्त्याः दर्शितावर्तनाभेः निर्विन्ध्यायाः पथि सन्निपत्य रसाभ्यन्तरः भव, हि स्त्रीणां प्रियेषु विभ्रमः आद्यं प्रणयवचनं भवति।

## शब्दार्थाः

| | |
|---|---|
| स्वाधिकारात् | आत्मकर्त्तव्यात् |
| अस्तङ्गमितमहिमा | विनाशितदिव्यसामर्थ्यम् |
| जनकतनयास्नानपुण्योदकेषु | सीताकृतस्नानपवित्रजलेषु |
| स्निग्धच्छायातरुषु | घनीभूतच्छायावृक्षेषु |
| कौतुकाधानहेतोः | अभिलाषोत्पादकारणस्य |
| प्रत्यासन्ने | आषाढस्यानन्तरं सन्निकृष्टे प्राप्ते सतीत्यर्थः |
| दयिताजीवितालम्बनार्थी | प्रियतमायाः जीवनस्य अभिलाषी |
| जीमूतेन | मेघेन |
| प्रत्यग्रैः | अभिनवैः |
| कुटजकुसुमैः | पार्वतपुष्पैः |
| कल्पितार्घाय | कल्पितोऽनुष्ठितोऽर्घः पूजाविधिः यस्मै |
| व्याजहार | व्याहृतवान् |
| पटुकरणैः | समर्थेन्द्रियैः |
| गुह्यकः | यक्षः |
| पुष्करावर्तकानाम् | मेघानाम् |
| प्रकृतिकृपणाः | स्वभावदीनाः |
| पवनपदवी | आकाशः |
| आश्वसत्यः | धैर्यधारणं कुर्वत्यः |
| उद्गृहीतालकान्ताः | ऊर्ध्वं नीता अलकान्ताः कुटिलकेशप्रान्ता याभिः ताः |

| | |
|---|---|
| विरहविधुरा | विरहेण व्याकुला जाया |
| एकपत्नीम् | पतिव्रता |
| अङ्गनानाम् | स्त्रीणाम् |
| मानसोत्काः | मानसरोवरं गन्तुम् उत्कण्ठिताः |
| सौधोत्सङ्गप्रणयविमुखः | धवलगृहाणां विटङ्कप्रदेशः तत्र प्रणयः, तत्र प्राङ्मुखः |
| संसर्पन्त्याः | गच्छन्त्याः |
| दर्शितावर्तनाभेः | दर्शितः प्रकटित आवर्तोऽम्भसां भ्रम एव नाभिर्यया |
| निर्विन्ध्यायाः | निष्क्रान्ता विन्ध्यान्निर्विन्ध्या नाम नदी, तस्याः |

## अभ्यासः

१. **वस्तुनिष्ठात्मकप्रश्नाः -**

(क) यक्षः कियत् कालपर्यन्तं शप्तः आसीत् ?

(अ) एकवर्षपर्यन्तम् (आ) द्विवर्षपर्यन्तम्
(इ) षड्मासपर्यन्तम् (ई) त्रिमासपर्यन्तम्

(ख) शापकाले यक्षः कुत्र वसतिं चक्रे ?

(अ) वाल्मीकि-आश्रमेषु (आ) रामगिर्याश्रमेषु
(इ) जाबाल्याश्रमेषु (ई) कण्वाश्रमेषु

(ग) मेघः कस्य अनुचरः ?

(क) कुबेरस्य (ख) वाल्मीकेः
(ग) इन्द्रस्य (घ) यक्षस्य

(घ) गुह्यकः कं ययाचे ?

(अ) कुबेरम् (आ) मेघम्
(इ) इन्द्रम् (ई) कृष्णम्

(ङ) धूमज्योतिः सलिलमरुतां सन्निपातः कः ?

(अ) अग्निः (आ) वायुः
(इ) मेघः (ई) जलम्

(च) स्वकुशलमयीं प्रवृत्तिं केन हारयिष्यन् ?

(अ) इन्द्रेण (आ) कुबेरेण

(इ) बलरामेण (ई) जीमूतेन

## २. रिक्तस्थानानि पूरयत -

(क) याञ्चा मेघा ............................ लब्धकामा।

(ख) वप्रक्रीडापरिणतगज ................................।

(ग) धूमज्योतिः .................................... क्व मेघः।

(घ) .................................... स्वागतं व्याजहार।

(ङ) .................................. राजहंसाः सहायाः।

(च) लोलापङ्गैर्यदि .......................................।

## ३. सर्वे प्रश्नाः समाधेयाः -

(क) आषाढस्य प्रथमदिवसे यक्षः कीदृशं मेघं ददर्श ?

(ख) राजराजस्य अनुचरः कः ?

(ग) यक्षः कुत्र निवसति ?

(घ) गुह्यकः कथं ययाचे ?

(ङ) मेघदूतस्य रचयिता कः ?

(च) चेतनाऽचेतनेषु के प्रकृतकृपणाः ?

## ४. अधोलिखितानां पदानां सन्धिविच्छेदपुरस्सरं सन्धिसूत्राणि लिखत -

| | सन्धिविच्छेदः | सूत्रम् |
|---|---|---|
| (क) रामगिर्याश्रमेषु | ............... + ................ | .................. |
| (ख) स्वाधिकारात् | ............... + ................ | .................. |
| (ग) गुह्यकस्तम् | ............... + ................ | .................. |
| (घ) इत्यौत्सुक्यात् | ............... + ................ | .................. |
| (ङ) मेघालोके | ............... + ................ | .................. |
| (च) व्याजहार | ............... + ................ | .................. |
| (छ) पुण्योदकेषु | ............... + ................ | .................. |

### ५. अधोलिखितानां पदानां प्रकृति-प्रत्ययौ विभजत -

| | | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | स्थित्वा | ............... | ............... |
| (ख) | स्थातव्यम् | ............... | ............... |
| (ग) | नीत्वा | ............... | ............... |
| (घ) | प्रेक्षणीयः | ............... | ............... |
| (ङ) | जातम् | ............... | ............... |
| (च) | प्रापणीयः | ............... | ............... |
| (छ) | गतः | ............... | ............... |
| (ज) | गन्तव्या | ............... | ............... |
| (झ) | कर्तुम् | ............... | ............... |
| (ञ) | भर्ता | ............... | ............... |

### ६. अधोलिखितानां पदानां विग्रहपूर्वकं समासं निर्दिशत -

| | | विग्रहः | समासः |
|---|---|---|---|
| (क) | कान्ताविरहगुरुणा | ............... | ............... ............... |
| (ख) | धूमज्योतिःसलिलमरुतः | ............... | ............... ............... |
| (ग) | स्वाधिकारात् | ............... | ............... ............... |
| (घ) | मेघालोके | ............... | ............... ............... |
| (ङ) | यक्षेश्वराणाम् | ............... | ............... ............... |
| (च) | अस्तङ्गमितमहिमा | ............... | ............... ............... |
| (छ) | राजहंसाः | ............... | ............... ............... |
| (ज) | कामार्ताः | ............... | ............... ............... |
| (झ) | प्रकृतिकृपणाः | ............... | ............... .............. |

### ७. अधोलिखितानां पदानां धातुलकारपुरुषवचनानि लिखत।

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| १. चक्रे | ............... | ............... | ............... | ............... |

| | | | | |
|---|---|---|---|---|
| २. ददर्श | ............... | ............... | ............... | ............... |
| ३. दध्यौ | ............... | ............... | ............... | ............... |
| ४. व्याजहार | ............... | ............... | ............... | ............... |
| ५. ययाचे | ............... | ............... | ............... | ............... |
| ६. रुणद्धि | ............... | ............... | ............... | ............... |
| ७. द्रक्ष्यसि | ............... | ............... | ............... | ............... |

## ८. अधोलिखितानां पदानां लिङ्गविभक्तिवचनानि लिखत -

| पदम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| १. भर्तुः | ............... | ............... | ............... |
| २. प्रणयि | ............... | ............... | ............... |
| ३. अद्रौ | ............... | ............... | ............... |
| ४. अङ्गनानाम् | ............... | ............... | ............... |
| ५. कामी | ............... | ............... | ............... |
| ६. चेतः | ............... | ............... | ............... |
| ७. त्वयि | ............... | ............... | ............... |

## ९. प्रयोगपरिवर्तनं कुरुत -

(क) भवन्तं बलाकाः सेविष्यन्ते।

(ख) नदति मधुरं चातकस्ते।

(ग) राजहंसाः नभसि भवतः सहायाः सम्पत्स्यन्ते।

(घ) प्रणयिहृदयं विप्रयोगे रुणद्धि।

(ङ) गुह्यकस्तं ययाचे।

## १०. अधोलिखितश्लोकयोः भावार्थं संस्कृतभाषया विवृणुत -

(क) कश्चित्कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

(ख) वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां

सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानाम्
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥

११. मन्दाक्रान्ताच्छन्दसो लक्षणमुदाहरणञ्च विलिखत।

## योग्यता-विस्तारः

मेघदूतखण्डकाव्ये समागतानां सूक्तीनां सङ्ग्रहः। तद्यथा -

१. कामार्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु।
२. याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा।
३. प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।
४. रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय।
५. स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु।
६. शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः।
७. मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः।
८. आपन्नार्तिप्रशमनफलः सम्पदो ह्युत्तमानाम्।
९. के वा न स्युः परिभवपदं निष्फलरम्भयत्नाः।
१०. आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
११. सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि॥
१२. न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
१३. प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।
१४. सूर्यापाये न खलु कमलं पुष्यति स्वमभिख्याम्।
१५. प्रायः सर्वो भवति करुणा वृत्तिरार्द्रान्तरात्मा।
१६. कान्तोदन्तः सुहृदुपगतः सङ्गमात्किञ्चिदूनः।
१६. नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।

हस्ते लीलाकमलमलके बालकुन्दानुविद्धम् नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्॥
यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पाः हंसश्रेणीरचितरशना नित्यपद्मा नलिन्य।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा नित्यज्योत्स्ना प्रतिहततमोवृत्तिरम्याः प्रदोषाः॥

कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव॥

# चतुर्थः पाठः

# माता भूमिः पुत्रोऽहं पृथिव्याः

महान् शब्दराशिः वेदः भगवतः श्वासनिःश्वासरूप इति साक्षात्कृतधर्माणः मनीषिणः ऋषयः आमनन्ति। महर्षिः भगवान् वेदव्यासः एकधा विलसन्तं तं वेदं विभज्य पैल-वैशम्पायन-जैमिनि-सुमन्तुभ्यः शिष्येभ्यः क्रमेण ऋग्यजुस्सामाथर्ववेदान् उपदिदेश। ते अनूचानाः ऋषयः शिष्याः तान् चतुरो वेदान् शिष्येभ्यः उपदिदिशुः। ततो वेदशाखा-परम्परा प्रववृते। वेदात् एव सर्वाः विद्याः भारते प्रवृत्ताः, विद्यास्थानानि च वेदमूलकानि एव सन्ति, सर्वाणि आस्तिकदर्शनानि वेदमेव प्रमाणत्वेन भजन्ते।

वेदेषु अनेकानि ऋषिदृष्टानि सूक्तानि सन्ति येषु भगवतः दिव्या वाणी लोकभावनामयी स्वयं सम्प्रकाशिता विलसति। प्रसिद्धा तादृशी लोकभावनामयी वाणी अथर्ववेदसंहितायाः भूमिसूक्ते ऋषिणा दृष्टा।

अथर्ववेदसंहितायाः द्वादशकाण्डस्य प्रथमं सूक्तं भूमिसूक्तनाम्ना प्रसिद्धम्, अत्र त्रिषष्टिः (६३) मन्त्राः सन्ति। अस्य अथर्वा ऋषिः, भूमिः पृथिवी वा देवता। स अथर्वा ऋषिः सूक्तेऽस्मिन् पृथिव्याः समग्रं सर्वतोमुखं च रूपं विस्तरेण अपश्यत्। इह पृथिव्याः निसर्गवर्णनम् अस्ति। अत्र केचन एव मन्त्राः परिचयार्थं समुल्लिखिताः। ते इत्थम्-

**सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।**
**सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥१॥**

**अन्वयः** - बृहत् सत्यं, ऋतम्, दीक्षा, उग्रं तपः, ब्रह्म, यज्ञः (च) पृथिवीं धारयन्ति। सा भूतस्य भव्यस्य पत्नी पृथिवी नः उरुं लोकं कृणोतु॥

**सरलार्थः** - बृहत् सत्यं, ऋतम् उग्रं, दीक्षा, तपः, ब्रह्म, यज्ञश्च पृथिवीं सम्यक् धारयन्तः सन्ति। भूतस्य अतीतस्य, भव्यस्य भविष्यत्कालिकानां वा पालयित्री पृथिवी अस्माकं समेषां कृते विस्तृतं महान्तं लोकम् आवासस्थानं ददातु।

**असम्बाधं बध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु।**
**नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ॥२॥**

**अन्वयः** - यस्या मानवानां मध्यतः उद्वतः प्रवतः समं बहु असंबाधं या नानावीर्या ओषधीः बिभर्ति (सा) पृथिवी नः प्रथताम्, नः राध्यताम् ॥

**सरलार्थः** - या मध्यतः, उड्डयमानस्य, कम्पतः च जनस्य बाधाभिः रहिता अस्ति, या भूमिः नानाप्रभावपूर्णाः ओषधीः, वृक्षान्, वनस्पतिविशेषान् च धारयति, सा पृथिवी अस्माकं कृते सुविस्तीर्णा भवतु, अस्माकं कृते सिद्धिदा शोभिता च भवतु।

**यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः ।**

**यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः पूर्वपेये दधातु ॥३॥**

**अन्वयः** - यस्यां समुद्रः सिन्धुः उत आपः (सन्ति) यस्यां कृष्टयः अन्नं संबभूवुः यस्याम् इदं प्राणत् एजत् जिन्वति सा भूमिः नः पूर्वपेये दधातु॥

**सरलार्थः** - यत्र जनानां मनसः संमोदकः समुद्रः, आनन्ददाः नद्यः च जलपूर्णानि सन्ति, यत्र कर्षणात् स्वयम् अन्नं समुत्पादयन्ति मानवाः, यत्र प्राणिनः आनन्देन जीवन्ति, सा भूमिः अस्मान् आनन्दयतु निरन्तरम्।

**यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः ।**

**या बिभर्ति बहुधा प्राणदेजत्सा नो भूमिर्गोष्वप्यन्ने दधातु ॥४॥**

**अन्वयः** - यस्याः पृथिव्याः चतस्रः प्रदिशः (सन्ति), यस्याम् अन्नं कृष्टयः संबभूवुः, या प्राणत् एजत् बहुधा बिभर्ति सा भूमिः नः गोषु अपि अन्ने दधातु॥

**सरलार्थः** - यस्याः पृथिव्याः चतस्रः अवान्तरदिशः प्रदिशः सन्ति, यस्यां पृथिव्यां स्वयमेव अनायासेन कृषिः संपद्यते, या च पृथिवी प्राणिनः आनन्दयति, बिभर्ति धारयति च, सा पृथिवी अस्माकं गोधनानि, सस्यानि च वर्धयताम्।

**यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन्।**

**गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु ॥५॥**

**अन्वयः** - यस्यां पूर्वे पूर्वजनाः विचक्रिरे यस्यां देवाः असुरान् अभ्यवर्तयन् (या) गवाम् अश्वानां वयसः च विष्ठा (सा) पृथिवी नः भगं वर्चः दधातु॥

**सरलार्थः** - यस्यां पृथिव्याम् अस्माकं पूर्वजाः नानाकार्याणि चक्रुः, यस्यां पृथिव्यां देवाः असुरान् पराजयन्त, या पृथिवी गवाम्, अश्वानां, पक्षिणां च आवासरूपा, सा पृथिवी अस्मभ्यं षड्विधम् ऐश्वर्यं तेजश्च प्रयच्छतु।

**विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी।**

**वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु ॥६॥**

**अन्वयः** - विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतः निवेशनी, इन्द्रऋषभा भूमिः वैश्वानरम् अग्निं बिभ्रती नः द्रविणे दधातु॥

**सरलार्थः** - विश्वस्य भरणं पोषणं च कुर्वती, वसुनः धनविशेषस्य धारिणी, प्रकृष्टम् अचलम् आश्रयस्थानम्, मध्ये सुवर्णस्य विशिष्टस्य कान्तिमतः लोहस्य धारिणी, जगतः निवासभूमिः, अथवा यस्याः पृथिव्याः गोः इन्द्रः ऋषभसदृशः विराजते, सा पृथिवी वैश्वानरनामानम् अग्निं धारयन्ती अस्मभ्यं सम्पदं प्रददातु।

**यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम्।**
**सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा॥७॥**

**अन्वयः** - यां पृथिवीं भूमिम् अस्वप्नाः देवाः विश्वदानीम् अप्रमादं रक्षन्ति सा (पृथिवी) नः प्रियं मधु दुहाम्। अथो वर्चसा उक्षतु॥

**सरलार्थः** - निर्निमेषाः देवाः विश्वस्य धारणसमर्थां पृथिवीं रक्षन्ति सा पृथिवी नः मधु ददातु, प्रयच्छतु, किञ्च प्रकाशं च सर्वत्र विस्तारयतु।

**यार्णवेऽधि सलिलमग्र आसीद् यां मायाभिरन्वचरन् मनीषिणः ।**
**यस्या हृदयं परमे व्योऽमन्त्सत्येनावृतममृतं पृथिव्याः**
**सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे॥८॥**

**अन्वयः** - या अग्रे अर्णवे सलिलम् अधि आसीत् यां मनीषिणः मायाभिः अन्वचरन्, यस्याः पृथिव्याः सत्येन आवृतम्, अमृतं हृदयं परमे व्योमन् सा भूमिः नः बलं उत्तमे राष्ट्रे दधातु॥

**सरलार्थः** - या पृथिवी पूर्वं जलराशौ समुद्रे आसीत्, मनीषिणः यां विचिन्त्य अनुसन्धाय प्राप्नुवन्, यस्याः पृथिव्याः रहस्यं सत्येनावृतम् अस्ति, सा पृथिवी अस्माकं शक्तेः वर्धनं करोतु।

**यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति।**
**सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा॥९॥**

**अन्वयः** - यस्यां परिचराः आपः समानी अहोरात्रे अप्रमादं क्षरन्ति, भूरिधारा सा भूमिः नः पयः दुहाम् अथो वर्चसा॥

**सरलार्थः** - यस्याः पृथिव्याः चतसृषु दिक्षु अपि जलानि सन्ति, दिवसे रात्रौ च बाधाराहित्येन निरन्तरं जलं प्रवहति। बह्वीभिः धाराभिः सम्पन्ना पृथिवी अस्मभ्यं मधुरं जलं प्रयच्छतु। पृथिवी सा कामधेनुरूपा मनःकामनाः दोग्धु, किञ्च तेजसा च अभिषिञ्चतु।

**यामश्विनावमिमातां विष्णुर्यस्यां विचक्रमे।**
**इन्द्रो यां चक्र आत्मनेऽनमित्रां शचीपतिः।**
**सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः॥१०॥**

**अन्वयः** - याम् अश्विनौ अमिमातां यस्यां विष्णुः विचक्रमे, शचीपतिः इन्द्रः याम् आत्मने अनमित्रां चक्रे, नः सा भूमिः माता, पुत्राय मे पयः विसृजताम्॥

**सरलार्थः** - अश्विनौ देवौ यस्याः पृथिव्याः परिमाणस्य मानं चक्रतुः, यस्यां विष्णुः त्रिपदक्षेपेण पादन्यासं चकार, इन्द्रः यां पृथिवीं शत्रुरहितां चकार, सा पृथिवी माता ममत्वयुता अस्माकं कृते दुग्धं प्रयच्छतु।

**गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्योनमस्तु।**
**बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्।**
**अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम्॥११॥**

**अन्वयः** - पृथिवि ते गिरयः हिमवन्तः पर्वताः, ते अरण्यं स्योनम् अस्तु। बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवाम् इन्द्रगुप्तां भूमिं पृथिवीम् अहम् अजीतः अहतः अधि अस्थाम्॥

**सरलार्थः** - हे पृथिवि! तव गिरयः हिमाच्छन्नाः महान्तः पर्वताश्च विश्वस्य कल्याणकारिणः, अरण्यानि वनानि कल्याणकारीणि सन्तु। पिङ्गलां, कृष्णां रोहिणीं च मृत्तिकां दधती स्थिरा इन्द्रेण गोपिता संरक्षिता सुविस्तृता पृथिवी पराजयरहिता अहिंसिता नाशरहिता सती चिरं प्रतिष्ठताम्।

**यत् ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः।**
**तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः।**
**पर्जन्यः पिता स उ नः पिपर्तु॥१२॥**

**अन्वयः** - पृथिवि! यत् ते मध्यं, यत् नभ्यं च, या ते तन्वः ऊर्जः संबभूवुः तासु नः धेहि, नः अभि पवस्व भूमिः माता, अहं पृथिव्याः पुत्रः, पर्जन्यः पिता, स उ नः पिपर्तु॥

**सरलार्थः** - हे पृथिवि! तव यः धारणसमर्थः मध्यभागः अस्ति, यत् प्राणरक्षकं नाभिक्षेत्रं च यत्, यः तव शरीरात् उत्पन्नः रसः तेषु सर्वेषु अस्मान् धारयतु। अस्मान् पवित्रान् कुरु। मम भूमिः माता अस्ति, अहं पृथिव्याः पुत्रः अस्मि, मम पर्जन्यः पिता अस्ति, सः अस्माकं पालनं पोषणं च करोतु।

**यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः।**
**यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्रा आहुत्याः पुरस्तात्।**

**सा नो भूमिर्वर्धयद् वर्धमाना॥१३॥**

**अन्वयः** - यस्यां भूम्यां वेदिं परिगृह्णन्ति, विश्वकर्माणः यस्यां यज्ञं तन्वते, यस्यां पृथिव्याम् आहुत्याः पुरस्तात् ऊर्ध्वाः शुक्राः स्वरवः मीयन्ते, सा नो भूमिः वर्धमाना नः वर्धयत्॥

**सरलार्थः** - यस्यां पवित्रायां पृथिव्यां देवाः वेदिं निर्मान्ति, यस्यां पृथिव्यां यजन्ते, यस्यां आहुतिपूर्वकं यज्ञीयः यूपः मीयते, सा भूमिः अस्मान् वर्धयताम्।

**त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः।**

**तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो रश्मिभिरातनोति॥१५॥**

**अन्वयः** - त्वत् जाता मर्त्याः त्वयि चरन्ति, त्वं द्विपदः त्वं चतुष्पदः बिभर्षि। पृथिवि इमे मानवाः येभ्यः मर्त्येभ्यः उद्यन् सूर्यः रश्मिभिः अमृतम् आतनोति ॥

**सरलार्थः** - हे मातः पृथिवि ! त्वत्तः जाताः प्राणिनः त्वयि एव विचरन्ति, त्वं द्विपदान् चतुष्पदान् च धारयसि। हे पृथिवि ! त्वं सर्वान् मनुष्यान् रक्षसि। उदयमानः सूर्यः स्वैः किरणैः अमृतसमानं प्रकाशं वितनोति।

**विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्।**

**शिवां स्योनामनु चरेम विश्वहा॥ १७॥**

**अन्वयः** - विश्वस्वं मातरम् ओषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्, शिवां स्योनां विश्वहा अनुचरेम ॥

**सरलार्थः** - प्रपञ्चस्य सर्वस्वभूताम्, ओषधिवनस्पतीनां मातृरूपां, धर्मस्याधारेण स्थिररूपेण धृतां मङ्गलदायिनीं भूमिं पृथिवीं वयम् अनुचरेम।

**अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु।**

**अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः ॥१९ ॥**

**अन्वयः** - अग्निः भूम्याम् ओषधीषु अग्निम्, आपो बिभ्रति, अग्निः अश्मसु, अग्निः अन्तःपुरुषेषु गोषु, अश्वेषु अग्नयः।

**सरलार्थः** - भूमौ, ओषधीषु, अग्निः वर्तते। जलम् अग्निं धारयति। उपलेषु अग्निः वर्तते। मनुष्येषु, गोषु, अश्वेषु अग्निः वर्तते।

**भूम्यां देवेभ्यो ददति यज्ञं हव्यमरंकृतम्।**

**भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः।**

**सा नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु ॥२२ ॥**

**अन्वयः** - भूम्यां देवेभ्यः ददति यज्ञं हव्यम् अरंकृतम्, भूम्यां मनुष्या जीवन्ति स्वधया अन्नेन मर्त्याः सा नो भूमिः प्राणम् आयुः दधातु जरदष्टिं मा पृथिवी कृणोतु।

**सरलार्थः** - भूम्यां देवेभ्यः अरंकृतं यज्ञं हव्यं ददति । स्वधया अन्नेन मर्त्याः भूम्यां मनुष्या जीवन्ति। अस्माकं भूमिः प्राणशक्तिम् आयुः ददातु। तेन जीर्णतां पृथिवी न करोतु।

**ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः।**
**ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहाताम्॥ ३६॥**

**अन्वयः** - हे भूमे ! ग्रीष्मः, वर्षाणि, शरत्, हेमन्तः, शिशिरः, वसन्तः, ते ऋतवः, ते विहिताः हायनीः अहोरात्रे, नः दुहाताम्।

**सरलार्थः**- हे पृथिवि! **षट् ऋतवः** - ग्रीष्मः, वर्षाणि, शरत्, हेमन्तः, शिशिरः, वसन्तः, इति, अहोरात्रम् अस्माकम् अभीष्टानि पूरयन्तु।

**यस्यामन्नं व्रीहियवौ यस्या इमाः पञ्च कृष्टयः।**
**भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे॥ ४२॥**

**अन्वयः** - यस्याम्, अन्नं व्रीहियवौ यस्या इमाः पञ्च कृष्टयः, भूम्यै पर्जन्यपत्न्यै नमः अस्तु वर्षमेदसे ॥

**सरलार्थः**- यस्यां भूमौ अन्नं व्रीहिः यवः च तथा इमाः पञ्च कृष्टयः संभवन्ति , तस्यै वर्षमेदसे वृष्ट्या स्फीतायै भूम्यै पर्जन्यस्य पत्न्यै नमः अस्तु॥

**निधिं बिभ्रती बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु मे।**
**वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना ॥४४ ॥**

**अन्वयः** - निधिं बिभ्रती बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु मे वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना।

**सरलार्थः** - बहुधा गुहासु वसु मणिं हिरण्यं निधिं च बिभ्रती पृथिवी, वसूनि अस्माकं कृते ददातु।

**जनं बिभ्रती वहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्।**
**सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती॥४ ५॥**

**अन्वयः** - वहुधा जनं बिभ्रती विवाचसं नानाधर्माणं पृथिवी यथा ओकसं सहस्रं धारा द्रविणस्य मे दुहां ध्रुवा इव धेनुः अनपस्फुरन्ती।

**सरलार्थः** – ध्रुवं तिष्ठन्ती धेनुः गोदोहनकाले यथा दुग्धधारां प्रयच्छति तथा नानाविचारादिसमर्थान् जनान् बिभ्रती पृथिवी अस्माकं कृते निरन्तरं धनं प्रयच्छतु।

**द्यौश्च म इदं पृथिवी चान्तरिक्षं च मे व्यचः।**

**अग्निः सूर्य आपो मेधां विश्वे देवाश्च सं ददुः॥५३॥**

**अन्वयः** - द्यौः च म इदं पृथिवी च अन्तरिक्षं च मे व्यचः, अग्निः सूर्यः आपः मेधां विश्वे देवाः च संददुः।

**सरलार्थः** - द्यौः पृथिव्याः च मध्ये वयं स्मः। पृथिवी, अन्तरिक्षं, द्यौः अग्निः सूर्यः आपः मेधां विश्वे देवाः च मे शुभं संददुः।

**ये ग्रामा यदरण्यं याः सभा अधि भूम्याम्।**

**ये संग्रामाः समितयस्तेषु चारु वदेम ते॥५६॥**

**अन्वयः** - ग्रामाः यत् अरण्यम्, याः सभाः अधिभूम्याम्, ये संग्रामाः, समितयः, तेषु चारु वदेम ते।

**सरलार्थः** - ये ग्रामाः यत् अरण्यम्, याः सभाः सन्ति भूम्याम्, ये संग्रामाः, समितयः, तेषु वयं पृथिवि ! ते तव विषये समीचीनानि वचनानि वयं वदेम।

**उपस्थास्ते अनमीवा अयक्ष्मा अस्मभ्यं सन्तु पृथिवि प्रसूताः।**

**दीर्घं न आयुः प्रतिबुध्यमाना वयं तुभ्यं बलिहृतः स्याम॥६२॥**

**अन्वयः** - हे पृथिवि ! ते उपस्थाः प्रसूताः अस्मभ्यम् अनमीवाः अयक्ष्माः न सन्तु। आयुः दीर्घं प्रतिबुध्यमानाः वयं तुभ्यं बलिहृतः स्याम॥

**सरलार्थः** - हे पृथिवि ! ते उपास्थाः प्रसूताः भक्षणयोग्याः पदार्थाः अस्मभ्यम् अनमीवाः रोगकारकाः न सन्तु। वयं दीर्घकालं यावत् जीवामः। वयं तुभ्यं बलिप्रदाने समर्थाः स्याम।

**भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम्।**

**संविदाना दिवा कवे श्रियां मा धेहि भूत्याम्॥६३॥**

**अन्वयः** - हे भूमे मातः! मा भद्रया सुप्रतिष्ठितम्, नि धेहि। कवे दिवा संविदाना मा श्रियां भूत्यां धेहि॥

**सरलार्थः** - हे भूमे! मातः ! त्वं मां मङ्गलकरैः शुभाशीर्भिः संवर्धितं कुरु। विविधसम्पत्प्रदानेन संवर्धय माम्। मह्यं श्रियं धेहि।

# शब्दार्थाः

| | |
|---|---|
| बृहद् | प्रभावयुक्तम् |
| ऋतम् | यथार्थज्ञानम् |
| उग्रम् | तेजः |
| दीक्षा | कार्ये दक्षः |
| भूतस्य | प्राचीनकालस्य |
| भव्यस्य | भविष्यत्कालस्य |
| उरूम् | विस्तीर्णम् |
| कृणोतु | करोतु |
| यस्याः | पृथिव्याः |
| बध्यतः | माध्यमेन |
| उद्वतः | उपरिष्टात् |
| प्रवतः | अधस्तात् |
| समम् | समानम् |
| असंबाधम् | बाधारहितम् |
| नानावीर्याः | नैकगुणयुक्ताः |
| बिभर्ति | धारयति |
| प्रथताम् | संवर्धयेत् |
| राध्यताम् | संसिद्धिं कुर्यात् |
| कृष्टयः | कृषकाः |
| सम्बभूवुः | उत्पद्यन्ते |
| जिन्वति | जीवति |
| पूर्वपेयम् | अमृतम् |
| प्राणत् | प्राणवत् |
| एजन् | वर्धमानम् |
| दधातु | धारयतु |

| | |
|---|---|
| विचक्रिरे | विचरणं कृतवन्तः |
| अभ्यवर्तयन् | पराजितवन्तः |
| विष्ठा | विशिष्टं स्थानम् |
| वयसः | पशूनाम् |
| भगम् | ऐश्वर्यम् |
| वर्चः | तेजः |
| विश्वम्भरा | विश्वस्य भर्त्री/पालयित्री |
| वसुधानी | स्वर्णादिधारणकर्त्री |
| हिरण्यवक्षा | सुवर्णगर्भयुक्ता |
| निवेशनी | निवासदात्री |
| ऋषभः | ऋषभादिदेवान् |
| बिभ्रती | धारणं कुर्वती |
| द्रविणे | धनाय |
| अस्वप्नाः | निद्रारहिताः |
| विश्वदानीम् | सम्पूर्णम् ऐश्वर्यम् |
| अप्रमादम् | प्रमादरहितम् |
| उक्षतु | सिञ्चतु |
| अर्णवे | समुद्रे |
| परमे सोमन् | आकाशे |
| त्विषिबलम् | तेजोबलम् |
| परिचराः | ऋषयः |
| समानी | समभावेन |
| क्षरन्ति | विचरन्ति |
| भूरिधारा | विविधपदार्थयुक्ता |
| विचक्रमे | विचरणं कृतवान् |
| अनमित्राम् | शत्रुरहिताम् |
| विसृजताम् | सर्जनं करोतु |

| | |
|---|---|
| स्योनम् | सुखदाता |
| बभ्रुम् | पिङ्गलवर्णम् |
| अजीतः | अजेयः |
| अहतः | शत्रूणां हिंसारहितः |
| अध्यष्ठाम् | अतिष्ठम् |
| नभ्यम् | मध्ये/केन्द्रस्थानम् |
| ऊर्जः | तेजोमयः |
| तन्वः | शरीरम् |
| अभिधेहि | कुरु |
| पवस्व | पवित्रं कुरु |
| उ | अवश्यम् |
| पिपर्तु | पालनं करोतु |
| तन्वते | विस्तारयन्ति |
| स्वरवः | यज्ञमण्डलम् |
| शुक्राः | श्वेताः |
| द्वेषत् | द्वेषं करोति |
| पुतन्यात् | पराजयं कुर्यात् |
| अभिदासात् | नाशस्य इच्छया |
| पूर्वकृत्वरि | हे शत्रुनाशयित्रि |
| रन्धय | विनाशय |
| उद्यन् | उदितः भवन् अस्ति |
| आतनोति | विस्तारयति |
| अनमीवाः | रोगप्रतिरोधकाः |
| अयक्ष्माः | हृद्रोगस्य जनकाः |
| कवे | प्रशंसनियः |
| धेहि | ददातु |

## अभ्यासः

१. **वस्तुनिष्ठात्मकप्रश्नाः -**

(क) पृथिवीसूक्तस्य कः ऋषिः का च देवता ?

(अ) मधुच्छन्दा, गायत्री (आ) हिरण्यस्तूपः, इन्द्रः

(इ) अथर्वा, भूमिः, पृथ्वी च देवता (ई) अत्रिः, पर्जन्यः

(ख) पृथिव्याः कति दिशः ?

(अ) दश (आ) पञ्च

(इ) तिस्रः (ई) चतस्रः

(ग) कः शचीपतिः ?

(अ) विष्णुः (आ) पृथ्वी

(इ) इन्द्रः (ई) अग्निः

(घ) अहं पृथिव्याः कोऽस्मि ?

(अ) माता (आ) पुत्रः

(इ) सखा (ई) मित्रम्

(ङ) 'हिरण्यवक्षा' इति शब्दस्य व्युत्पत्तिरस्ति -

(अ) हिरण्यं वक्षे यस्याः सा (आ) हिरण्यं च वक्षं च

(इ) हिरण्यं वक्षश्च (ई) हिरण्यं च वक्षाः

२. **रिक्तस्थानानि पूरयत -**

(क) सत्यं बृहद्दत .................... धारयन्ति।

(ख) यस्याश्चतस्रः .................... सं बभुवुः।

(ग) .................... उक्षतु वर्चसा।

(घ) सा नो भूमिं .................... मे पयः।

(ङ) तासु नो .................... पिपर्तु।

३. **अधोलिखितप्रश्नानामुत्तराणि संस्कृतभाषया लिखत -**

(क) पृथिवीसूक्तं कस्माद् वेदात् उद्धृतम् ?

(ख) के पृथिवीं धारयन्ति ?

(ग) विश्वम्भरा इति शब्दस्य कोऽर्थः ?

(घ) कीदृशी पृथ्वी ऐश्वर्यं तेजश्च प्रयच्छतु ?

(ङ) स्योनम् इत्यस्य कः अर्थः ?

(च) अग्निः क्व क्वास्ति ?

(छ) वेदशब्दस्य का परिभाषा इति लिखत।

**४. अधोलिखितपदानाम् अर्थः संस्कृतभाषया लिख्यताम् -**

| पदम् | अर्थः |
|---|---|
| (क) वसुधानी | .................. .............. |
| (ख) अस्वप्नाः | .................. .............. |
| (ग) ऊर्जः | .................. .............. |
| (घ) आपः | .................. .............. |
| (ङ) कृष्टयः | .................. .............. |
| (च) पूर्वपेयम् | .................. .............. |
| (छ) पिपर्तु | .................. .............. |

**५. निम्नलिखितानां समस्तपदानां नामनिर्देशपुरस्सरं विग्रहो विधेयः -**

| समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|
| (क) नानावीर्या | .............. | .............. .............. |
| (ख) विश्वम्भरा | .............. | .............. .............. |
| (ग) इन्द्रऋषभा | .............. | .............. .............. |
| (घ) अहोरात्रः | .............. | .............. .............. |
| (ङ) अजीतः | .............. | .............. .............. |
| (च) अक्षतः | .............. | .............. .............. |
| (छ) असंबाधम् | .............. | .............. .............. |

**६. निम्नलिखिततिङन्तपदानां धातुः लकारः पुरुषः वचनञ्च पृथक् निर्दिश्यताम् -**

| | तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| क | कृणोतु | .............. | .............. | .............. | .............. |
| ख | प्रथता | .............. | .............. | .............. | .............. |

| | | | | | |
|---|---|---|---|---|---|
| ग | बभूव | ............... | ............... | ............... | ............... |
| घ | विचक्रिरे | ............... | ............... | ............... | ............... |
| ङ | दधातु | ............... | ............... | ............... | ............... |
| च | सृजताम् | ............... | ............... | ............... | ............... |
| छ | पिपर्तु | ............... | ............... | ............... | ............... |
| छ | पवस्व | ............... | ............... | ............... | ............... |

## ७. अधोलिखितपदानां प्रकृतिप्रत्ययौ पृथक् लिखत -

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | ऋतम् | .................... | .................... |
| (ख) | भव्यम् | .................... | .................... |
| (ग) | कृष्टयः | .................... | .................... |
| (घ) | एजत् | .................... | .................... |
| (ङ) | वसुधानी | .................... | .................... |
| (च) | उक्षतु | .................... | .................... |
| (छ) | बिभ्रती | .................... | .................... |
| (ज) | उद्यन् | .................... | .................... |
| (झ) | प्रतिबुध्यमानाः | .................... | .................... |

## ८. रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं क्रियताम् -

(क) सत्यं बृहत् ऋतम् उग्रं दीक्षा तपः यज्ञः च एते पृथिवीं धारयन्ति।

(ख) वसुधानी शब्दस्यार्थः धनस्य धारिका।

(ग) अश्विनौ देवौ यस्याः पृथिव्याः परिमाणस्य मानं चक्रतुः।

(घ) पृथिवी सा कामधेनुरूपाः मनःकामनाः दोग्धु।

(ङ) अहं पृथिव्याः पुत्रोऽस्मि पृथिवी मम माता अस्ति।

## ९. प्रयोगपरिवर्तनं कुरुत -

(क) पृथिवी माता ते पुत्राय पयः विसृजताम्।

(ख) पृथिवी अस्माकं कृते महल्लोकं प्रयच्छेत्।

(ग) यस्यां पृथिव्यां देवाः असुरान् पराजयन्त।

(घ) सा भूमिः वर्धयन्ती अस्मान् वर्धयतु।

(ङ) द्यौः पृथिव्याः च मध्ये वयं स्मः।

(च) मया पृथिव्याः पुत्रेण भूयते पृथिव्या मम मात्रा भूयते।

१०. रेखाङ्कितपदान्याधृत्य कारकविभक्ती निर्णयत -

(क) पृथिव्याः चतस्रः दिशः वर्तन्ते।

(ख) पृथिवी वसूनि अस्मभ्यं ददातु।

(ग) अजीतोऽहतो अक्षतः अध्यष्ठां पृथिवीम् अहम्।

(घ) पृथिव्यां वयं सर्वदा अनुचरेम।

(ङ) महत् सत्यादयः पृथिवीं धारयन्तः सन्ति।

## योग्यता-विस्तारः

ऋग्यजुःसामाथर्वण इति क्रमेण लोकव्यवहारे तुरीयं स्थानमस्ति अथर्ववेदस्य। अथर्ववेदे लौकिकविषयाणाम् आमुष्मिकविषयाणाञ्च समन्वयो परिदृश्यते। अपि च कुटिलाचरण-निवारणक्षमाणां, चित्तवृत्तिनिरोधात्मकस्थिरतासम्पादकानां सर्वविधन्यूनता-परिहारपूर्वकमङ्गल-प्रदायकानां विषयाणां वर्णनमस्ति। यः ब्रह्मविषयकचिन्तनाधिक्याद् ब्रह्मवेदः इति। बहूनां भैषज्यकर्मणाम् अङ्गिरसादि-चिकित्साकल्पानाञ्च उपदेशाद् आङ्गिरसो वेदः इति। क्षात्रधर्मस्य विस्तृतविवेचनाद् क्षत्रवेदः इति। वेदत्रयोक्तकर्मणा आच्छादकत्वात् संरक्षकत्वाद् वा छान्दोवेदः इत्यादिभिः बहुविधैर्नामभिः अस्य विषयवैविध्यं सुष्ठु प्रकाशितमस्ति।

वस्तुतो दुःखनिवृत्तेर्दृष्टोपायानामितिहासोऽथर्ववेदसंहितायामेव प्रथमं प्रत्यक्षीक्रियते। अत अथर्ववेदस्य सविशेषमहत्त्वं वर्णयन् आह -

यस्य राज्ञो जनपदे अथर्वा शान्तिपारगः।
निवसत्यपि तद् राष्ट्रं वर्धते निरुपद्रवम्॥
तस्माद्राजा विशेषेण ह्यथर्वाणं जितेन्द्रियम्।
दान-सम्मानसत्कारैर्नित्यं समभिपूजयेत्॥ इति ॥

वन्दे मातरम्
सुजलां सुफलां मलयजशीतलाम्
सस्य श्यामलां मातरम्
शुभ्रज्योत्स्नां पुलकितयामिनीम्

फुल्लकुसुमित द्रुमदलशोभिनीम्
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरम्......वन्दे मातरम्॥

## पञ्चमः पाठः

# प्रजानां योगक्षेमाराधनम्

संस्कृतवाङ्मये पद्यसाहित्यमिव गद्यस्य प्रयोगोऽपि वैदिककालादेव भवति। कृष्णयजुर्वेदो ब्राह्मणग्रन्थाः उपनिषदश्च अधिकांशतः गद्यमया वर्तन्ते। पद्यस्य अपेक्षया गद्यस्य महत्त्वं प्रतिपादयितुं संस्कृतस्य प्राचीनैराचार्यैरियं सूक्तिः प्रसारिता - **'गद्यं कवीनां निकषं वदन्ति।'** इति।

लौकिकगद्यस्य दर्शनं सर्वप्रथमं महाभारते एव विद्यते। गद्ये एव अर्थशास्त्रं तथा महाभाष्यादय ग्रन्थाः उपलभ्यन्ते। साहित्यशास्त्रकर्तॄणां दार्शनिकानां च गद्यम् अधिगन्तुं दुःसाध्यं भवति। नवविधस्य उपन्यासस्य अपि गणना गद्यसाहित्य एव भवति।

संस्कृतगद्यकाव्यम् ओजः गुणोपेतं समासबहुलं चास्ति। उक्तञ्च दण्डिना - 'ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्। काव्यस्यातिदीर्घान् समासान्, दुर्बोधान्, घटनासङ्केतान्, श्लेषयमकानुप्रासोपमोत्प्रेक्षापरिसंख्यादीनलङ्कारान् प्रयोक्तुमत्र पूर्णा स्वतन्त्रता वर्तते। प्रकृतेः सूक्ष्मचित्रणस्य स्त्रीपुरुषयोः नैतिकमानसिकशारीरिकगुणानामेव वर्णनस्य प्राधान्यमत्र वर्तते। गद्यकाव्यं प्राचीनैरालङ्कारिकैः द्विधा विभक्तम् - आख्यायिका कथा चेति। संस्कृतगद्यकाव्ये कवित्रयस्य प्रामुख्यं दृश्यते - सुबन्धुः, बाणभट्टः दण्डी च। अवन्तिसुन्दरीकथानुसारेण महाकविदण्डी भारवेः प्रपौत्रः आसीत्। अस्य पिता वीरदत्तः माता च गौरी आसीत्। अयं वैदर्भीशैल्याः कविरासीत्। अस्य कवित्वप्रतिभा एकेन श्लोकेन वक्तुं शक्यते। तद्यथा -

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

केचन दण्डिनः पूर्वं केवलं वाल्मीकिं व्यासञ्च कविरूपेण मन्यन्ते। उक्तञ्च -

**जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्।**
**कविरिति ततो व्यासे कवयस्त्वयि दण्डिनि॥**

तथा च - **कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः इति।**

महाकविदण्डिना दशकुमारचरितम्, काव्यादर्शः, अवन्तिसुन्दरीकथा, छन्दोविचितिः, कलापरिच्छेदः, द्विसन्धानकाव्यम् इति ग्रन्थाः विरचिताः। अत्र आहत्य अष्टावुच्छ्वासास्सन्ति। अष्टोच्छ्वासात्मकमिदं दशकुमारचरितं गद्यकाव्यम्। गद्यकाव्येऽस्मिन् दशकुमाराणां चरित्रचित्रणं

वर्णितमस्ति, अत एव दशकुमारचरितम् इत्यस्याभिधानं सर्वथा सार्थकमेवास्ति। प्रस्तुतोऽयं पाठ्यांशो दशकुमारचरितस्य अष्टमोच्छ्वासाद् उद्धृतः। अस्मिन् पाठे विश्रुतचरितं वर्णितं विद्यते।

**प्रजानां योगक्षेमाराधनम्**

अथ सोऽप्याचचक्षे - देव ! मयापि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यन्नक्लेशार्हः क्वचित्कूपाभ्याशेऽष्टवर्षदेशीयो दृष्टः। स त्रासगद्गदमगदत् - महाभाग ! क्लिष्टस्य मे क्रियतामार्य, साहाय्यकम्। अस्य मे प्राणापहारिणीं पिपासां प्रति कर्तुमुदकमुदञ्चन्निह कूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः। तमलमस्मि नाहमुद्धर्तुम् इति। अथाहमभ्येत्य व्रतत्या कयापि वृद्धमुत्तार्य, तं च बालं वशनालीमुखोद्धृताभिरद्भिः फलैश्च पञ्चषैः शरक्षेपोच्छ्रितस्य लकुचवृक्षस्य शिखरात्पाषाणपातितैः प्रत्यानीतप्राणवृत्तिमापाद्य, तरुतलमिषण्णस्तं जरन्तमब्रवम् - 'तात ! क एष बालः ? को वा भवान् ? कथं चेयमापदापन्ना ? इति। सोऽश्रुगद्गदमगदत् - 'श्रूयतां महाभाग ! विदर्भो नाम जनपदः तस्मिन् भोजवंशभूषणम्, अंशावतार इव धर्मस्य, अतिसत्त्वः, सत्यवादी, वदान्यः, विनीतः, विनेता प्रजानाम्, रञ्जितभृत्यः, कीर्तिमान्, उदग्रः, बुद्धिमूर्तिभ्यामुत्थानशीलः, शास्त्रप्रमाणः, शक्यभव्यकल्पारम्भी, संभावयिता बुधान्, प्रभावयिता सेवकान्, उद्भावयिता बन्धून्, न्यग्भावयिता शत्रून्, असंबद्धप्रलापेष्वदत्तकर्णः, कदाचिदप्यवितृष्णो गुणेषु, अतिनदीष्णः कलासु, नेदिष्ठोधर्मार्थसंहितासु, स्वल्पेऽपि सुकृते सुतरां प्रत्युपकर्त्ता, प्रत्यवेक्षिता कोशवाहनयोः यत्नेन परीक्षिता सर्वाध्यक्षाणाम्, उत्साहयिता कृतकर्मणामनुरूपैर्दानमानैः सद्यः प्रतिकर्ता दैवमानुषीणामापदाम्, षाड्गुण्योपयोगनिपुणः, मनुमार्गेण प्रणेता चातुर्वर्ण्यस्य, पुण्यश्लोकः, पुण्यवर्मानामासीत्।

स पुण्यैः कर्मभिः प्राप्य पुरुषायुषम्, पुनरपुण्येन प्रजानामगण्यतामरेषु। तदनन्तरमनन्तवर्मा नाम तदायतिरवनिमध्यतिष्ठत्। स सर्वगुणैः समृद्धोऽपि दैवदण्डनीत्यां नात्यादृतोऽभूत्। तमेकदा रहसि वसुरक्षितो नाम मन्त्रिवृद्धः पितुरस्य बहुमतः प्रगल्भवागभाषत - तात! सर्वैवात्मसम्पदभिजनात्प्रभृत्यन्यूनैवात्र भवति लक्ष्यते। बुद्धिश्च निसर्गपट्वी कलासु। नृत्यगीतादिषु चित्रेषु च काव्यविस्तरेषु प्राप्तविस्तारा तवेतरेभ्यः प्रति विशिष्यते। तथाप्यसावप्रतिपद्यात्मसंस्कारमर्थशास्त्रेषु, अनग्निसंशोधितेव हेमजातिर्नातिभाति बुद्धिः। बुद्धिशून्यो हि भूभृदत्युच्छ्रितोऽपि परैरध्यारुह्यमाणमात्मानं न चेतयते। न च शक्तः साध्यं साधनं वा विभज्य वर्तितुम्।

अयथावृत्तश्च कर्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते। न चावज्ञातस्याज्ञा प्रभवति प्रजानां योगक्षेमाराधनाय। अतिक्रान्तशासनाश्च प्रजा यत्किञ्चनवादिन्यो यथाकथं चिद्वर्तिन्यः

सर्वाः स्थितीः संकिरेयुः। निर्मर्यादश्च लोको लोकादितोऽमुतश्च स्वामिनमात्मानं च भ्रंशयते। आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा। दिव्यं हि चक्षुर्भूतभवद्भविष्यत्सु व्यवहित-विप्रकृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति। तेन हीनः सतोरप्यायतविशालयोर्लोचनयोरन्ध एव जन्तुरर्थदर्शनेष्वसामर्थ्यात्। अतो विहाय बाह्यविद्यास्वभिषङ्गमागमयदण्डनीतिं कुलविद्याम्। तदर्थानुष्ठानेन चावर्जितशक्तिसिद्धिरस्खलितशासनः शाधि चिरमुदधिमेखलामुर्वीम् इति।

## शब्दार्थाः

| | |
|---|---|
| आचचक्षे | अवदत् |
| मया | विश्रुतेन |
| विन्ध्याटव्याम् | विन्ध्याचले |
| अक्लेशार्हः | क्लेशम् अर्हति इति क्लेशार्हः न क्लेशार्हः अक्लेशार्हः |
| अभ्याशे | समीपे |
| त्रासगद्गदम् | त्रासेन, भयेन गद्गदम्, स्खलितस्वरेण |
| प्रतिकर्तुम् | दूरीकर्तुम् |
| उदञ्चन् | निष्कासयन् |
| अभ्येत्य | समीपम् आगत्य |
| वृतत्या | लतया (रज्जुरूपेण प्रयुक्तया) |
| पञ्चषाणि | पञ्च षट् वा प्रमाणम् एषाम् इति पञ्चषाणि |
| निषण्णः | उपविष्टः |
| अतिसत्त्वः | अत्यन्तं सत्त्वम् बलम् यस्य सः (महाबलवान्) |
| रञ्जितभृत्यः | रञ्जिताः अनुरागम् (भक्तिम्) प्रापिताः |
| उदग्रः | उन्नतः |
| शक्यभव्यकल्पारम्भी | स्वसाध्यः |
| अतिनदीष्णः | अधिकपटुः |
| नेदिष्ठः | अतिशयसमीपवर्ती |
| योगक्षेमाराधनाय | योगः अप्राप्तेः प्राप्तिः, क्षेमं प्राप्तस्य रक्षणं, तयोः आराधनाय साधनाय |

| | |
|---|---|
| निर्मर्यादः | निर्गता मर्यादा यस्य सः |
| आगमदीपदृष्टेन | आगमशास्त्रम् एव दीपः तेन दृष्टेन |
| भूतभवद्भविष्यत्सु | भूतं व्यतीतं च, भवत् वर्तमानं च, भविष्यत् भविष्यं च तेषु |
| व्यवहितानि | आच्छन्नानि |
| विप्रकृष्टानि | अनुपस्थितानि (तदादिषु) |
| अप्रतिहतवृत्तिः | न प्रतिहता अवरुद्धा |

## अभ्यासः

### १. वस्तुनिष्ठात्मकप्रश्नाः -

(क) 'दशकुमारचरितम्' इति गद्यकाव्यं केन विरचितम् ?

(अ) माघेन (आ) कालिदासेन

(इ) भर्तृहरिणा (ई) दण्डिना

(ख) पुण्यवर्मा कस्य वंशस्य भूषणम् आसीत् ?

(अ) चन्द्रवंशस्य (आ) सूर्यवंशस्य

(इ) भोजवंशस्य (ई) चौलवंशस्य

(ग) षाड्गुण्योपयोगनिपुणः कः आसीत् ?

(अ) अनन्तवर्मा (आ) पुण्यवर्मा

(इ) भोजवर्मा (ई) शीलवर्मा

(घ) कः अश्रुगद्गदम् अवदत् ?

(अ) शुश्रुतः (आ) विश्रुतः

(इ) वृद्धः (ई) पुण्यवर्मा

(ङ) दशकुमारचरितं कतिषु उच्छ्वासेषु विभक्तमस्ति ?

(अ) सप्त (आ) अष्टौ

(इ) नव (ई) दश

### २. अधोलिखितप्रश्नानामुत्तरं संस्कृतभाषया लिखत -

(क) महाकविदण्डी कस्य प्रपौत्रः आसीत् ?

(ख) प्राचीनैः आलङ्कारिकैः गद्यकाव्यं कतिधा विभक्तम् ? नामानि च लिखत।

(ग) प्रस्तुतोऽयं पाठ्यांशः कुतः उद्धृतः ?

(घ) पुण्यवर्मा कस्य जनपदस्य तथा च कस्य वंशस्य राजा आसीत् ?

(ङ) पुण्यवर्मणः पश्चात् कः राजा आसीत् ?

## ३. पूर्णवाक्येन उत्तरत -

(क) विश्रुतेन बालकस्य पिपासा कथं दूरीकृता ?

(ख) वृद्धः विश्रुतं प्रति भोजवंशस्य भूषणस्य विषये किं किमवदत् ?

(ग) को न अत्यादृतोऽभूत् ?

(घ) अनन्तवर्मणो मन्त्री क आसीत् ?

(ङ) वसुरक्षितो नाम मन्त्रिवृद्धः प्रागल्भवाण्याः किमभाषत।

## ४. रिक्तस्थानं पूरयत -

(क) ओजः ...................... जीवितम्।

(ख) मयापि परिभ्रमता ...................... दृष्टः।

(ग) मनुमार्गेण प्रणेता ...................... आसीत्।

(घ) तदनन्तरं ...................... नात्यादृतोऽभूत्।

(ङ) न चावज्ञातस्याज्ञा ...................... योगक्षेमाराधनाय।

## ५. अधोलिखितानां सन्धिपदानां सन्धिसूत्रं निर्देशपूर्वकं विच्छेदो विधेयः -

| | सन्धिः | विच्छेदः | सन्धिसूत्रम् |
|---|---|---|---|
| (क) | प्राणापहारिणीम् | ............... | ............... ............... |
| (ख) | एष बालः | ............... | ............... ............... |
| (ग) | अभ्येत्य | ............... | ............... ............... |
| (घ) | क्लिश्यन्नक्लेशार्हः | ............... | ............... ............... |
| (ङ) | अत्युच्छ्रितः | ............... | ............... ............... |
| (च) | परैश्च | ............... | ............... ............... |

## ६. निम्नलिखितानां समस्तपदानां नामनिर्देशपुरस्सरः विग्रहो विधेयः -

| | | विग्रहवाक्यम् | समासनाम |
|---|---|---|---|
| (क) | अक्लेशार्हः | .................. | ........................... |
| (ख) | प्राणवृत्तिः | .................. | ........................... |

(ग) शास्त्रप्रमाणम् .................. ............................

(घ) अतिसत्वः ................. ............................

(ङ) प्रगल्भवाक् .................. .............................

(च) योगक्षेमाराधनाय .................. .............................

(छ) अवितृष्णः .................. .............................

(ज) मन्त्रिवृद्धः .................. ..............................

## ७. अधोनिर्दिष्टेषु पदेषु शब्द-लिङ्ग-विभक्ति-वचनानि निर्दिशत -

| | पदम् | शब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| (क) | प्रजानाम् | ............... | ............... | ............... | ............... |
| (ख) | कीर्तिमान् | ............... | ............... | ............... | ............... |
| (ग) | अश्रुभिः | ............... | ............... | ............... | ............... |
| (घ) | तयोः | ............... | ............... | ............... | ............... |
| (ङ) | विधौ | ............... | ............... | ............... | ............... |
| (च) | मया | ............... | ............... | ............... | ............... |
| (छ) | असौ | ............... | ............... | ............... | ............... |

## ८. अधोलिखितेषु पदेषु प्रकृतिप्रत्ययौ विभजत -

| | प्रकृतिः | | प्रत्ययः |
|---|---|---|---|
| (क) प्रतिकर्तुम् | ............... | + | ............... |
| (ख) शक्तः | ............... | + | ............... |
| (ग) उत्तार्यः | ............... | + | ............... |
| (घ) अभेत्यः | ............... | + | ............... |
| (ङ) जेता | ............... | + | ............... |
| (च) कीर्तिमान् | ............... | + | ............... |

## ९. प्रयोगपरिवर्तनं कुरुत -

(क) मयापि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः दृष्टः।

(ख) अयथावृत्तश्च कर्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते।

(ग) मन्त्रिवृद्धः पितुरस्य बहुमतः प्रगल्भवाग् अभाषत।

(घ) न चावज्ञातस्याज्ञा प्रभवति प्रजानां योगक्षेमाराधनाय।

(ङ) बुद्धिहीनो हि भूभृदत्युच्छ्रितोऽपि परैः अध्यारुह्यमाणमात्मानं न चेतयते।

१०. रेखाङ्कितपदान्यादाय कारकविभक्ती निर्णयत -

(क) आगमदीपदृष्टेन खल्वध्वना <u>सुखेन</u> वर्तते लोकयात्रा।

(ख) न च <u>शक्तः</u> साध्यं साधनं वा विभज्य वर्तितुम्।

(ग) कोऽपि निष्कलो <u>मम</u> एकशरणभूतः पतितः।

(घ) प्रजा यत्किञ्चनवादिन्यो यथाकथञ्चिद्वर्तिन्यः सर्वाः <u>स्थितीः</u> संकिरेयुः।

(ङ) क्लिष्टस्य मे क्रियतामार्य्य <u>साहाय्यकम्</u>।

## योग्यता-विस्तारः

महाकविदण्डिप्रणीतग्रन्थत्रयस्योपलब्धिः अद्यतनस्य प्रामाणिकगवेषणस्य परिणामो भवति। दशकुमारचरितं तु महाकविदण्डिविरचितमेकं महनीयं गद्यकाव्यं वर्तते। दशकुमारचरितं संस्कृतसाहित्ये गद्यकाव्यत्रये कथानकरोमाञ्चकतायाः कौतूहलपूर्णतायाश्च कारणेन महत्त्वपूर्णं स्थानं भजते। विशेषतः सप्तमाष्टमशताब्द्योः भारते भारतीयानां क्रीडासु मनोरञ्जनादिषु आचारविचारेषु वा कीदृशी भावनाऽऽसीदिति दशकुमारचरितानुशीलनेन सुष्ठु ज्ञायते। दण्डिनो जन्म काञ्चिवरम् इति नाम्ना प्रसिद्धे नगरेऽभूत्। कौशिकगोत्रोत्तपन्नोऽयं प्रपितामहस्य भारवेः आश्रयदातृनृपस्याश्रये काञ्चीपुरमधिवसति स्म।

संस्कृतसाहित्ये प्रकर्षतराणि महाकाव्यानि, रूपकाणि, गीतिकाव्यानि च देदीप्यन्ते, तत्र अनवद्या रमणीया पद्यरचनाश्च भूयस्यः परिस्फुटन्ति। संस्कृतगद्यकाव्यस्य एष कथात्मको विकासो भिन्नं रूपद्वयमादाय चकासते। संस्कृतकथासाहित्यं याथातथ्यं परिगृह्णाति लोककथाभ्यः, परं तत्र प्रभावो महाकाव्यानां शैल्याः पर्यावलोच्यते। इमानि कथावस्तूनि कानिचन तु ऐतिहासिकीः घटनाः समाश्रयन्ति कानिचन च कविकल्पनामेव।

# षष्ठः पाठः

## नीतिश्लोकाः

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥१॥**

**भावार्थः -** यत्र नारीणां पूजनं भवति तत्र देवता रमन्ते किन्तु यत्र नारीणां पूजनं न भवति तत्र सर्वा क्रिया अफला अर्थाद् निष्फला भवन्ति।

**विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम्।**
**व्रजन्ति शूत्रनवधूय निःस्पृहा शमेन सिद्धिं मुनयो न भूभृतः॥२॥**

**भावार्थः -** हे राजन्! भवान् शान्तिं विहाय शत्रूणां विनाशाय च सिद्धो भवतु। विरक्ताः मुनिजनाः अन्तर्गतान् शत्रून् जित्वा सिद्धिं प्राप्नुवन्ति। किन्तु क्षत्रियाः पराक्रमैः शत्रून् हत्वा सिद्धिं प्राप्नुवन्ति।

**विधिसमयनियोगाद्दीप्तिसंहारजिह्मं**
**शिथिलवसुमगाधे मग्नमापत्पयोधौ।**
**रिपुतिमिरमुदस्योदीयमानं दिनादौ**
**दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः॥३॥**

**भावार्थः -** हे राजन्! विधिः कालः च दुरतिक्रमौ। तत् कारणतः आपत्समुद्रे निमग्नः भवान् तेजोराशिं विहाय अस्तङ्गच्छन् सूर्य इव आभाति। अन्धकारं दूरीकृत्य अचिरेणैव पुनरुदीयमानं सूर्यकान्तिरिव लक्ष्मीः त्वां वृणोतु।

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।**
**यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥४॥**

**भावार्थः -** धनव्ययस्य त्रयः मार्गाः भवन्ति। ते च दानं, स्वयं भोगः, विनाशश्च। यो न ददाति, न भुङ्क्ते, तस्य धनस्य तृतीयमार्गः विनाश एव भवति। तादृशजनस्य इहलौकिकं सुखं शश-विषाणप्रायमेव।

**श्रियं प्रदुग्धे विपदो रुणद्धि यशांसि सूते मलिनं प्रमार्ष्टि।**
**संस्कारशौचेन परं पुनीते शुद्धा हि बुद्धिः किल कामधेनुः॥५॥**

**भावार्थः** - बुद्धिः परिशुद्धा भवति चेत् कामधेनुरिव वैभवं ददाति। आपदं दूरीकरोति। कीर्तिं ददाति। पापं निवारयति। सत्संस्कारैः शुद्धत्वेन च जनं पवित्रं करोति।

**शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा**
**विशुद्धेरुत्कर्षः त्वयि तु मम भक्तिं द्रढयति।**
**शिशुत्वं स्त्रैणां वा भवतु ननु वन्द्याऽसि जगतां**
**गुणाः पूजास्थानं गुणिषु न च लिङ्गं न वयः॥६॥**

**भावार्थः** - भवभूतिविरचिते उत्तररामचरितनाटके सीतादेवीं प्रति अरुन्धती ब्रूते – हे जानकि ! त्वं बाला वा शिष्या वा भव, इत्ययं सम्बन्धः साधारणः स तथा अन्यत्र भवतु। प्रकृते जन्मतः विद्यमानः पवित्रतायाः उत्कर्षः मदीयां भक्तिभावनां दृढीकरोति। भवत्यां बाल्यं स्त्रीत्वं वा भवतु त्वं लोकानां पूजनीया असि। तथाहि गुणा एव पूजास्थानमर्हन्ति।

पुरुषादिलिङ्गं वा अधिकं वयो वा पूजनस्य हेतुः न भवति। गुणवत्सु राजमानाः गुणा एव पूजास्थानं भवन्ति।

**तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः**
**सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम्।**
**मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं**
**कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणम्॥७॥**

**भावार्थः** - आशां कर्तय। क्षमागुणमाश्रय गर्वं त्यज। पापासक्तः मा भूः। सत्यं वद। सज्जनमार्गमनुसर। पण्डितानां सेवां कुरु। मान्यान् पूजय। शत्रून् अपि अनुनयेन वशिकुरु। गुरौ भक्त्या प्रवर्तस्व। नम्रतां विधेहि। आत्मश्लाघां मा कुरु। कीर्तिमर्जय। दुःखिते जने दयां कुरु। एतत्सर्वं सज्जनानां लक्षणम्।

**यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं**
**तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम्।**
**तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः**
**कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्॥८॥**

**भावार्थः** - विधाता ललाटपट्टे यल्लिखितम् अल्पं वा महद् वा तद्धनं मरुस्थलेऽपि प्राप्यते। मेरुपर्वतं गत्वापि ततोऽधिकं न लभ्यते। अतो धीरो भव। धनिनः दृष्ट्वा दीनत्वं न प्राप्नुहि। तथाहि कूपे समुद्रे च घटः समानमेव जलं स्वीकरोति खलु। अनतिक्रमणीयो विधिर्नाम।

**नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम्।**

**आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः॥९॥**

**भावार्थः -** पण्डितमतयः (विवेकिनः) मानवाः अप्राप्यं किमपि न वाञ्छन्ति। विनष्टं मनसि निधाय शोकासक्ताः न भवन्ति। विपत्काले विवेकं न त्यजन्ति।

**श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।**

**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव॥१०॥**

**भावार्थः -** ज्ञानवान् जनः शिक्षकः भवितुमर्हति। किञ्च स्वेनाधिगतं ज्ञानमितरेभ्यो नैपुण्येन प्रसारयितुं यः शक्नोति स उत्तमशिक्षकः भवितुमर्हति। यस्मिन् ज्ञानमपि विद्यते तत्प्रकटन-सामर्थ्यमपि विद्यते स आदर्शशिक्षको भवितुमर्हति। अर्थात् समेषां शिक्षकाणां ज्ञानेन सह बोधनकौशलमावश्यकम्।

**वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता**

**विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम्।**

**भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले,**

**येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः॥११॥**

**भावार्थः -** सत्पुरुषसङ्गतिवाञ्छादिभिः निर्मलैः गुणैरलङ्कृता महान्तो महामणयः सज्जनशिरोमणयः पुरुषाः समस्तैर्जनैरादरणीया नमस्करणीया अनुकरणीयाश्च। इत्थं विशिष्टगुणानां मानवपुङ्गवानामेव नमस्कारार्हत्वादिति भावः।

## शब्दार्थाः

| | |
|---|---|
| प्रसीद | प्रसन्नो भव |
| विद्विषाम् | शत्रूणाम् |
| प्रमार्ष्टि | शुद्धीकरोति |
| संक्रान्तिः | शिष्येभ्यः विद्यादानम् |
| समभ्येतु | प्राप्नोतु |
| पुनिते | पवित्रे |
| जहि | त्यज |
| पयोनिधावपि | समुद्रेऽपि |

| | |
|---|---|
| आपत्सु | विपत्तिषु |
| मुह्यन्ति | वैचित्त्यमाप्नुवन्ति |
| प्रतिष्ठापयितव्यम् | प्रतिष्ठापनं करणीयम् |
| वाञ्छा | अभिलाषः |
| विद्यायां व्यसनम् | विद्यासक्तिः |
| संसर्गः | संगतिः |
| शूलिनि ! | त्रिशूलधारिणि ! |

## अभ्यासः

१. **वस्तुनिष्ठाः प्रश्नाः -**

(क) का सम्पत्तिं प्रसूते ?

(अ) धेनुः (आ) लक्ष्मीः

(इ) शुद्धाबुद्धि (ई) शक्तिः

(क) मानवेषु पूजास्थानं के प्राप्नुवन्ति ?

(अ) लिङ्गम् (आ) वयः

(इ) गुणाः (ई) उद्योगः

(ख) विपत्तिकाले कः वैरं न याति ?

(अ) दुर्जनः (आ) मित्रम्

(इ) सुजनः (इ) बन्धुः

(ग) घटः कुत्र समानं जलं स्वीकरोति ?

(अ) समुद्रे (आ) कूपे

(इ) तडागे (ई) त्रिषु

(घ) धनस्य गतयः कति ?

(अ) चतस्रः (आ) षट्

(इ) एका (ई) तिस्रः

(ङ) कुत्र देवता रमन्ते ?

(अ) यत्र नार्यस्तु पूज्यन्ते (आ) यत्र पुरुषास्तु पूज्यन्ते

(इ) तत्र राक्षसास्तु पूज्यन्ते (ई) तत्र बालकास्तु पूज्यन्ते

## २. अधो दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु -

**दानं प्रियवाक्यसहितं ज्ञानं गर्वः क्षमान्वितं शौर्यम्।**
**त्यागसहितं च वित्तं दुर्लभमेतच्चतुष्टयम्॥**

(क) धनं कीदृशं भवेत् ?

(ख) प्रियवाक्यसहितं किं भवेत् ?

(ग) ज्ञानं कथं भवेत्?

(घ) लोके दुर्लभं किम् ?

(ङ) श्लोकस्यास्य शीर्षकं सूचयत।

## ३. सर्वे प्रश्नाः समाधेयाः -

(क) परिशुद्धा बुद्धिः किं करोति ?

(ख) सतां चेष्टितं कीदृशं भवति ?

(ग) सज्जनः आपत्काले किं करोति?

(घ) सम्पदः कीदृशं पुरुषं वृणन्ति ?

(ङ) सज्जनमूर्खयोः दृष्टिः कथं भवति?

(च) पण्डितलक्षणानि लिखत।

## ४. रिक्तस्थानानि पूरयत -

(क) श्रियं प्रदुग्धे ...................................... शुद्धा हि बुद्धिः किल कामधेनुः।

(ख) शिशुर्वा शिष्या ...................................... मम भक्तिं द्रढयति।

(ग) तृष्णां छिन्धि ...................................... रतिं मा कृथाः।

(घ) यद्धात्रानिजभाल ...................................... महद् वा धनम्।

(ङ) ना प्राप्यमभि ...................................... शोचितुम्।

(च) व्रजन्ति ...................................... निःस्पृहा।

(छ) शमेन ...................................... भूभृतः।

## ५. यथायोग्यं योजयत -

| | |
|---|---|
| (क) यत्र नार्यस्तु पूज्यन्ते | तस्य तृतीया गतिर्भवति |
| (ख) विहाय शान्तिं नृप | मलिनं प्रमार्ष्टि |
| (ग) यशांसि सूते | रमन्ते तत्र देवताः |

(घ) संस्कारशौचेन परं पुनीते — धाम तत्पुनः

(ङ) यो न ददाति न भुङ्क्ते — शुद्धा हि बुद्धिः किल कामधेनुः

## ६. प्रयोगपरिवर्तनं कुरुत -

(क) गतयो भवन्ति वित्तस्य।

(ख) यो न ददाति न भुङ्क्ते।

(ग) गुणा एव पूजास्थानमर्हन्ति।

(घ) तृष्णां छिन्धि भज क्षमां जहि मदम्।

(ङ) घटो गृह्णाति तुल्यं जलम्।

(च) आपत्सु विवेकं न त्यजन्ति पण्डिताः।

## ७. रेखाङ्कितपदान्याश्रित्य कारकविभक्ती निर्णयत -

(क) तेभ्यो नरेभ्यो <u>नमः</u>।

(ख) <u>लोकापवादाद्</u> भयम्।

(ग) तिस्रो गतयो भवन्ति <u>वित्तस्य</u>।

(घ) <u>येषु</u> एते निवसन्ति निर्मलगुणाः।

(ङ) क्षत्रियाः पराक्रमैः <u>शत्रून्</u> हत्वा सिद्धिं प्राप्नुवन्ति।

## ८. अधोलिखितानां पदानां सन्धिविच्छेदपूर्वकं सूत्राणि लिखत -

| | सन्धिविच्छेदः | सूत्रम् |
|---|---|---|
| (क) यत्रैतास्तु | ................ + ................ | .................. ............... |
| (ख) येष्वेते | ................ + ................ | .................. ............... |
| (ग) वन्यासि | ................ + ................ | .................. ............... |
| (घ) पयोनिधावपि | ................ + ................ | .................. ............... |
| (ङ) मरुस्थलेऽपि | ................ + ................ | .................. ............... |
| (च) यस्योभयम् | ................ + ................ | .................. ............... |

## ९. अधोलिखितानां पदानां विग्रहवाक्यपूर्वकं समासनाम निर्दिशत।

| | समासविग्रहः | समासनाम |
|---|---|---|
| (क) संसर्गमुक्तिः | ............... ............... | ............... ............... |
| (ख) आत्मदमने | ............... ............... | ............... ............... |

(ग) विद्वज्जनः ............... ............... ............... ...............

(घ) निर्मलगुणाः ............... ............... ............... ...............

(ङ) पयोनिधिः ............... ............... ............... ...............

**१०. अधस्तनपदेषु प्रकृतिप्रत्ययौ विभजत -**

| | प्रकृतिः | प्रत्ययः |
|---|---|---|
| (क) धात्रा | ............... | ............... |
| (ख) वित्तवत्सु | ............... | ............... |
| (ग) प्रतिष्ठापयितव्यः | ............... | ............... |
| (घ) चेष्टितम् | ............... | ............... |
| (ङ) प्रीतिः | ............... | ............... |
| (च) व्यसनम् | ............... | ............... |
| (छ) अपवादः | ............... | ............... |

## योग्यता-विस्तारः

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथा मूकभावः परेषाम्।
तृष्णास्रोतो विभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा,
सामान्यः सर्वशास्त्रेष्वनुपहत विधिः श्रेयसामेष पन्थाः॥१॥

एको देवः केशवो वा शिवो वा एकं मित्रं भूपतिर्वा यतिर्वा।
एको वासः पत्तने वा वने वा एका नारी सुन्दरी वा दरी वा॥२॥

भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्भूमिः विलम्बिनो घनाः।
अनुद्धताः सत्पुरुषा समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥३॥

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः।
फलं पापस्य नेच्छन्ति पापं कुर्वन्ति यत्नतः॥४॥

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं,
नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम्।
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः॥५॥

अग्राह्यं हृदयं यथैव वदनं यद्दर्पणान्तर्गतं
भावः पर्वतसूक्ष्ममार्गविषमः स्त्रीणां न विज्ञायते।
चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशंसितं
नारी नाम विषांरकुरैरिव लता दोषैः समं वर्धिता॥ ६ ॥

क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः
स्वार्थो यस्य परार्थम् एव स पुमानेकः सतामग्रणीः।
दुष्पूरोदरपूरणाय पिबति स्रोतः पतिं वाडवो
जीमूतन्तु निदाघसंभृतजगत्संतापविच्छित्तये॥ ७॥

किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्
किं वा नास्ति परिश्रमो दिनपतेरास्ते न यन्निश्चलः।
किन्त्वङ्गीकृतमुत्सृजन्स्वमनसा श्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम्॥ ८॥

# सप्तमः पाठः

# आर्यावर्तवर्णनम्

‘नलचम्पूः’ इति महाकविश्रीत्रिविक्रमभट्टविरचितम् एकं महनीयं गद्यपद्यात्मकं चम्पूकाव्यमस्ति। अयं महाकविः शाण्डिल्यगोत्रीयकर्मनिष्ठब्राह्मणपरिवारे जनिमलभत। पिता नेमादित्यः पितामहश्च श्रीधरः आसीत्। अयं राष्ट्रकूटवंशस्य राज्ञः इन्द्रराजस्य सभापण्डितोऽभवत्। अस्य काव्यस्य नायकः नलः नायिका च दमयन्ती विद्यते। नलचम्पू आख्यायिका इत्युच्यते। सुप्रसिद्धेऽस्मिन् नलचम्पूकाव्ये सप्त उच्छ्वसाः सन्ति। तत्र प्रथमोच्छ्वासे आर्यावर्तवर्णनमस्ति। किन्नाम नलचम्पूः इति चेत्, उच्यते काव्यं हि तावद्दृश्यश्रव्यभेदेन द्विविधम्। तत्राद्यं रूपकोपरूपकभेदाद् द्विविधम्। द्वितीयं गद्यमयपद्यमयमिश्रभेदेन त्रिविधम्। तत्र यन्मिश्रमित्युक्तं तदेव चम्पूः। ‘गद्यपद्यमयं काव्यं चम्पूः’ इत्यभिधीयते। प्रस्तुतोऽयं पाठ्यांशः प्रथमोच्छ्वासस्य ‘आर्यावर्तवर्णनम्’ इत्यंशः संगृहीतः।

अस्ति समस्तविश्वम्भराभोगभास्वल्ललामलीलायमानः, समानः सेव्यतया नाकलोकस्य, ग्राम्यकविकथाबन्ध इव नीरसस्य मनोहरः, भीम इव भारतालङ्कारभूतः, कान्ताकुचमण्डलस्पर्श इवाग्रणीः सर्वविषयाणाम्, अनधीतव्याकरण इवादृष्टप्रकृतिनिपातोपसर्गलोपसवर्णविकारः, पशुपतिजटाबन्ध इव विकसितकनककमलकुबलयोच्छलितरजः पुञ्जपिञ्जरितहंसावतंसया प्रचुरचलच्चकोरचक्रवाककारण्डवमण्डलीमण्डिततीरया भगीरथभूपालकीर्तिपताकया स्वर्गगमन-सोपानवीथीयमानरिङ्गत्तरङ्गया गङ्गया पुण्यसलिलैः प्लावितश्चन्द्रभागालङ्कृतैकदेशश्च, सारः सकलसंसारचक्रस्य, शरण्यः पुण्यकारिणाम्, आरामो रामणीयककदलीवनस्य, धाम धर्मस्य, आस्पदं सम्पदाम्, आश्रयः श्रेयसाम्, आकरः साधुव्यवहाररत्नानाम्, आचार्य-भवनमार्यमर्यादोपदेशानामार्यावर्तो नाम देशः।

यस्मिन्ननवरतधर्मकर्मोपदेशशान्तसमस्तव्याधिव्यतिकराः पुरुषायुषजीविन्यः सकल-संसारसुखभाजः प्रजाः। तथा हि, कुष्ठयोगो गान्धिकापणेषु, स्फोटप्रवादो वैयाकरणेषु, सन्निपातस्तालेषु, ग्रहसङ्क्रान्तिर्ज्योतिःशास्त्रेषु, भूतविकारवादः सांख्येषु, क्षयस्तिथिषु, गुल्मवृद्धिर्वनभूमिषु, गलग्रहोमत्स्येषु, गण्डकोत्थानं पर्वतवनभूमिषु, शूलसम्बन्धश्चण्डिकायतनेषु दृश्यते न प्रजासु।

यत्र चतुरगोपशोभिताः सङ्ग्रामा इव ग्रामाः, तुङ्गसकलभवनाः, सर्वत्र नगा इव नगरप्रदेशाः, सदाचरणमण्डनानि नूपुराणीव पुराणि, सदानभोगाः प्रभञ्जना इव जनाः, प्रियालपनसाराणि यौवनानीव वनानि, विटपिहिताश्वटिका इव वाटिकाः, निर्वृतिस्थानानि सुकलत्राणीवेक्षुक्षेत्र-सत्त्राणि, जलाविलक्षणाः पशुपुरुषा इवाप्रमाणास्तडागभागाः, कुपितकपिकुलाकुलिता लङ्केश्वरकिङ्करा इव भग्नकुम्भकर्णघनस्वापाः कूपाः, पीवरोधसः सरित इव गावः, सन्ती व्रतापदोषाः सूर्यद्युतय इव कुलस्त्रियः।

यत्र च मनोहारिसारसद्वन्द्वास्तत्पुरुषेण द्विगुना चाधिष्ठित कादम्बरी गद्यबन्धा इव दृश्यमानबहुव्रीहयः केदाराः।

किं बहुना ।

नास्ति सा नगरी यत्र न वापी न पयोधरा।
दृश्यते न च यत्र स्त्री नवापीनपयोधराः॥२६॥

अपि च ।

भवन्ति फाल्गुने मासि वृक्षशाखा विपल्लवाः।
जायन्ते न तु लोकस्य कदापि च विपल्लवाः॥२७॥

यत्र सौराज्यरञ्जितमनसः सकलसमृद्धिवर्धितमहोत्सवपरम्परारम्भनिर्भराः सततमकुलीनं कुलीनाः प्राप्तविमानमप्राप्तविमानभङ्गाः, कतिपयवसुविराजितमनेकवसवः, समुपहसन्ति स्वर्गवासिनं जनं जनाः।

कथं चासौ स्वर्गान्न विशिष्यते। यत्र गृहे-गृहे गौर्यः स्त्रियः, महेश्वरो लोकः, सश्रीका हरयः, पदे-पदे धनदाः सन्ति लोकपालाः। केवलं न सुराधिपो राजा। न च विनायकः कश्चित् ।

यत्र च लतासम्बन्धः कलिकोपक्रमश्च पादपेषु दृश्यते, न पुरुषेषु। यत्र च मरकवार्ता परमहिमोपघातश्च तुहिनाचलस्थलीषु श्रूयते न प्रजासु।

यश्च नीतिमत्पुरुषाधिष्ठितोऽप्यनीतिः, सटोऽप्यवटसङ्कुलः, कारूपयुतोऽप्यपगत-रूपशोभः।

यत्र च गुरुव्यतिक्रमं नक्षत्रराशयः, मात्राकलहं लेखशालिकाः, मित्रोदयद्वैषमुलूकाः, अपत्यत्यागं कोकिलाः, बन्धुजीवविघातं ग्रीष्मदिवसः, कुर्वन्ति न जनाः।

किं बहुना -

देशः पुण्यतमो देशः कस्यासौ न प्रियो भवेत्।
युक्तोऽनुक्रोशसम्पन्नैर्यो जनैरिव योजनैः॥२८॥

तस्य विषयमध्ये निषधो नामास्ति जनपदः प्रथितः।
तत्र पुरी पुरुषोत्तमनिवासयोग्यास्ति निषधेति॥ २९॥
जननीति मुदितमनसा सततं सुस्वामिना कृतानन्दा।
सा नगरी नगतनया गौरीव मनोहरा भाति॥ ३०॥

## शब्दार्थाः

| | |
|---|---|
| विश्वम्भरायाः | धरित्र्याः |
| आभोगे | गात्रे |
| भास्वत् | दीप्यमानम् |
| ललामम् | सुन्दरम् |
| सेव्यतया | भोग्यत्वेन |
| नीरसस्यमनोहरः | जलेन धान्येन च मनोहरः |
| भारतालङ्कारभूतः | भारतवर्षस्य अलङ्कारभूतः |
| अग्रणीः | प्रधानभूतः |
| कनककमलानि | स्वर्णपद्मानि |
| कुवलयानि | नीलोत्पलानि |
| उच्छलितेन | निर्गतेन |
| रजःपुञ्जेन | परागपटलेन |
| पिञ्जरिताः | पिङ्गलवर्णतां नीताः हंसाः |
| चकोरः | पक्षिविशेषः |
| पुण्यकारिणाम् | धर्माचरणशीलानाम् |
| शरण्यः | रक्षकः |
| आरामः | उद्यानम् |
| आस्पदम् | पात्रम् |
| आर्यावर्तः | भारतवर्षः |
| पुरुषायुषजीविन्यः | शतवर्षपर्यन्तं जीवनधारणकारिण्यः |
| स्फोटप्रवादः | शब्दब्रह्मवादः |

| | |
|---|---|
| ग्रहसङ्क्रान्तिः | ग्रहाणां सूर्यादीनां संक्रान्तिः, मेषादिराशौ संक्रमणम् |
| वादः | सिद्धान्तः |
| गलग्रहः | मीनेषु वडिशेन कण्ठग्रहणं |
| ग्रामाः | ग्राम्यवासाः |
| नगाः | पर्वताः |
| विटपिहिताः | धूर्तैः आलिङ्गिताः |
| चेटिकाः | दास्यः |
| सुकलत्राणि | सुभार्याः |
| पशुपुरुषाः | पशुसमानाः मनुष्याः |
| जलाविलक्षणाः | वारिणा पङ्किलाः अवतारादितटप्रदेशाः |
| अगाधाः | दीर्घाः |
| लङ्केश्वरकिङ्कराः | रावणसेवकाः |
| केदाराः | परिष्कृतक्षेत्राणि |
| कादम्बरीगद्यबन्धाः | कादम्बरीगद्यरचनाः |
| सौराज्यरञ्जितनसः | सौराज्येन शोभनाधिपत्येन प्रसादितानि चेतांसि |
| कौ | पृथिव्याम् |
| अनेकवसवः | असङ्ख्यानि धनानि |
| न विशिष्यते | वैशिष्ट्ययुक्तो न भवति |
| सश्रीकाः | शोभान्विताः |
| गान्धिकापणेषु | सुगन्धिविक्रेतृणाम् आपणेषु |

## अभ्यासः

१. **वैकल्पिकप्रश्नाः -**

(क) स्फोटप्रवादः केषु -

(अ) गान्धिकापणेषु (आ) ज्योतिःशास्त्रेषु

(इ) सांख्येषु (ई) वैयाकरणेषु

(ख) लतासम्बन्धः कलिकोपक्रमश्च कुत्र दृश्यते ?

(अ) स्त्रीषु (आ) पादपेषु

(इ) पुरुषेषु (ई) गृहेषु

(ग) सतीव्रतापदोषाः सूर्यद्युतय इव काः ?

(अ) गावः (आ) कुलस्त्रियः

(इ) प्रजाः (ई) राजमहिष्यः

(घ) कति वसवः ?

(अ) अष्टौ (आ) नव

(इ) दश (ई) एकादश

(ङ) आर्यावर्ते गृहे-गृहे कीदृश्यः स्त्रियो भवन्ति ?

(अ) रम्भाः स्त्रियः (आ) गौर्यः स्त्रियः

(इ) चञ्चलाः स्त्रियः (ई) कुलटाः स्त्रियः

## २. सर्वे प्रश्नाः समाधेयाः -

(क) यस्मिन्नार्यावर्ते प्रजाः कथं निवसन्ति ?

(ख) आर्यावर्ते कीदृशाः ग्रामाः सन्ति ?

(ग) आर्यावर्ते कीदृशाः नगरप्रदेशाः?

(घ) आर्यावर्तदेशः कथं स्वर्गाद् विशिष्यते ?

(ङ) आर्यावर्तः केषां शरण्यः ?

(च) नलचम्पूकाव्ये कति उच्छ्वासाः सन्ति ?

(छ) नलचम्पूः आख्यायिका उत कथा?

## ३. अधोलिखितानां पदानां सन्धिनिर्देशपुरस्सरं सन्धिविच्छेदं कुरुत -

| | सन्धिविच्छेदः | सन्धिनामः |
|---|---|---|
| (क) भारतालङ्कारभूतः | ............... + ............... | ............... ............... |
| (ख) सन्निपातस्तालेषु | ............... + ............... | ............... ............... |
| (ग) यस्मिन्ननवरतम् | ............... + ............... | ............... ............... |
| (घ) धर्मोपदेशः | ............... + ............... | ............... ............... |
| (ङ) क्षयस्तिथिषु | ............... + ............... | ............... ............... |
| (च) स्वर्गान्न | ............... + ............... | ............... ............... |

## ४. अधोलिखितानां पदानां समासनिर्देशपूर्वकं समासनाम लिखत -

| | | समासविग्रहः | समासनाम |
|---|---|---|---|
| (क) | भारतालङ्कारभूतः | .............................. | .............................. |
| (ख) | मनोहरः | .............................. | .............................. |
| (ग) | ग्रहसङ्क्रान्तिः | .............................. | .............................. |
| (घ) | नगरप्रदेशाः | .............................. | .............................. |
| (ङ) | आर्यावर्तः | .............................. | ............................. |
| (च) | सकलसंसारसुखभाजः | .............................. | .............................. |

## ५. रिक्तस्थानानि पूरयत -

(क) यत्र च ....................................................... केदाराः।

(ख) नास्ति सा ....................................................... पयोधरा।

(ग) ....................................................... पीनपयोधरा।

(घ) भवन्ति ....................................................... विपल्लवाः।

(ङ) जायन्ते ....................................................... विपल्लवाः।

(च) यत्र च लतासम्बन्धः .................................................।

.............................. तुहिनाचलस्थलीषु श्रूयते न प्रजासु॥

## ६. समुचितं मेलनं कुरुत -

| | | |
|---|---|---|
| (क) | सूर्यद्युतयः | प्रधानभूतः |
| (ख) | कुलस्त्रियः | गावः |
| (ग) | केदाराः | पात्रम् |
| (घ) | अग्रणीः | दिवाकरप्रभाः |
| (ङ) | पीवरोधस इव सरितः | कुलाङ्गनाः |
| (च) | आस्पदम् | परिष्कृतक्षेत्राणि |

## ७. अधोलिखितानां तिङन्तपदानां धातु-लकार-पुरुष-वचनानि निर्दिशत -

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | विदन्ति | ............... | ............... | ............... | ............... |
| (ख) | दृश्यते | ............... | ............... | ............... | ............... |

| | | | | | |
|---|---|---|---|---|---|
| (ग) | सन्ति | ............... | ............... | ............... | ............... |
| (घ) | भवन्ति | ............... | ............... | ............... | ............... |
| (ङ) | जायन्ते | ............... | ............... | ............... | ............... |
| (च) | विशिष्यते | ............... | ............... | ............... | ............... |
| (छ) | श्रूयते | ............... | ............... | ............... | ............... |

### ८. कोष्ठकाद् उचितपदानि चित्वा रिक्तस्थानं पूरयत -

आर्याः, पुरुषायुषजीविन्यः, वैयाकरणः, तुरगः, कादम्बरी, वापी, देशः

(क) वापिन् + इन् .........................

(ख) पुरुषायुष-जीव् + इन् + ङीप् .........................

(ग) कादम्ब + रा + क + ङीष् .........................

(घ) तुर + गम् + ड .........................

(ङ) व्याकरण + अण् .........................

(च) ऋ + ण्यत् .........................

(छ) दिश् + घञ् .........................

### ९. प्रयोगपरिवर्तनं कुरुत -

(क) यस्य सा नारी नास्ति यत्र न वापी न पयोधरा च यत्र न वा पीनपयोधरा स्त्री न दृश्यते।

(ख) फाल्गुने मासि वृक्षशाखाः विपल्लवाः भवन्ति तु लोकस्य कदापि विपल्लवाः न च जायन्ते।

(ग) यत्र च लतासम्बन्धकलिकोपक्रमश्च पादपेषु दृश्यते न च पुरुषेषु।

(घ) यत्र च मरकवार्त्ता परमहिमोघातश्च तुहिनाचलस्थालीषु श्रूयते, न प्रजासु।

(ङ) असौ पुण्यतमो देशः कस्य प्रियो न भवेत्।

### १०. आर्यावर्तो नाम देशः कीदृशः इति विवृणुत।

## योग्यता-विस्तारः

सदूषणापि निर्दोषा सखरापि सुकोमला।
नमस्तस्मै कृता येन रम्या रामायणी कथा॥

**व्याख्याः -** येन = आदिकविना, सदूषणापि = दोषसहितापि, निर्दोषा = दोषरहिता (इति विरोधः सदूषणापि-दूषणेन रावणभ्रात्रा राक्षसेन सहिता अपि इति तत्परिहारः), सखरा अपि - खरेण कठोरतागुणेन सहिता अपि, सुकोमला - समृद्धी (इति विरोधः सखरा अपि खरेण खरनामकराक्षसेन सहिता अपि इति तत्परिहारः), रम्या - रमणीया, रामायणी कथा - रामचरित-सम्बन्धिनी प्रबन्धरचना, कृता - विरचिता, तस्मै नमः - तं नमस्करोमि।

**आर्यावर्त्तस्य परिधिः**

आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात्।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः॥

*मनुस्मृतिः ......*

**आचार्यस्य लक्षणम् -**

आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि।
स्वयमाचरते यस्मादाचार्यस्तेन कथ्यते॥

गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥

*विष्णुपुराणम् २.३.२४*

**अष्टवसुः**

धरो ध्रुवश्च सोमश्च विष्णुश्चैवाऽनिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ क्रमान्मताः॥

# अष्टमः पाठः

# मुद्राराक्षसम्

## ग्रन्थपरिचयः -

मुद्राराक्षसं संस्कृतवाङ्मयस्य एकमुत्कृष्टम् ऐतिहासिकं राजनैतिकं नाटकम्। नाटकस्यास्य रचयिता विशाखदत्तः। अस्य रचना चतुर्थशताब्द्याम् अभवत्। मुद्राराक्षसम् अतिरिच्य कृतिद्वयं विद्यते विशाखदत्तस्य, यथा - देवीचन्द्रगुप्तम्, अभिसारिकवञ्चितकं च। नाट्यग्रन्थेऽस्मिन् चाणक्यचन्द्रगुप्तसम्बद्धवृत्तमाश्रित्य चाणक्यस्य राजनैतिकांशः अतीव उत्कृष्टतया विश्लेषितः। विशाखदत्तेन नाट्यग्रन्थेऽस्मिन् इतिहासराजनीत्योः सुष्ठु समन्वयः कृतः।

मुद्रया गृहीतो राक्षसः यस्मिन् तद् मुद्राराक्षसम्। नाटकेऽस्मिन् सप्त अङ्काः सन्ति। नाट्यकारेण विशाखदत्तेन चाणक्यराक्षसयोः योजना प्रतियोजना उत्तमया राजनैतिकरीत्या उपस्थापिताः। अत्र चाणक्यस्य कूटनीति अतीव विलक्षणा दृश्यते।

## कथावस्तु -

मुद्राराक्षसस्य कथावस्तुनः मुख्याधारः भवति महामात्यः राक्षसः। राक्षसस्य योग्यतां स्वामिभक्तिञ्च परिलक्ष्य चाणक्यः तं चन्द्रगुप्तस्य महामात्यं कर्तुम् ऐच्छत्। कौटिल्यः सुष्ठु जानाति यत् राजनीतिनिपुणः तथा स्वामिभक्तः राक्षसः यदि चन्द्रगुप्तस्य मन्त्रित्वं स्वीकरिष्यत् तर्हि राज्यमिदं स्थिरम् अभविष्यत्, एवञ्च भारतराष्ट्रम् एकस्य शक्तिशालिप्रशासकस्य अधीनत्वं प्राप्स्यत्। नाटकस्य अस्य इतिवृत्तम् एवं भवति -

प्रथमाङ्के चाणक्यः गुप्तचरेभ्यः सूचनां प्राप्नोति यत् कुसुमपुरे राक्षसस्य त्रयः विश्वस्ताः कार्यरताः सन्ति – क्षपणकः, शकटदासः, चन्दनदासः च। चन्दनदासस्य गृहे एव राक्षसस्य परिवारः निवसति। चाणक्यः गुप्तचरस्य सकाशात् चन्दनदासस्य गृहे राक्षसनामाङ्किताम् एकां मुद्रां प्राप्नोति। तस्याः मुद्रायाः साहाय्येन चाणक्यः शकटदासेन एकं कूटलेखं लेखयित्वा तं मुद्रयति। एषैव मुद्रा राक्षसस्य पराजयस्य कारणं भवति।

द्वितीये अङ्के राक्षसस्य राजनैतिकबुद्धेः प्रारम्भिकपराजयः निदर्शितः। राक्षसः गुप्तचरद्वारा कुसुमपुरस्य प्रवेशकाले चन्द्रगुप्तं हन्तुं गोप्ययोजनाम् अकरोत्, परन्तु चाणक्यस्य जागरुकतायाः कारणात् राक्षसस्य इयं योजना व्यर्था अभवत्।

तृतीये अङ्के कौमुदीमहोत्सवस्य मनोरञ्जकं वृत्तं वर्तते। अत्र चन्द्रगुप्तेन सह चाणक्यस्य कृतककलहस्य घटना घटते। चाणक्यः ज्ञात्वा राजाज्ञाम् उच्चरते। राक्षसः एतज्ज्ञात्वा 'स्वयोजना सफला' इति चिन्तयति।

चतुर्थेऽङ्के राक्षसः स्वयोजनां व्यर्थां पश्यति। स पर्वतराजकुमारं मलयकेतुं नन्दस्य सिंहासने उपवेशयितुम् इच्छति। मलयकेतुः प्रसन्नः सन् स्वाभूषणम् उपायनरूपेण राक्षसाय प्रेषयति।

पञ्चमेऽङ्के मुद्रितलेखेन आभूषणपेटिकया च सह सिद्धार्थकः गृहीतः। मलयकेतुः ज्ञातवान् यत् राक्षसः गोपनतया चन्द्रगुप्तेन सह मिलितः अस्ति। अस्य विरोधः केवलं चाणक्येन सहास्ति।

षष्ठेऽङ्के राक्षसः चन्दनदासम् अन्विष्यन् पाटलिपुत्रं प्राप्नोति। तत्र गत्वा स एकस्मात् जनात् सूचनां प्राप्नोति यत् चन्दनदासस्य प्राणाः सङ्कटापन्नाः सन्ति इति।

सप्तमेऽङ्के चाण्डालं चन्दनदासं हन्तुं वधस्थानं नयति। चन्दनदासपत्न्याः आर्त्तविलापे सति राक्षसः सहायः भूत्वा उपतिष्ठते। अत्रैव राक्षसः चन्द्रगुप्तस्य मन्त्रित्वम् अङ्गीकरोति।

प्रस्तुतोऽयं पाठ्यांशः मुद्राराक्षस्य प्रथमाङ्कात्सङ्गृहीतोऽस्ति।

**धन्या केयं स्थिता ते शिरसि शशिकला किं नु नामैतदस्या**
**नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः।**
**नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-**
**र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः॥ १॥**

**अन्वयः** - का इयं धन्या ते शिरसि स्थिता ? शशिकला, एतत् नाम नु किम् ? अस्या नाम एव। तदेतत् ते परिचितमपि कस्य हेतोः विस्मृतम्। नारीं पृच्छामि इन्दुं न - यदि इन्दुः प्रमाणं न, विजया कथयतु। इति देव्याः, सुरसरितं निह्नोतुम् इच्छोः विभोः शाठ्यं वः अव्यात्।

**सूत्रधारः** - आर्ये ! तिष्ठतु तावदाज्ञानियोगः। कथय किमद्य भवत्या तत्र भवतां ब्राह्मणानामुपनिमन्त्रणेन कुटुम्बमनुगृहीतमभिमता वा भवनमतिथयः सम्प्राप्ता, यत एष पाकविशेषारम्भः ?

**नटी** - आर्य ! आमन्त्रिता मया भगवन्तो ब्राह्मणाः।

**सूत्रधारः** - आर्ये ! कृतश्रमोऽस्मि चतुःषष्ट्यङ्गे ज्योतिःशास्त्रे। तत्प्रवर्त्यतां भगवतो ब्राह्मणानुद्दिश्य पाकः। चन्द्रोपरागम्प्रति तु केनापि विप्रलब्धासि। पश्य -

क्रूरग्रहः स केतुश्चन्द्रं सम्पूर्णमण्डलमिदानीम्।
अभिभवितुमिच्छति बलात् ........... (इत्यर्धोक्ते)।

(नेपथ्ये)

आः, क एष मयि स्थिते चन्द्रमभिभवितुमिच्छति बलात्।

**सूत्रधारः** - .............................. रक्षत्येनं तु बुधयोगः॥६॥

**नटी** - आर्य ! कः पुनरेष धरणीगोचरो भूत्वा चन्द्रं ग्रहाभियोगात् रक्षितुमिच्छति ?

**सूत्रधारः** - आर्ये ! यत्सत्यं मयापि नोपलक्षितः। भवतु। भूयोऽभियुक्तः स्वरव्यक्तिमुपलप्स्ये।

**सूत्रधारः** - (आकर्ण्य) आर्ये ! ज्ञातम्, कौटिल्यः।

**सूत्रधारः** - कौटिल्यः कुटिलमतिः स एष येन क्रोधाग्नौ प्रसभमदाहि नन्दवंशः।
चन्द्रस्य ग्रहणमिति श्रुतेः सनाम्नो मोर्येन्दोर्द्विषदभियोग इत्यवैति॥७॥

**अन्वयः** - येन, क्रोधाग्नौ, नन्दवंशः प्रसभमदाहि, स एष, कुटिलमतिः कौटिल्यः, चन्द्रस्य ग्रहणम्, इति श्रुतेः सनाम्नः मौर्येन्दोः, द्विपदभियोग, इति अवैति।

**चाणक्यः** - नन्दकुलकालभुजगीं कोपानलबहुलनीलधूमलताम्।
अद्यापि वध्यमानां वध्यः को नेच्छति शिखां मे॥९॥

**अन्वयः** - वध्यः कः, नन्दकुलकालभुजङ्गीम्, कोपानलबहुलनीलधूमलताम्, मे शिखाम्, अद्यापि, वध्यमानां न इच्छति।

**चाणक्यः** - शार्ङ्गरव ! शार्ङ्गरव !

**शिष्यः** - उपाध्याय ! आज्ञापय।

**चाणक्यः** - वत्स ! उपवेष्टुम् इच्छामि।

**शिष्यः** - नन्वियं सन्निहितवेत्रासनैव द्वारकाप्रकोष्ठशाला। तदस्यामुपवेष्टुमर्हत्युपाध्यायः।

**चाणक्यः** - वत्स ! कार्याभिनियोग एवास्मान् व्याकुलयति, न पुनरुपाध्यायसहभूः शिष्यजने दुःशीलता। (नाट्येनोपविश्य आत्मगतम्)

**ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते**
**तं गच्छन्त्यनु ये विपत्तिषु पुनस्ते तत्प्रतिष्ठाशया।**
**भर्तुर्ये प्रलयेऽपि पूर्वसुकृतासङ्गेन निःसङ्गया**
**भक्त्या कार्यधुरां वहन्ति कृतिनस्ते दुर्लभस्त्वादृशाः॥१४॥**

**अन्वयः** - अयं लोकः ऐश्वर्यात् अनपेतम् ईश्वरम् अर्थतः सेवते। ये पुनः विपत्तिषु तमनुगच्छन्ति, ते तत्प्रतिष्ठाशया। त्वादृशाः कृतिनः ये भर्तुः प्रलयेऽपि पूर्वसुकृतासङ्गेन, निःसङ्गया भक्त्या कार्यधुरां वहन्ति ते दुर्लभाः।

अत एवास्माकं त्वत्सङ्ग्रहे यत्नः कथमसौ वृषलस्य साचिव्यग्रहणेन सानुग्रहः स्यादिति। कुतः -

**अप्राज्ञेन च कातरेण च गुणः स्याद्भक्तियुक्तेन कः**
**प्राज्ञाविक्रमशालिनोऽपि हि भवेत्किं भक्तिहीनात्फलम्।**
**प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये**
**ते भृत्या नृपतेः कलत्रमितरे सम्पत्सु चापत्सु च॥ १५॥**

**अन्वयः -** अप्राज्ञेन च कातरेण च कः गुणः स्यात्, प्रज्ञाविक्रमशालिनोपि भक्तिहीनात् किं फलं भवेत्, येषां प्रज्ञाविक्रमभक्तयः समुदिता गुणाः ते भृत्याः नृपतेः सम्पत्सु आपत्सु च भूतये इतरे कलत्रम्।

**चाणक्यः -** शार्ङ्गरव !

**शिष्यः -** उपाध्याय ! आज्ञापय।

**चाणक्यः -** वत्स ! श्रोत्रियाक्षराणि प्रयत्नलिखितान्यपि नियतमस्फुटानि भवन्ति। तदुच्यतामस्मद्वचनात् सिद्धार्थकः। एभिरक्षरैः केनापि कस्यापि स्वयं वाच्यमिति अदत्तबाह्यनामानं लेखं शकटदासेन लेखयित्वा मामुपतिष्ठस्व। न चाख्येयमस्मै चाणक्यो लेखयतीति।

**शिष्यः -** तथा (इति निष्क्रान्तः)।

**चाणक्यः -** हन्त जितो मलयकेतुः (प्रविश्य लेखहस्तः)

**सिद्धार्थकः -** जयत्वार्यः । आर्य ! अयं स शकटदासेन लिखितो लेखः।

**चाणक्यः -** (गृहीत्वा) अहो दर्शनीयान्यक्षराणि, (अनुवाच्य) भद्र ! अनया मुद्रया मुद्रयैनम्।

**सिद्धार्थकः -** (तथा कृत्वा) आर्य ! अयं मुद्रितो लेखः। किमपरमनुष्ठीयताम्।

**चाणक्यः -** प्रथमं तावद्वध्यस्थानं गत्वा घातकाः सरोषदक्षिणाक्षिसंकोचसंज्ञां ग्राहयितव्याः। ततस्तेषु गृहीतसंज्ञेषु भयापदेशादि ततस्ततः प्रद्रूतेषु शकटदासो वध्यस्थानादपनीय राक्षसं प्रापयितव्यः। तस्माच्च सुहृत्प्राणपरितुष्टात्पारितोषिकं ग्राह्यम्। राक्षसः एव कञ्चित्कालं सेवितव्यः। ततः प्रत्यासन्नेषु परेषु प्रयोजनमिदमनुष्ठेयम्।

**सिद्धार्थकः -** यदार्य आज्ञापयति।

**चाणक्यः -** उच्यतामस्मद्वचनात् कालपाशिको दण्डपाशिकश्च यथा वृषलः समाज्ञापयति य एष क्षपणको जीवसिद्धिर्नाम राक्षसप्रयुक्तो विषकन्यया पर्वतकं घातितवान् स एनमेव दोषं प्रख्याप्य सनिकारं नगरान्निर्वास्यतामिति।

**चाणक्यः** - वत्स ! तिष्ठ तिष्ठ। योऽयमपरः कायस्थः शकटदासो नाम राक्षसप्रयुक्तो नित्यमस्मच्छरीरमभिद्रोग्धुमिह प्रयतते, स चाप्येनं दोषं प्रख्याप्य शूलमारोप्यतां गृहजनश्चास्य बन्धनागारं प्रवेश्यतामिति।

**शिष्यः** - तथा (इति निष्क्रान्तः)

**चाणक्यः** - (चिन्तां नाटयित्वा आत्मगतम्) अपि नाम दुरात्मा राक्षसो गृह्येत।

**सिद्धार्थकः** - आर्य ! गृहीतः।

**चाणक्यः** - (सहर्षमात्मगतम्) हन्त ! गृहीतो राक्षसः (प्रकाशम्) भद्र ! कोऽयं गृहीतः।

**सिद्धार्थकः** - गृहीत आर्यसन्देशः। तस्माद् गमिष्यामि कार्यसिद्ध्यै।

**चाणक्यः** - गम्यताम् । अस्तु ते कार्यसिद्धिः।

(प्रविश्य)

**शिष्यः** - उपाध्याय ! कालपाशिको दण्डपाशिकश्च उपाध्यायं विज्ञापयतः। इदमनुष्ठीयते देवस्य चन्द्रगुप्तस्य शासनमिति।

**चाणक्यः** - शोभनम् । वत्स ! मणिकारश्रेष्ठिनं चन्दनदासम् इदानीं द्रष्टुमिच्छामि।

**शिष्यः** - तथा (इति निष्क्रम्य चन्दनदासेन सह प्रविश्य) इत इतः श्रेष्ठिन् !

**चन्दनदासः** - आर्य ! अयमागच्छामि, (स्वगतम्) दिष्ट्या मित्रकार्येण मे विनाशो न पुरुषदोषेण।

**चाणक्यः** - (सहर्षम्) हन्त ! लब्ध इदानीं राक्षसः। कुतः ?

त्यजत्यप्रियवत् प्राणान् यथा तस्यायमापदि।
तथैवस्यापदि प्राणा नूनं तस्यापि न प्रियाः॥२४॥

**अन्वयः** - यथा तस्य आपदि अयं प्राणान् अप्रियवत् त्यजति, तथा एव अस्य आपदि तस्य प्राणाः नूनं न प्रियाः।

## शब्दार्थाः

| | |
|---|---|
| राजनैतिकरीत्या | राजनैतिकदिशा |
| स्व्यकरिष्यत् | यदि स्वीकुर्यात् |
| उच्चरते | उल्लङ्घयति |
| धन्या | भाग्यवती |
| शशिकला | चन्द्रस्य भागविशेषः |

| | |
|---|---|
| इन्दुम् | चन्द्रमसम् |
| सुरसरितम् | गङ्गाम् |
| निह्नतुम् | गोपनं कर्तुम् |
| इच्छोः | अभिलषितस्य/इच्छुकस्य |
| विभोः | व्यापकस्य/शिवस्य |
| शाठ्यम् | चातुर्यम् |
| अव्यात् | पायात्/रक्षेत् |
| आज्ञानियोगः | आदेशप्रदानम् |
| अभिमता | वाञ्छिता |
| कृतश्रमः | यः श्रमं कृतवान् |
| प्रवर्त्यताम् | पाकविशेषं करोतु |
| अभिभवितुम् | पराजेतुम् |
| धरणीगोचरः | भूमिस्थः |
| ग्रहाभियोगात् | राहुग्रासात् |
| स्वरव्यक्तिम् | कण्ठरवेण विशिष्टजनम् |
| उपलप्स्ये | ज्ञास्यामि |
| प्रसभम् | बलात् |
| अदाहि | अग्निसात् कृतः |
| श्रुतेः | चन्द्रग्रहणशब्दश्रवणात् |
| सनाम्नः | समानं नाम यस्य |
| द्विषदभियोगः | शत्रुणा आक्रमणम् |
| अवैति | जानाति |
| अनपेतम् | अरहितम् |
| तत्प्रतिष्ठाशया | राज्यादिलाभस्य आशया |
| पूर्वकृतासङ्गेन | पुराकृतसंरक्षणादेः अविस्मरणेन |
| निःसङ्गया | स्वार्थरहितया |
| कार्यधुराम् | कार्यभारम् |

| | |
|---|---|
| कातरेण | कापुरुषेण |
| प्रज्ञाविक्रमशालिनोऽपि | बुद्धिसामर्थ्ययुक्तादपि |
| भूतये | कल्याणाय |
| श्रोत्रियाक्षराणि | वेदपाठिनः अक्षराणि |
| ग्राहयितव्याः | बोधयितव्याः |
| प्रद्रुतेषु | पलायितेषु |
| अभिद्रोग्धुम् | विनाशयितुम् |

## अभ्यासः

**१. सर्वे प्रश्नाः समाधेयाः -**

(क) मुद्राराक्षसनाटके कति अङ्काः वर्तन्ते ?

(ख) मुद्राराक्षसं केन विरचितम् ?

(ग) का इयं धन्या शिवस्य शिरसि स्थिता ?

(घ) 'विभोः' इत्यस्य कोऽर्थः ?

(ङ) 'आर्ये ! तिष्ठतु तावदाज्ञानियोगः' कस्य उक्तिरियम् ?

(च) केन क्रोधाग्नौ असभमदाहि नन्दवंशः ?

**२. रिक्तस्थानं पूरयत -**

(क) अयं लोकः .................... ईश्वरम् अर्थतः सेवते।

(ख) ते नृपते भृत्या .................... सम्पत्सु आपत्सु च।

(ग) अदत्तबाह्यनामानं लेखं .................... लेखयित्वा मामुपतिष्ठस्व।

(घ) हन्त जितो ....................।

(ङ) मणिकारश्रेष्ठिनं .................... इदानीं द्रष्टुमिच्छामि।

(च) त्यजत्यप्रियवत् .................... यथा तस्यायमापदि।

**४. कोष्ठकात् चित्वा रिक्तस्थानं पूरयत -**

| |
|---|
| चन्द्रगुप्तम्, राक्षसः, प्रतिष्ठाशया, शिखां, पुरुषदोषेण, चन्दनदासेन |

(क) अयं स .................... लिखितो लेखः।

(ख) दिष्ट्या मित्रकार्येण मे विनाशो न ....................।

(ग) हन्त लब्ध इदानीं ....................।

(घ) क एष मयि स्थिते .................... अभिभवितुमिच्छति।

(ङ) विपत्तिषु पुनस्ते ....................।

(च) को नेच्छति .................... मे।

## ५. समुचितं मेलयत -

| | | |
|---|---|---|
| (क) | प्राणा नूनं तस्यापि | अव्याद्विभोर्वः |
| (ख) | निःसङ्गया | बुधयोगः |
| (ग) | शाठ्यम् | कुटिलमतिः |
| (घ) | रक्षत्येनं तु | स्वार्थरहितया |
| (ङ) | कौटिल्यः | न प्रियाः |

## ६. प्रयोगपरिवर्तनं कुरुत -

(क) का इयं धन्या ते शिरसि स्थिता ?

(ख) विभोः शाठ्यं वः अव्यात्।

(ग) यत्सत्यं मयापि नोपलक्षितः।

(घ) मया दुरात्मा राक्षसो गृह्येत।

(ङ) अस्तु ते कार्यसिद्धिः।

## ७. रेखाङ्कितपदान्याश्रित्य कारकविभक्ती स्पष्टयत -

(क) अयं लोकः ऐश्वराद् अनपेतम् ईश्वरम् अर्थतः सेवते।

(ख) ये पुनः विपत्तिषु तम् अनुगच्छन्ति।

(ग) तस्माद् गमिष्यामि कार्यसिद्ध्यै।

(घ) आमन्त्रिता मया भगवतो ब्राह्मणाः।

(ङ) तस्य प्राणाः नूनं न प्रियाः।

## ८. अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासनाम लिखत -

| | | विग्रहवाक्यम् | समासनाम |
|---|---|---|---|
| (क) | शशिकला | ............... ............... | ............... ............... |
| (ख) | मुद्राराक्षसम् | ............... ............... | ............... ............... |
| (ग) | कृतश्रमः | ............... ............... | ............... ............... |

(घ) क्रूरग्रहः ............... ............... ............... ...............

(ङ) कुटिलमतिः ............... ............... ............... ...............

(च) क्रोधाग्निः ............... ............... ............... ...............

(छ) अप्राज्ञः ............... ............... ............... ...............

(ज) प्रत्यासन्नः ............... ............... ............... ...............

९. **मुद्राराक्षसनाटकस्य कथावस्तु स्वकीयाभिः गिर्भिः वर्णयत।**

## योग्यता-विस्तारः

**श्लोकसंख्या १ -** **पार्वती** - भवतः शिरसि उपविष्टा का इयं भाग्यवती। **शिवः** - चन्द्रकला। **पार्वती** - किम् एतदेव तस्याः नाम ? **शिवः** - नामैव अस्याः, तदेतत् ते परिचितमपि, कथं त्वया विस्मृतम् ? **पार्वती** - अहं चन्द्रं न पृच्छामि नारीं पृच्छामि। **शिवः** - यदि मद्वचने त्वं विश्वासं न करोषि तर्हि ते सखी विजया कथयेत्। इत्थं पार्वत्याः सन्देहाद् गङ्गां रक्षितुम् अभिलषितस्य शिवस्य चातुर्यं युष्मान् पातु।

**श्लोकसंख्या ७ -** कुटिलमतिः कौटिल्यः, यः सम्पूर्णं नन्दवंशं स्वक्रोधाग्नौ दग्धवान्। इदानीं चन्द्रग्रहणम् इति श्रुत्वा नामसाम्यात् 'शत्रुणा चन्द्रगुप्तस्य आक्रमणम्' इति ज्ञातवान्।

**श्लोकसंख्या ५ -** सः कः मर्तुम् - इच्छति ? यः नन्दवंशस्य कालसर्पिणीं मम कोपानलात् निर्गतां धूमलताम् इव शिखां वध्यमानां न इच्छति।

**श्लोकसंख्या १४ -** सामान्यजनः स्वार्थात् शक्तिमतः प्रभोः सेवां करोति। केचन राज्यलाभादेराशया विपत्तिग्रस्तप्रभुमपि सेवन्ते, किन्तु प्रभोः सम्पत्सु आपत्सु चापि तस्य पूर्वकृतानुग्रहं स्मरन् यः भक्त्या कार्यभारं निर्वहति, त्वादृशः कृतज्ञः विरलः एव।

**श्लोकसंख्या १५ -** बुद्धिहीनेन कापुरुषेण च प्रभुभक्तेन सेवकेन किं प्रयोजनम् ? इत्थं यः बुद्धिमान् शौर्यसम्पन्नश्च किन्तु राज्यभक्तिहीनः, तेन वा किं प्रयोजनम् ? प्रकृतसेवकः तु स भवति य बुद्धिमान् पराक्रमी तथा भक्तिमान् भवति। ते सर्वेऽपि राजसेवका एव मे सम्पत्सु आपत्सु च कलत्रमिव भृत्याः।

# नवमः पाठः

# ज्योतिषशास्त्रम्

वेदस्य हि षट्स्वङ्गेषु ज्योतिषमन्यतममङ्गमस्ति। ज्योतिषं हि वेदस्य चक्षुष्ट्वेन स्मर्यते। उक्तञ्च भास्कराचार्यैः -

वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।

संयुक्तोऽपीतरैः कर्णनासादिभिः चक्षुषाङ्गेन हीनो न किञ्चित्करः॥ इति।

ज्योतिःशास्त्रं वेदस्य चक्षुः कथ्यते। उक्तञ्च पाणिनीयशिक्षायाम् - 'ज्योतिषामयनं चक्षुः'। ऋते ज्योतिश्शास्त्रात् तिथि-वार-नक्षत्र-योग-करणम् इति पञ्चाङ्गानां शुभाशुभज्ञानम् एवं पक्ष-मास-ऋतु-अयन-संवत्साराणां शुभाशुभज्ञानं नैव संपत्स्यते। यज्ञाद्यनुष्ठानानां, षोडशानां संस्काराणां, यात्रादीनां च मुहूर्त्तज्ञानाय ज्योतिश्शास्त्रस्य ज्ञानमावश्यकं वर्तते। वास्तुशास्त्रानुसारं मन्दिराणां, यज्ञशालानां, प्रासादादीनां ज्ञानं ज्योतिश्शास्त्रेणैव जायते।

अपरिमिते गगनमण्डले यानि हि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्येव समष्ट्या ज्योतिःशब्देनोच्यन्ते। तेष्वपि यानि हि सदैकरूपगतीनि तानि नक्षत्रशब्देन ज्ञायन्ते, प्रतिदिनं भिन्न-भिन्नगतीनि तु तानि ग्रहशब्देन ज्ञायन्ते। पुनः केचिद् अमृतमयकिरणाः, केचिद्विषभयकिरणाः, केचिदुभयमिश्रकिरणाः, केचित्तूभयधर्महीन-रश्मयश्च स्मृताः। एवं विधम् -

नक्षत्रग्रहतारकादिज्योतिष्पिण्डानां स्थितिगतिप्रभावादिवर्णनपरं शास्त्रमेव ज्योतिषपदेनाभिधीयते। वस्तुतस्तु शास्त्रमिदं ज्योतिषं ज्योतिर्विषयकमस्ति।

## सिद्धान्तसंहिता -

**होरारूपं स्कन्धत्रयात्मकम्।**

**वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमकल्मषम्॥**

**विनैतदखिलं श्रौतं स्मार्तं कर्म न सिध्यति।**

**तस्माज्जगद्धितायेदं ब्रह्मणा निर्मितं पुरा॥**

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**

**तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान्॥**

ज्योतिषशास्त्रं सिद्धान्त-संहिता-होराभेदेन त्रिषु स्कन्धेषु विभक्तमस्ति।

१. सिद्धान्तस्कन्धः - अयं गणितशब्देनाऽप्यभिधीयते। स्कन्धोऽयमपि ग्रहगणित-पाटीगणित-बीजगणितभेदेन त्रिविधः।

२. संहितास्कन्धः - स्कन्धोऽयं कालचक्रं मुहूर्तादि विवृणोति।

३. होरास्कन्धः - होरास्कन्धस्तु जातकताजिकभेदेन द्विधा विभक्तोऽस्ति। अयमेव फलितज्योतिषनाम्नाऽपि व्यवह्रियते।

शास्त्रस्यास्योपयोगो व्यवहारे बहुमुखः। अतः जनैः इदं शास्त्रं व्यवहारशास्त्रत्वेन समाद्रियते। ग्रहाणां कालावस्थागत्यादिनिर्देशेन कर्मसम्पादननिमित्तकमुहूर्तादिकथनेन शुभाशुभफलकथनेन चेदं शास्त्रं जनान् प्रत्यक्षमेवोपकरोति। शास्त्रदृष्ट्या व्यवहारदृष्ट्या चोपयोगित्वेनैवेदं वेदाङ्गेषु मूर्धन्यत्वेन स्मर्यते।

यथोक्तं लगधमुनिना -

**यथा शिखा मयूराणां नागानां मणयो यथा।**

**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम्॥ इति।**

मुहूर्तज्ञानं दिग्ज्ञानं तिथिवारादिज्ञानञ्च ज्योतिषशास्त्रादेव भवति। येन विना व्यवहार एव न सिध्यति। तेनैवोक्तं स्यात् -

**प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यस्य साक्षिणौ। इति।**

ग्रहणविषये ग्रहस्थितिविषये पृथ्वीस्वरूपगतिविषये ग्रहादिगतिस्थितिप्रभावादिविषये चास्य मौलिकाः सिद्धान्ताः वर्तन्ते।

सत्यमेव उक्तमस्य महिम्नि -

**वेदस्य निर्मलं चक्षुः ज्योतिः शास्त्रमकल्मषम्।**

**विनैतदखिलं श्रौतं स्मार्तं कर्म न सिद्ध्यति ।**

सर्वाण्यपि दर्शनानि, सकलानि शास्त्राणि, सर्वाः च उपनिषदः येषां हि परमरहस्यभूतानां वेदानां सौन्दर्यसुधां सततं पिबन्त्यः अपि न तृप्यन्ति। यज्ञानां प्रतिपादनाय एव वेदाः प्रवृत्ताः। तेषां हि यज्ञानां विधानं समुचिते काले विधीयते चेत् तदैव तत्फलं लभ्यते। ज्यौतिःशास्त्रं यज्ञविधानस्य युक्ततरं कालं निर्दिशति तस्मादेतच्छास्त्रं तत्कालविधायकशास्त्रम् इत्येतेन च नाम्ना भुवि सर्वत्र प्रख्यातं वर्त्तते।




**सौरवर्षम् -**

सूर्यं परितः पृथिव्याः परिक्रमायां पञ्चषष्ट्यधिकत्रिशतं दिनानि (३६५) पञ्चदश होराः (१५) एकादश निमेषाः (११) इत्येतावान् समयः अपेक्ष्यते। इदं कालचक्रमेव सौरवर्षम् इत्युच्यते।

**चान्द्रवर्षम् -**

पृथिव्याः चन्द्रमसः परिक्रमायां चतुःपञ्चाशदधिकत्रिशतं दिनानि (३५४) इत्येतावान् समयः अपेक्ष्यते। इदं कालचक्रं चान्द्रवर्षम् इति निगद्यते।

सौरमानम्, चान्द्रमानम् -

**सौरं सूर्यांशयोगेन तिथ्या चान्द्रदिनं स्मृतम्।**
**सूर्योदयोदयान्तस्थं कीर्त्यते सावनं दिनम्॥**

अर्थात् सूर्यस्यैकांशः भोगकालः एकसौरदिनम्, एकतिथ्याः भोगकालः - एकचान्द्रदिनम्, तथा च सूर्योदयतः सूर्योदयपर्यन्तं - एकसावनदिनं कथ्यते।

**सौरमानम् -**

सूर्यस्येदं सौरमानम्। 'सङ्क्रान्त्या सौर उच्यते' इति सूर्यसिद्धान्तोक्त्या -

सूर्यस्यैकांशभोगकालः - एकसौरदिनम्।

सूर्यस्यैकराशिभोगकालः - एकसौरमासः।

एकसौरमासः - त्रिंशत् सौरदिनानि।

त्रिंशत् सौरदिनानि- ३०.२६.१७.३७ सावनदिनानि।

सूर्यस्य द्वादशराशिः भोगकालः - एकसौरवर्षम्।

एकसौरवर्षम् - षष्ट्यधिकत्रिशतं सौरदिनानि।

षष्ट्युत्तरत्रिशतं सौरदिनानि- ३६५.१५.३०.२२.३० सावनदिनानि।

एवमेव भास्कराचार्येणाप्युक्तं यत् -

रवेश्चक्रभोगोऽर्कवर्षप्रदिष्टम् इति।

अर्थात् रवेः एकभचक्रः (१२ राशिचक्रम्) भोगकालः एव रवेः सौरवर्षम् इति भवति।

एतस्मिन् युगे रवेश्चक्रभोगाः ४३'२०'००० एतस्मिताः सिद्धान्तग्रन्थेषु प्रोक्ताः सन्ति। एत एव सहस्रगुणिताः ४'३२०'०००'००० एतस्मिताः कल्पे रवेश्चक्रभोगाः स्वीक्रियन्ते। यतः एककल्पे सहस्रमहायुगानि भवन्ति।

**युगादिमानः**

**त्रिंशत्सौरदिनैर्मासो वर्षं द्वादशभिश्चतैः।**
**तद्देवानामहोरात्रमसुराणां तथैव च॥ १॥**
**सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्।**
**तत्षष्टिः षड्गुणा वर्षदिव्यमासुरमेव च॥ २॥**
**अयुतघ्नैर्हि त्रिवेदैः सौरवर्षैश्च तैः समम्।**
**सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्॥ ३॥**

त्रिंशतः सौरदिनानाम् एकमासः, द्वादशमासानाम् एकवर्षम्, सौरवर्षं देवानाम् असुराणाञ्च अहोरात्रो भवति। यस्मिन् समये देवानां (उत्तरध्रुववासिनां) रात्रिर्भवति। तथा च यदा असुराणां दिनं भवति। तदा देवानां रात्रिर्भवति। सन्ध्यासन्ध्यांशसहितं द्वात्रिंशत्सहस्राधिकचतुर्लक्षस्य (४३००००) सौरवर्षस्य एकं चतुर्युगं भवति।

**चान्द्रमानम् -**

चन्द्रस्येदं चान्द्रमानम् अथवा चन्द्रविषयकं मानं चान्द्रमानम्। एतद्धि तिथिभोगरूपकं विद्यते। रविचन्द्रयोः अंशात्मकान्तरादेतस्य परिज्ञानं भवति। सूर्यसिद्धान्ते प्रोच्यते यत् 'ऐन्दवस्तिथिभिः' इति। अर्थात् तिथिभिश्चान्द्रदिनानि भवन्ति। पुनरपि मानाध्याये प्रोक्तं यत् -

**अर्काद् विनिस्सृतः प्राचीं यद्यात्यहरहः राशिः।**
**तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः॥**

अतः अमान्तादमान्तं यावच्चान्द्रमासो भवति चैत्रवैशाखादिनाम्ना ख्यातः। विषयेऽस्मिन् भास्कराचार्यः एवं भणति - "रवीन्द्रोर्युतिः संयुतिर्यावदन्याविधोर्मास" इति।

## शब्दार्थाः

| | |
|---|---|
| चक्षुष्ट्वेन | नयनत्वेन |
| अकल्मषम् | पापरहितम् |

| | |
|---|---|
| श्रौतम् | वैदिकम् |
| स्मार्तम् | स्मृतिसम्बद्धम् |
| महिम्नि | महिमविषये |
| मूर्ध्नि | शिखरे |
| होरा | त्रिषु स्कन्धेषु एकः |
| भचक्रम् | राशिचक्रम् |
| ऐन्दवस्तिथिभिः | तिथिभिः चान्द्रदिनानि |
| चान्द्रमानम् | चन्द्रविषयकं मानम् |
| सौरमानम् | सूर्यविषयकं मानम् |

## अभ्यासः

१. **बहुविकल्पात्मकाः प्रश्नाः -**

(क) वेदाङ्गेषु ज्योतिषम् अस्ति ?

(अ) घ्राणः (आ) श्रोत्रः

(इ) चक्षुः (ई) हस्तः

(ख) ज्योतिषशास्त्रं कति स्कन्धेषु विभक्तमस्ति ?

(अ) चतुर्षु (आ) पञ्चषु

(इ) त्रिषु (ई) षट्षु

(ग) जनैः इदं शास्त्रं कथं समाद्रियते -

(अ) वैदिकशास्त्रत्वेन (आ) व्याकरणशास्त्रत्वेन

(इ) व्यवहारशास्त्रत्वेन (ई) साहित्यशास्त्रत्वेन

(घ) उत्तरायणं भवति -

(अ) कर्कादिति (आ) मकरादिति

(इ) तुलादिति (ई) सिंहादिति

(ङ) दक्षिणायनं भवति -

(अ) मकरादिति (आ) कन्यादिति

(इ) मीनादिति (ई) कर्कादिति

## २. रिक्तस्थानानानि पूरयत -

(क) प्रत्यक्षं ज्योतिषं शास्त्रं ........................ यस्य साक्षिणौ।

(ख) यथा शिखा ........................ संस्थितम्।

(ग) सिद्धान्तस्संहिता ........................ शास्त्रमकल्मषम्।

(घ) सौरं सूर्यांश ........................ सावनं दिनम्।

(ङ) सुरासुराणामन्योन्यम्........................ मेव च॥

## ३. अधोलिखितप्रश्नानां संस्कृतभाषया उत्तराणि लिखत -

(क) ज्योतिषशास्त्रं कति स्कन्धेषु विभक्तमस्ति ? नामानि लिखत।

(ख) 'ज्योतिः' शब्देन किमुच्यते ?

(ग) सङ्क्रान्त्या किम् उच्यते ?

(घ) सूर्यस्यैकांशभोगकालः किं कथ्यते ?

(ङ) एकस्मिन् सौरमासे कति सौरदिनानि भवन्ति ?

## ४. सर्वे प्रश्नाः समाधेयाः -

(क) राशयः कति ? नामानि लिखत।

(ख) चन्द्रविषयकं मानं कथं विद्यते ?

(ग) एकसौरवर्षं कथं भवति ?

(घ) उत्तरध्रुववासिनां दिनं कदा भवति ?

(ङ) एककल्पे कति महायुगानि भवन्ति ?

## ५. यथायोग्यं संयोजयत -

| | |
|---|---|
| (क) उत्तरायणम् | एकचान्द्रदिनम् |
| (ख) हेमन्त-ऋतुः | मकरादिति |
| (ग) एकतिथ्याभोगकालः | मार्गशीर्षमासः |
| (घ) सूर्योदयतः सूर्योदयपर्यन्तं | एकसौरवर्षम् |
| (ङ) सूर्यस्यद्वादशराशिभोगकालः | एकसावनदिनम् |

६. **सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत -**

| | | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | विनैतद् | .............. + .............. | .............. .............. |
| (ख) | शास्त्रादेव | .............. + .............. | .............. .............. |
| (ग) | शुभाशुभः | .............. + .............. | .............. .............. |
| (घ) | दिग्ज्ञानम् | .............. + .............. | .............. .............. |
| (ङ) | अस्योपयोगिता | .............. + .............. | .............. .............. |

७. **समासविग्रहं कृत्वा समासस्य नाम निर्दिशत -**

| | | विग्रहवाक्यम् | समासनाम |
|---|---|---|---|
| (क) | अहोरात्रम् | ............................ | ............................ |
| (ख) | चन्द्रार्कौ | ............................ | ............................ |
| (ग) | पृथ्वीस्वरूपम् | ............................ | ............................ |
| (घ) | सौरमानम् | ............................ | ............................ |
| (ङ) | सूर्यांशः | ............................ | ............................ |

८. **अधोलिखितानि पदानि चित्वा रिक्तस्थानानि पूरयत -**

ज्ञायन्ते, कीर्त्यते, वृणोति, वर्तन्ते, व्यवह्रियते, उक्तम्, सिध्यति, पिबन्त्यः।

(क) वच् + क्त ........................

(ख) वृत् + झ ........................

(ग) कृत् + य + त ........................

(घ) सिध् + ति ........................

(ङ) जन् + य + झ ........................

(च) पिब् + शतृ ........................

(छ) वृ + ति ........................

(ज) वि-अव-हृ + य + त ........................

९. **प्रयोगपरिवर्तनं कुरुत -**

(क) वेदस्य हि षड्सु अङ्गेषु ज्योतिषम् अन्यतमम् अस्ति।

(ख) अयमेव फलितज्योतिषनाम्नाऽपि व्यवह्रियते।

(ग) श्रौतं स्मार्तं कर्म न सिध्यति।

(घ) एकसावनदिनं कथ्यते।

(ङ) विषयेऽस्मिन् भास्कराचार्यः एवं भणति।

**१०. समुचितपदेन रिक्तस्थानं पूरयत -**

(क) सूर्योदयोदयान्तस्थं कीर्त्यते ..................। (सावनं दिनम्/चान्द्रं दिनम्)

(ख) सूर्यस्य द्वादशराशिभोगकालः .................। (एकचान्द्रवर्षम्/एकसौरवर्षम्)

(ग) एककल्पे .....................। (सहस्रमहायुगानि/शतमहायुगानि)

(घ) एकसौरमासस्य ....................।(विंशतिसौरदिनानि/त्रिंशत्सौरदिनानि)

(ङ) रवेः एकभचक्रम् ...................। (द्वादशराशिचक्रम्/एकादशराशिचक्रम्)

## योग्यता-विस्तारः

**कालगणनास्वरूपम्**

"सूच्याभिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते॥"

सूच्या कमलपत्र-भिन्ने (छेदने) यः समयः अपेक्ष्यते सा त्रुटिः कथ्यते।

**तत् षष्ठ्या च भवेद्रेणू रेणुषष्ठ्या लवः स्मृतः।**

**तत् षष्ठ्या लीक्षकः प्रोक्तस्तत्षष्ठ्या प्राण उच्यते॥**

षष्टेः(६०) त्रुटीनाम् एकरेणुः, षष्टेः(६०) रेणूनाम् एकलवः, षष्टेः लवानाम् एकलीक्षकः, षष्टेः(६०) लीक्षकाणाम् एकप्राणो भवति।

**षड्भिः प्राणैः पलं ज्ञेयं तत्षष्ठ्या दण्ड उच्यते।**

**दण्डषष्ठ्या च नाक्षत्रमहोरात्रं प्रकीर्तितम्॥**

षण्णां प्राणानाम् (श्वासः) एकपलं, षष्टेः (६०) पलानाम् एकदण्डम्, षष्टिदण्डानाम् (६०) एकः अहोरात्रो भवति।

श्रीमद्भागवतमहापुराणं कालं सूक्ष्मतमांशपरमाणुं कथयन् भिन्नकालस्य पर्यवसनस्य मापनं चोक्तमित्थं प्रकारेण -

| | | |
|---|---|---|
| १ अहोरात्रः | - | ३० मुहूर्ताः |
| १ मुहूर्तः | - | २ नाडिका |
| १ नाडिका | - | १५ काष्ठाः |
| १ काष्ठाः | - | ५ क्षणाः |

| | | |
|---|---|---|
| १ क्षणः | - | ३ निमेषाः |
| १ लवः | - | ३ वेधाः |
| १ वेधः | - | १०० त्रुटयः |
| १ त्रुटिः | - | ३ त्रसरेणवः |
| १ त्रसरेणुः | - | ३ अणवः |
| १ अणुः | - | २ परमाणुः |

## नवधा कालमानम्

१. ब्राह्मं दैवं मनोर्मानं पैत्रं सौरं च सावनम्।
नाक्षत्रं च तथा चान्द्रं जैवं मानानि वै नवः॥

| | | |
|---|---|---|
| १. ब्राह्मकालमानः | २. दैवकालमानः | ३. मानवकालमानः |
| ४. पैत्र्यकालमानः | ५. सौरकालमानः | ६. सावनकालमानः |
| ७. नाक्षत्रकालमानः | ८. चान्द्रकालमानः | ९. वार्हस्पत्यकालमानः |

**आर्चज्योतिषेऽपि उक्तम् -**

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वाविहिताश्च यज्ञाः।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम्॥**

*आर्चज्योतिषम् ३६*

चतुर्णामपि वेदानां पृथक् पृथक् ज्योतिषशास्त्रमासीत्। तेषु सामवेदस्य ज्योतिषशास्त्रं नोपलभ्यते। अन्येषां त्रयाणां वेदानां ज्योतिषग्रन्थाः प्राप्यन्ते, यथा -

| | | |
|---|---|---|
| १. ऋग्वेदस्य ज्योतिषम् | - | आर्चज्योतिषम् |
| २. यजुर्वेदस्य ज्योतिषम् | - | याजुषज्योतिषम् |
| ३. अथर्ववेदस्य ज्योतिषम् | - | आथर्वणज्योतिषम् |

एतेषां त्रयाणामपि ज्योतिषां प्रणेता लगधो मुनिः अस्ति।

एतत्प्रवर्तकाः अष्टादश महर्षयः -

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।
कश्यपो नारदो गर्गः मरीचिर्मनुरङ्गिराः॥
लोमशः पुलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशश्चैते ज्योतिःशास्त्रप्रवर्तकाः॥

# दशमः पाठः

# रामायणम्

आदिकविवाल्मीकेर्विषये वयं सर्वेऽपि श्रुतपूर्वा एव। अयमादिकविः न केवलं भारतवर्षस्य अपि तु निखिलस्य विश्वस्य प्रसिद्धेषु कविषु अन्यतमो वर्तते। संस्कृतसाहित्ये वाल्मीकिविरचितं रामायणमेव प्रख्यायते। भारतीयैः रामायणम् आदिकाव्यं तत्प्रणेतृतया आदिकविः अभिधीयते।

संस्कृतसाहित्ये तु छन्दोबद्धकवितायाः समुद्भवो वाल्मीकित एवाजायत। महर्षिः वाल्मीकिः कया प्रेरणया आदिकाव्यं रामायणं लिलेख, इत्यमुष्मिन् विषये सुख्याताऽस्त्येका घटना। यदा महर्षिः स्नानार्थं सरो ययौ तदा कस्यचिद्व्याधस्य कृपाणैर्विद्धं क्रौञ्चद्वयोः एकं मृतमवलोक्य, विलपन्तीं क्रौञ्चीं ददर्श। करुणया विह्वलस्य वाल्मीकेर्मुखारविन्दाच्छोकतरङ्गिनी गीः श्लोकरूपेणैवं निःसृता -

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥**

महर्षेः मुखनिःसृतं करुणामयमिदं पद्यं भारतीयकाव्यस्य आदिकविता अभवत्। परमकल्याणमयीं वाणीं श्रुत्वा स्वयं ब्रह्मा समुपस्थाय वाल्मीकिं रामायणं रचयितुमादिदेश। अनया प्रेरणयैव महर्षिवाल्मीकिः रामायणं व्यरचयत्। सर्वप्रथमं लौकिकच्छन्दोनिबद्धस्य रामायणस्य रचना सञ्जाता। अत एव रामायणम् "आदिकाव्यम्" वाल्मीकिश्च "आदिकविः" इत्युच्यते।

आदिकविवाल्मीकेः कवित्वज्ञानाय रामायणमेव पर्याप्तमस्ति। अनेन आदिकविना स्वकाव्यकलायाः प्रतिपादनाय यत्पात्रम् आधारीकृतं तस्य चरितमेव तादृशं यत् तदाधारीकृत्य कोऽपि कविः साफल्यम् आसादयेत्। रामायणादिकाव्ये चतुर्विंशतिसहस्रं (२४००) श्लोकाः वर्तन्ते। अतः चतुर्विंशतिसाहस्रीसंहितापदेन रामायणं प्रथ्यते। गायत्रीमन्त्रे यावन्ति अक्षराणि तावत्सहस्र-परिमितं रामायणम् इति सिद्धम्। इदमपि प्रसिद्धं यत् प्रतिसहस्रतमश्लोकादौ गायत्रीमन्त्रस्य एकैकम् अक्षरं प्राप्यते। रामायणादिकाव्ये पञ्चशतं (५००) सर्गा वर्तन्ते। इह करुणरसो दृश्यते, सप्त काण्डाः (७) वर्तन्ते। ते यथा - बालकाण्डः, अयोध्याकाण्डः, अरण्यकाण्डः, किष्किन्धाकाण्डः, सुन्दरकाण्डः, युद्धकाण्डः, उत्तरकाण्डश्चेति। इदानीम् अपि

जनाः प्रतिगृहे रामायणस्य स्वाध्यायं कुर्वन्ति। मनुष्यजीवने नैकाः समस्याः विद्यन्ते तासां परिहारं रामायणमहाकाव्ये अन्वेष्टुं शक्यते। अत्र अनुष्टुप् छन्दश्च वर्तते।

वाल्मीकिः रामायणनामके काव्यग्रन्थे रामचरित्रोपस्थापनेन आदर्शमानवचरित्रस्य वर्णनमपि अकरोत्। श्रीरामस्य चरितं निवद्धं रामायणम् इतिहासत्वेनाऽपि प्रसिद्धम् अस्ति।

जीवनमूल्यानि मानवसम्बन्धसूक्ष्मांशांश्च बोधयति, तान् गुणान् अनुकर्तुं प्रेरयति च। 'कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्' इति महर्षिवाल्मीकिना नारदमहर्षिः अपृच्छ्यत। तदा नारदः श्रीरामस्यादर्शचरित्रं वदति। तदनु वाल्मीकिः स्वीये रामायणे मर्यादापुरुषोत्तमस्य आदर्शगुणान् विवृणोति। तथा अरण्यकाण्डे राक्षसो मारीचोऽपि रावणं निकषा श्रीरामस्य गुणान् प्रशंसति। भागोऽयं बालकाण्ड-अयोध्याकाण्ड-अरण्यकाण्डेभ्यः केचन श्लोका अत्र सङ्गृहीताः।

**इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।**
**नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी॥१॥**

**अन्वयः** - नीयतात्मा महावीर्यः द्युतिमान् धृतिमान् वशी इक्ष्वाकुवंशप्रभवः रामो नाम जनैः श्रुतः। (बालकाण्डम् - १.८)

**बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रुनिबर्हणः।**
**विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः॥२॥**

**अन्वयः** - विपुलांसः महाबाहुः कम्बुग्रीवः महाहनुः श्रीमान् बुद्धिमान् नीतिमान् वाग्मी शत्रनिबर्हणः। (बालकाण्डम् - १.९)

**धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः।**
**यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान्॥३॥**

**अन्वयः** - धर्मज्ञः सत्यसन्धः ज्ञानसम्पन्नः यशस्वी समाधिमान् शुचिः वश्यः प्रजानां हिते रतः च। (बालकाण्डम् - १.१२)

**रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।**
**वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः॥४॥**

**अन्वयः** - स्वस्य धर्मस्य रक्षिता स्वजनस्य रक्षिता वेदवेदाङ्गतत्त्वज्ञः धनुर्वेदे निष्ठितः च। (बालकाण्डम् - १.१४)

**सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान्।**

**सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः॥५॥**

**अन्वयः** - सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभावान् सर्वलोकप्रियः साधुः अदीनात्मा विचक्षणः च। (बालकाण्डम् - १.१५)

**सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः।**

**आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः॥६॥**

**अन्वयः** - समुद्रः सिन्धुभिः इव सर्वदा सद्भिः अभिगतः एव सर्वसमः आर्यः सदा एव प्रियदर्शनः च। (बालकाण्डम् - १.१६)

**धनदेन समस्त्यागे सत्ये धर्म इवापरः।**

**तमेवं गुणसम्पन्नं रामं सत्यपराक्रमम्॥७॥**

**अन्वयः** - त्यागे धनदेन समः सत्ये अपरः धर्मः इव एवं गुणसम्पन्नं सत्यपराक्रमं तं रामम् (बालकाण्डम् - १.१९)

**प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः।**

**बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः॥८॥**

**अन्वयः** - प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः वृहस्पतेः बुद्ध्या वीर्ये साक्षात् शचीपतेः तुल्यः। (अयोध्याकाण्डम् - २.३०)

**मृदुश्च स्थिरचित्तश्च सदा भव्योऽनसूयकः।**

**प्रियवादी च भूतानां सत्यवादी च राघवः॥९॥**

**अन्वयः** - राघवः सदा स्थिरचित्तः मृदुः भव्यः अनसूयकः सत्यवादी भूतानां प्रियवादी च। (अयोध्याकाण्डम् - २.३२)

**देवासुरमनुष्याणां सर्वशास्त्रेषु विशारदः।**

**सम्यग्विद्याव्रतस्नातो यथावत् साङ्गवेदवित्॥१०॥**

**अन्वयः** - साङ्गवेदवित् सम्यग्विद्याव्रतस्नातः यथावत् देवासुरमनुष्याणां सर्वशास्त्रेषु विशारदः। (अयोध्याकाण्डम् - २.३४)

**यदा व्रजति सङ्ग्रामं ग्रामार्थे नगरस्य वा।**

**गत्वा सौमित्रिसहितो नाविजित्य निवर्तते।**

**सङ्ग्रामात् पुनरागम्य कुञ्जरेण रथेन वा॥११॥**

**पौरान् स्वजनवन्नित्यं कुशलं परिपृच्छति।**
**पुत्रेष्वग्निषु दारेषु प्रेष्य शिष्यगणेषु च॥ १२॥**

**अन्वयः** - यदा ग्रामार्थे नगरस्य वा सौमित्रिसहितः संग्रामं व्रजति अविजित्य न निवर्तते संग्रामात् कुञ्जरेण रथेन वा पुनरागम्य नित्यं पौरान् स्वजनवत् गत्वा पुत्रेषु अग्निषु दारेषु प्रेष्य शिष्यगणेषु च कुशलं परिपृच्छति। (अयोध्याकाण्डम् - २.३७,३८)

**स्मितपूर्वाभिभाषी च धर्मं सर्वात्मना श्रितः।**
**सम्यग्योक्ता श्रेयसां च न विगृह्य कथारुचिः॥ १३॥**

**अन्वयः** - स्मितपूर्वाभिभाषी च धर्मं सर्वात्मना श्रितः श्रेयसां च सम्यग्योक्ता विगृह्य न कथारुचिः। (अयोध्याकाण्डम् - २.४२)

**रामो लोकाभिरामोऽयं शौर्यवीर्यपराक्रमैः।**
**प्रजापालनसंयुक्तो न रागोपहतेन्द्रियः॥ १४॥**

**अन्वयः** - अयं रामः शौर्यवीर्यपराक्रमैः लोकाभिरामः प्रजापालनसंयुक्तः न रागोपहतेन्द्रियः। (अयोध्याकाण्डम् - २.४४)

**रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः।**
**राजा सर्वस्य लोकस्य देवानामिव वासवः॥ १५॥**

**अन्वयः** - रामः विग्रहवान् धर्मः सत्यपराक्रमः साधुः देवानां मघवान् इव सर्वस्य लोकस्य। (अरण्यकाण्डम् - ३७.१३)

## शब्दार्थाः

| | |
|---|---|
| इक्ष्वाकुवंशप्रभवः | इक्ष्वाकुवंशस्य राजा |
| नियतात्मा | जितेन्द्रियः |
| महावीर्यः | महत् वीर्यं यस्य सः |
| द्युतिमान् | कान्तिमान् |
| धृतिमान् | धैर्यवान् |
| वशी | वशं करोति यः |
| वाग्ग्मी | सुवक्ता |

| | |
|---|---|
| शत्रुनिबर्हणः | शत्रूणां नाशयिता |
| विपुलांसः | विशालः बाहुः यस्य |
| कम्बुग्रीवः | शङ्ख इव ग्रीवा यस्य सः |
| महाहनुः | विशालः हनुः यस्य |
| सत्यसन्धः | सत्या सन्धा यस्य सः |
| समाधिमान् | आश्रितरक्षणचिन्ता परतत्त्वे समाहितमनाः |
| विचक्षणः | सक्षमः |
| प्रियदर्शनः | प्रियं दर्शनं यस्य सः |
| सत्यपराक्रमः | सत्यम् एव पराक्रमः यस्य सः |
| शचीपतेः | इन्द्रस्य |
| सत्यवादी | सत्यवक्ता |
| विशारदः | विद्वान् |
| साङ्गवेदवित् | अङ्गसहितं वेदं यो जानाति |
| दारेषु | भार्यायाम् |
| स्मितपूर्वाभिभाषी | सप्रसन्नं भाषते यः |
| विद्याव्रतस्नातः | विद्याव्रतं समापितवान् यः |
| रागोपहतेन्द्रियः | रागेण उपहतानि इन्द्रियाणि यस्य |
| निष्ठितः | नितरां स्थितः |
| कुञ्जरेण | गजेन |

## अभ्यासः

१. **वस्तुनिष्ठप्रश्नाः -**

(क) महर्षेः वाल्मीकेः वचनमस्ति -

(अ) रामो विग्रहवान् धर्मः (आ) योगः कर्मसु कौशलम्

(इ) येनेदं भूतं भुवनम् (ई) मातृदेवो भव

(ख) सूक्तिः इयमस्ति रामायणस्य -

(अ) आचार्याः समधिगच्छन्ति (आ) हिमालयो नाम नगाधिराजः

(आ) सङ्गच्छध्वं संवदध्वम्　　(ई) रामो नाम जनैः श्रुतम्

(ग) संस्कृतसाहित्ये आदिकाव्यमस्ति -

(अ) ऋग्वेदः　　(आ) रघुवंशम्

(इ) रामायणम्　　(ई) महाभारतम्

(घ) आर्षकाव्येषु 'चतुर्विंशतिसाहस्री' अस्ति -

(अ) रामायणम्　　(आ) सामवेदः

(इ) महाभारतम्　　(ई) गीता

(ङ) वाल्मीकिरामायणे कति सर्गाः विद्यन्ते ?

(अ) २५　　(आ) २५०

(इ) ३००　　(ई) ५००

(च) रामायणस्य प्रणेता कोऽस्ति ?

(अ) वाल्मीकिः　　(आ) भरतमुनिः

(इ) तुलसीदासः　　(ई) कालिदासः

## २. अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया देयानि -

(क) रामो नाम कैः श्रुतम् ?

(ख) कस्मिन् वंशे रामो जन्म अलभत ?

(ग) वेदवेदाङ्गतत्त्वज्ञः कोऽस्ति ?

(घ) कः शत्रुनिबर्हणः ?

(ङ) विद्याव्रतस्नातः कः ?

(च) रामः कान् कुशलं परिपृच्छति ?

## ३. अधोलिखितपदानां ससूत्रं सन्धिविच्छेदं कुरुत -

| | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|
| (क) सत्यसन्धश्च | .............. + .............. | .............................. |
| (ख) कोऽन्वस्मिन् | .............. + .............. | .............................. |
| (ग) साक्षाच्छचीपतेः | .............. + .............. | .............................. |
| (घ) पुत्रेष्वग्निषु | .............. + .............. | .............................. |
| (ङ) सम्यग्योक्ता | .............. + .............. | .............................. |

(च) सदैव ............... + ............... ...............................

## ४. रिक्तस्थानानि पूरयत -

(क) सर्वलोकप्रियः ........................................... विचक्षणः।

(ख) सर्वदाभिगतः ........................................... सिन्धुभिः।

(ग) देवासुरमनुष्याणाम् ..................................... विशारदः।

(घ) ................................................. नाविजित्य निवर्तते।

(ङ) राजा सर्वस्य ..........................................................।

## ५. समस्तपदानि आधृत्य विग्रहवाक्यपूर्वकं समासनाम लिखत -

| | विग्रहः | समासनाम |
|---|---|---|
| (क) शौर्यवीर्यपराक्रमैः | ............... ............... | ............................... |
| (ख) शत्रुनिबर्हणः | ............... ............... | ............................... |
| (ग) विपुलांसः | ............... ............... | ............................... |
| (घ) महाहनुः | ............... ............... | ............................... |
| (ङ) कम्बुग्रीवः | ............... ............... | ............................... |
| (च) देवासुरमनुष्याणाम् | ............... ............... | ............................... |

## ६. प्रकृतिं प्रत्ययं च योजयित्वा पदनिर्माणं कुरुत -

| | पदम् |
|---|---|
| (क) श्रु + क्त | ............... |
| (ख) धर्म + ज्ञा + क | ............... |
| (ग) रक्ष् + क्त | ............... |
| (घ) नि + स्था + क्त | ............... |
| (ङ) वि + जि + ल्यप् | ............... |

## ७. प्रयोगपरिवर्तनं कुरुत -

(क) रामो नाम जनैः श्रुतम्।

(ख) यदा महर्षिः स्नानार्थं सरः अयात्।

(ग) महर्षिः विलपन्तीं क्रौञ्चिं दृष्टवान्।

(घ) महर्षिवाल्मीकिः कया प्रेरणया रामायणम् अलिखत्?

(ङ) रामायणस्य रचयिता महर्षिः वाल्मीकिः।

८. **रेखाङ्कितपदान्याधृत्य कारकविभक्ती स्पष्टयत -**

(क) प्रजानां हिते रतश्च।

(ख) यदा ग्रामार्थं नगरस्य वा सौमित्रिसहितः संग्रामं व्रजति।

(ग) प्रेष्यशिष्यगणेषु दारेषु च कुशलं परिपृच्छति।

(घ) देवानां मघवान् इव सर्वस्य लोकस्य राजा।

(ङ) सङ्ग्रामात् कुञ्जरेण रथेन वा पुनरागम्य पौरान् परिपृच्छति।

९. **दशवाक्यैः संस्कृतभाषया आङ्ग्लभाषया मातृभाषया वा उत्तरं लिखत -**

(क) श्रीरामस्य गुणान् सङ्गृह्य लिखत।

(ख) विद्याव्रतस्नातः।

(ग) साङ्गवेदवित्।

## योग्यता-विस्तारः

महर्षिवाल्मीकिना विरचिते रामायणे पञ्चशतं सर्गाः अस्य काव्यस्य महत्त्वं वर्णयितुं श्लोकाः अनेकाः वर्तन्ते। तेषु केचन अत्र वर्णयितुम् उद्धृताः।

**स च नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते।**
**उच्यमानोऽपि पुरुषं नोत्तरं प्रतिपद्यते॥**
**धर्मकामार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान्।**
**लौकिके समयाचारे कृतकल्पो विशारदः॥**
**रामः सत्पुरुषो लोके सत्यः सत्यपरायणः।**
**साक्षाद्रामाद्विनिर्वृतो धर्मश्चापि श्रिया सह॥**

वाल्मीकिगिरिसम्भूता रामसागरगामिनी। पुनातु भुवनं पुण्या रामायणमहानदी॥

**यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।**
**तावद्रामायणीकथा लोकेषु प्रचलिष्यति।**
**कूजन्तं रामरामेति मधुरं मधुराक्षरम्।**
**आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥**

रामायणे २४००० श्लोकाः वर्तन्ते। अस्मात् कारणात् अस्याभिधानं चतुर्विंशतिसाहस्त्री संहिता अपि कथ्यते। गायत्रीमन्त्रे चतुर्विंशतिः अक्षराणि विद्यन्ते। तत्र रामायणे प्रतिसहस्त्रं प्रत्येकगायत्रीमन्त्रस्य वर्णस्य आद्यः प्रयोगः सञ्जातः। रामायणस्य नायकः रामः नायिका च सीता अस्ति। लोकाय सदाचारशिक्षणमेव प्रयोजनमस्ति। पितरं प्रति पुत्रस्य कर्तव्यम्, भ्रातरं स्वामिनं प्रति सेवकस्य कर्तव्यम्, राजानं प्रति प्रजानां कर्तव्यम् इति विषयो रामायणे वर्णितोऽस्ति।

# एकादशः पाठः

## महाभारतम्

महाभारते रामायणमिव अस्माकं राष्ट्रस्येतिहासः विस्तृतरूपेण विवृतो विद्यते। भारतीयसंस्कृतेः, आचारस्य, व्यवहारस्य, राजधर्मस्य, राष्ट्रधर्मस्य, इहलौकिकपारलौकिकयोः वर्णनम्, चतुर्वर्णानां, चतुराश्रमसम्बद्धसामाजिकव्यवस्थायाः विवेचनं विस्तृतरूपेण कृतमस्ति। ग्रन्थेऽस्मिन् लक्षपरिमिताः श्लोकाः विद्यन्ते अतः ग्रन्थोऽयं "शतसाहस्री" इत्यनेन प्रसिद्धिं प्राप्नोत्, ऐतिहासिकः ग्रन्थः सन् सम्पूर्णानां महाकाव्यनियमानां समावेशत्वात् रमणीयञ्च महाकाव्यम् चास्ति। ग्रन्थेऽस्मिन् अष्टादशपर्वाणि (१८) विद्यन्ते। तेषां नामानि क्रमशः अधोलिखितानि सन्ति -

(१) आदिपर्व (२) सभापर्व (३) वनपर्वम् (४) विराट्-पर्व (५) उद्योगपर्व (६) भीष्मपर्व (७) द्रोणपर्व (८) कर्णपर्व (९) शल्यपर्व (१०) सौप्तिकपर्व (११) स्त्रीपर्व (१२) शान्तिपर्व (१३) अनुशासनपर्व (१४) अश्वमेधपर्व (१५) आश्रमवासिपर्व (१६) मौसलपर्व (१७) महाप्रास्थानिकपर्व (१८) स्वर्गारोहणपर्व।

महाभारतस्यास्य प्रणेता कृष्णद्वैपायनः श्रीवेदव्यासः चिरञ्जीविषु अन्यतमः। पिता पराशरमुनिः माता चास्य सत्यवती। पराशरजातत्वात् पाराशर्य्यः पाराशरो वेति नाम्नापि ख्यातोऽयम्। यमुनायाः कस्मिंश्चिद् द्वीपे जनिं लेभे। अतः द्वैपायनः इति कथ्यते। कृष्णवर्णत्वात् कृष्णद्वैपायनः, वेदविभाजकत्वात् वेदव्यासश्च उच्यते। अविरामे परिश्रमे आत्मानं विनियोज्य महर्षिणा व्यासेन ग्रन्थोऽयं त्रिभिर्वर्षैः समापयत्। इत्येतत् तथ्यम् आदिपर्वणि स्थितः श्लोकः एष प्रकाशयति -

**त्रिभिर्वर्षैः सदोत्थायी कृष्णद्वैपायनो मुनिः।**
**महाभारतमाख्यानं कृतवानिदमुत्तमम्॥**

ग्रन्थस्य महत्ता कियति इत्येतस्मिन् विषये द्रष्टव्यः श्लोकोऽयम् -

**धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥**

महाभारते कौरवपाण्डवयोः युद्धं वर्णितम्। वस्तुतः युद्धमिदं धर्माधर्मयोः आसीत्। यदा धर्मस्य ग्लानिर्भवति, तदा सामाजिकव्यवस्था शृङ्खलारहिता भवति। तत्र धर्मसंरक्षणाय राष्ट्रसंरक्षणाय च युद्धम् अपरिहार्यं भवति। अतः महाभारतयुद्धं धर्मयुद्धम् इत्यनेनापि प्रसिद्धम्। उक्तञ्च भगवता श्रीकृष्णेन -

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत**

**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।**

**परित्राणाय साधूनां विनाशाय च दुष्कृताम्**

**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥**

महाभारते अस्माकं जीवनेतिहासो वर्तते। भारतीयसंस्कृतेः स्वरूपमत्रैव लभ्यते। महाभारते न केवलं कौरवपाण्डवयोरितिहासवर्णनम्, अपि तु सकलमनुष्याणां भावनाप्यत्र चित्रिताऽस्ति। अतो निखिलसंसारस्य आदर्शग्रन्थोऽयम्। भारतीयसंस्कृतसाहित्यस्य सर्वोत्तमो ग्रन्थः श्रीमद्भगवद्गीता अस्यैवाङ्गभूता। विष्णुसहस्रनामस्तोत्रम्, अनुगीता, भीष्मस्तवः, गजेन्द्रमोक्षः, श्रीमद्भगवद्गीता इमे पञ्च महाभारतस्य रत्नानि विद्यन्ते। एभिर्गुणैरेव महाभारतं पञ्चमो वेदः कथ्यते। महाभारतस्य कथामाश्रित्यैव विविधैः कविभिः संस्कृतसाहित्ये काव्य-नाटक-गद्य-पद्य-चम्पू-कथा-आख्यायिकाः प्रणीताः। अतः कवीनामुपजीव्योऽयं ग्रन्थः।

आदौ महाभारतम् इतिहासः, पुराणम्, आख्यानकञ्चेति नामभिराख्यायते स्म। इदानीन्तु महाभारतम् आचारशास्त्रम्, नीतिशास्त्रम्, सामाजिकशास्त्रम्, धर्मार्थकाममोक्षाख्य-चतुर्वर्गसाधनञ्च आमन्वते।

## महाभारते सामाजिकमहत्त्वम्

महाभारतकालिकसमाजः मातृपितृगुरूणां पूजनीयं स्थानं बिभर्ति। तात्कालिकस्य भीष्मस्य पितृभक्तिः, एकलव्यार्जुनयोः गुरुभक्तिश्च सुप्रसिद्धा वर्तते। पुत्रीपुत्रयोर्मध्ये नासीत् लेशतोऽपि भेदः। उक्तञ्च - "यथैवात्मा तथा पुत्रः, पुत्रेण दुहिता समा।" तात्कालिकगान्धारीकुन्तीद्रौपदी-सुभद्रासत्यभामादिषु नारीषु कर्त्तव्यबोधः अधिकारानुकूलनस्य सामर्थ्यञ्चासीत्। अन्तेवासिनः गुरुकुलं गत्वा विद्यामधीयते स्म। तदानीन्तनाः शिष्याः चतुर्दशविद्यासु नदीष्णाः भवन्ति स्म। ब्राह्मणस्य यज्ञाध्ययनदानादिभिः, राज्ञः प्रजाभिः प्राप्तषष्ठांशभागैः, वैश्यस्य कृषिपशुपालन-वाणिज्यादिभिः, शूद्रस्य द्विजादित्रयाणां जीविकोपार्जनं भवति स्म। महाभारतादृते न कोऽपि मनुष्यः कदापि पूर्णतया राजनीति-विचक्षणो

भवितुमर्हतीति। एतद्ग्रन्थावलोकनेन प्रतीयते यत्, अस्मदीयाः पूर्वजाः नूनं राजनीत्यामपि महान्तः कुटिलमतयो भवन्ति स्म। तथा चोक्तम् -

**मृदुर्हि राजा सततं लङ्घ्यो भवति सर्वशः।**

**तीक्ष्णाच्चोद्विजते लोकस्तस्मादुभयमाश्रय॥१॥**

**अवमन्यन्ति भर्तारं संघर्षादुपजीविनः।**

**स्वस्थाने न तिष्ठन्ति लङ्घयन्ति च तद्वचः॥२॥**

राजनीतेः नेतारं प्रति महाभारतं श्रद्धानीयमादर्शं प्रकटयति। धर्मस्य व्यवस्थायाः उत्तरदायित्वं राजानमेवानुगच्छति। यदि राजा प्रजाः न भुञ्ज्यात् तदा न केवलं प्रजानामेव हानिः अपि तु वेदानाम् अपि अवस्थितिः नितान्तं दुरूहा स्यात्। राजधर्मे नष्टे सति समाजस्य राष्ट्रस्य च विनाशो निश्चप्रचं भवति। "अस्ति राजा राष्ट्रपुरुषाणां मेरुदण्डः" इत्यादिशब्दैः महाभारतम् उच्चैः राजधर्मस्य उत्कृष्टत्वं तथा राजनीतेः उपादेयतां निरूपयति। अस्मद्भारतं कृषिप्रधानं राष्ट्रम्। अतः कथनमिदं महाभारतस्य यद्यपि नेता स्वयं कृषिकर्मा न, स राष्ट्रसमितिप्रवेशाधिकार्यपि न। उक्तञ्च - "न नः स समितिं गच्छेत् यश्च नो निर्वपेन्महीम्।"

## महाभारते साहित्यिकं माहात्म्यम्

शब्दार्थौ सहितौ काव्यम् इति आचार्यभामहस्य काव्यलक्षणादारभ्य काव्यस्य यावन्ति लक्षणानि प्रयोजनानि च उक्तानि तानि सर्वाणि महाभारते उपलभ्यन्ते। अत एव महाभारतम् एकः अनुपमसाहित्यग्रन्थोऽस्ति। अस्य विलक्षणं साहित्यिकं माहात्म्यं विद्यते। काव्यशास्त्रीयदृष्ट्या महाभारते 'पाञ्चालीरीतिः' वर्तते। "शब्दार्थयोः समो गुम्फः पाञ्चालीरीतिरिष्यते।" ग्रन्थोऽयं ओज-प्रसाद-माधुर्यादिभिः सर्वैः काव्यगुणैः परिपूर्णोऽस्ति। यद्यपि महाभारते अङ्गीरसः शान्तरसः इति। तथापि भीष्मद्रोणकर्णशल्यादिषु पर्वसु वीररसोऽपि दृष्टिगोचरो भवति। अर्थालङ्कारेषु उपमा-रूपक-उत्प्रेक्षा-अर्थान्तर-न्यासाश्च प्रयुक्ताः। शब्दालङ्कारेषु मुखतया 'अनुप्रासः' इति दृश्यते। अधिकांशतया अनुष्टुप्-छन्दः, क्वचित् गद्यात्मको भागोऽपि दृश्यते। कदाचिद् अन्येषामपि छन्दसां प्रयोगो दृश्यते।

महाभारतस्य शैली संवादात्मिका एवञ्च भाषा सरला, गभीरा, प्रभावोत्पादिका विद्यते। तद्यथा - "मुहूर्त्तं ज्वलितं श्रेयो न च धूमायितं चिरम्।" एतेनैव महाकाव्यमेतद् विश्वसाहित्ये अनुपमकाव्यम् अजायत। विदूरनीतिः महाभारतस्य उद्योगपर्वणि विद्यते। नीतिरियं

मनुष्यजीवनस्य अत्यन्तम् उपयोगाय वर्तते। अतः वयं सर्वेऽपि सुष्ठु अधीमहै। अत्र विदूरनीतेः केचिच्छ्लोकाः स्वीक्रियन्ते -

**विदूरनीतिः**

**एकः स्वादु न भुञ्जीत एकश्चार्थान्न चिन्तयेत्।**
**एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात्॥ म.भा.उ. ३३.४६॥**

**अन्वयः** - एकः स्वादु न भुञ्जीत, एकः अर्थान् न चिन्तयेत्, एकः अध्वानं न गच्छेत्, एकः च सुप्तेषु न जागृयात्।

**एको धर्मः परं श्रेयः क्षमैकाशान्तिरुत्तमा।**
**विद्यैका परमा तृप्तिरहिंसैका सुखावहा॥ ३३.५२॥**

**अन्वयः** - धर्मः एकः परं श्रेयः, क्षमा एका उत्तमा शान्तिः, विद्या एका परमा तृप्तिः, अहिंसा एका सुखावहा।

**चत्वारि राज्ञा तु महाबलेन वर्ज्यान्याहुः पण्डितस्तानि विद्यात्।**
**अल्पप्रज्ञैः सह मन्त्रं न कुर्यान्न दीर्घसूत्रैरभसैश्चारणैश्च॥ ३३.६९॥**

**अन्वयः** - अल्पप्रज्ञैः, दीर्घसूत्रैः, अभसैः, चारणैः च सह पण्डितः मन्त्रं न कुर्यात्। महाबलेन राज्ञा तानि चत्वारि तु वर्ज्यानि आहुः विद्यात्।

**चत्वारि कर्माण्यभयङ्कराणि भयं प्रयच्छन्त्ययथाकृतानि।**
**मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः॥ ३३.७३॥**

**अन्वयः** - मानाग्निहोत्रम् उत मानमौनं मानेनाधीतम् उत मानयज्ञः चत्वारि कर्माणि अभयङ्कराणि अयथाकृतानि भयं प्रयच्छन्ति।

**पञ्चाग्नयो मनुष्येण परिचर्याः प्रयत्नतः।**
**पिता माताग्निरात्मा च गुरुश्च भरतर्षभ॥ ३३.७४॥**

**अन्वयः** - (हे) भरतर्षभ ! मनुष्येण पिता माता अग्निः आत्मा च गुरुः च (एते) पञ्चाग्नयः प्रयत्नतः परिचर्याः।

**षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।**
**निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥ ३३.७८॥**

**अन्वयः** - निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता (च, एते) षड् दोषाः भूतिम् इच्छता पुरुषेणेह हातव्याः।

**षडेव तु गुणाः पुंसा न हातव्याः कदाचन।**

**सत्यं दानमनालस्यमनसूया क्षमा घृतिः॥ ३३.८१॥**

**अन्वयः** - सत्यं दानम् अनालस्यम् अनसूया क्षमा धृतिः (च, एते) षड् एव तु गुणाः पुंसा कदाचन न हातव्याः।

**षण्णामात्मनि नित्यानामैश्वर्यं योऽधिगच्छति।**

**न स पापैः कुतोऽनर्थैर्युज्यते विजितेन्द्रियः॥ ३३.८३॥**

**अन्वयः** - आत्मनि नित्यानां षण्णाम् (कामक्रोधलोभमोहमदमात्सर्याणाम्) ऐश्वर्यं यः अधिगच्छति, स विजितेन्द्रियः पापैः न युज्यते, कुतो अनर्थैः।

**अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च।**

**पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च॥ ३३.९९॥**

**अन्वयः** - प्रज्ञा च कौल्यं च दमः श्रुतं च पराक्रमः च अबहुभाषिता च दानं कृतज्ञता च (एते) अष्टौ गुणाः पुरुषं यथाशक्ति दीपयन्ति।

**चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम्।**

**प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति॥ ३४.२५॥**

**अन्वयः** - यः (राजा) चक्षुषा मनसा वाचा कर्मणा च चतुर्विधं, लोकं प्रसादयति तं लोकः अनुप्रसीदति।

**पितृपैतामहं राज्यं प्राप्तवान् स्वेन कर्मणा।**

**वायुरभ्रमिवासाद्य भ्रंशयत्यनये स्थितः॥ ३४.२७॥**

**अन्वयः** - अनये स्थितः (राजा) पितृपैतामहं राज्यं प्राप्तवान्, स्वेन कर्मणा वायुः अभ्रमिव आसाद्य भ्रंशयति।

**गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः।**

**चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः॥ ३४.३४॥**

**अन्वयः** - गावः गन्धेन पश्यन्ति, ब्राह्मणाः वेदैः पश्यन्ति, राजानः चारैः पश्यन्ति, इतरे जनाः चक्षुर्भ्याम् (पश्यन्ति)।

**सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।**

**मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते॥ ३४.३९॥**

**अन्वयः** - धर्मः सत्येन रक्ष्यते, विद्या योगेन रक्ष्यते, रूपं मृजया (शौचेन) रक्ष्यते, कुलं वृत्तेन रक्ष्यते।

**असंत्यागात् पापकृतामपापां**
**स्तुल्यो दण्डः स्पृशते मिश्रभावात्।**
**शुष्केणार्द्रं दह्यते मिश्रभावात्**
**तस्मात् पापैः सह सन्धिं न कुर्यात्॥३४.७०॥**

**अन्वयः** - पापकृताम् असंत्यागात् अपापान् मिश्रभावात् तुल्यः दण्डः स्पृशते। मिश्रभावात् शुष्केण (काष्ठेन सह) आर्द्रं (काष्ठं) दह्यते। तस्मात् पापैः सह सन्धिं न कुर्यात्।

**अगारदाही गरदः कुण्डाशी सोमविक्रयी।**
**पर्वकारश्च सूची च मित्रध्रुक् पारदारिकः॥३५.४६॥**
**भ्रूणहा गुरुतल्पी च यश्च स्यात् पानपो द्विजः।**
**अतितीक्ष्णश्च काकश्च नास्तिको वेदनिन्दकः॥३५.४७॥**
**स्रुवप्रग्रहणो व्रात्यः कीनाशश्चात्मवानपि।**
**रक्षेत्युक्तश्च यो हिंस्यात् सर्वे ब्रह्महभिः समाः॥३५.४८॥**

**अन्वयः** - अगारदाही, गरदः, कुण्डाशी, सोमविक्रयी, पर्वकारः च सूची च मित्रध्रुक्, पारदारिकः, भ्रूणहा, गुरुतल्पी च, यः च पानपः द्विजः स्यात्। अतितीक्ष्णः, काकः, नास्तिकः वेदनिन्दकः, स्रुवप्रग्रहणः, व्रात्यः, कीनाशः च आत्मवान् अपि रक्षा इति उक्तः च यः हिंस्यात् सर्वे ब्रह्महभिः समाः।

## शब्दार्थाः

| | |
|---|---|
| उपकरोति | उपकारं करोति |
| अविरामे | निरन्तरम् |
| अवमन्यन्ति | अवमाननं कुर्वन्ति |
| नदीष्णाः | पारङ्गताः |
| यदिहास्ति | यदत्र अस्ति |
| उपजीव्य | आश्रित्य |
| भुञ्ज्यात् | पालयेत् |
| श्रद्धानीयम् | श्रद्धार्हम् |
| दुरूहा | कठिना |

| | |
|---|---|
| अङ्गीरसः | प्रधानरसः |
| प्रतीयते | ज्ञायते |
| दुहिता | पुत्री |
| विलक्षणम् | विचित्रम् |
| उपादेयता | उत्कृष्टत्वम् |
| लङ्घयन्ति | उल्लङ्घनं कुर्वन्ति/उच्चरन्ते |
| निश्चप्रचम् | नूनम् |
| कृषिकर्मा | कृषिः कर्म यस्य |
| कुण्डाशी | कुण्डस्य जारजस्य अन्नमश्नाति यः |
| मृजया | शौचेन |
| मित्रध्रुक् | मित्रद्रोही |
| अपापान् | पापरहितान् |
| भ्रूणहा | भ्रूणं हन्ति यः |
| पारदारिकः | परस्त्रीगामी |
| अगारदाही | गृहदाहकः/सद्मनि अग्निसंयोजकः |

## अभ्यासः

१. **अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -**

(क) कृष्णद्वैपायनः कस्यापरं नाम वर्तते ?

(ख) भूतिमिच्छता पुरुषेण के हातव्याः ?

(ग) शतसाहस्त्री संहिता कस्य नाम वर्तते ?

(घ) राजानः कथं पश्यन्ति ?

(ङ) भारतनामके ग्रन्थे कति श्लोकाः सन्ति ?

(च) महर्षि व्यासेन अस्य ग्रन्थस्य रचनां कतिभिः वर्षैः अकरोत् ?

२. **सर्वे प्रश्नाः समाधेयाः -**

(क) विद्या केन रक्ष्यते ?

(ख) महाभारतस्य प्रणेता कः ?

(ग) विदूरनीति महाभरतस्य कस्मिन् पर्वणि विद्यते ?

(घ) महाभारते कति पर्वाणि सन्ति ?

(ङ) कैः सह सन्धिं न कुर्यात् ?

## ३. रिक्तस्थानानि पूरयन्तु -

(क) चक्षुषा मनसा..................... लोकोऽनुप्रसीदति॥

(ख) त्रिभिर्वर्षैः सदोत्थायी .................... मुनिः।

(ग) यदिहास्ति ......................... तत्क्वचित्।

(घ) धर्मे ......................... मोक्षे च भरतर्षभ।

(ङ) ...................... एते पञ्च रत्नानि सन्ति।

## ४. अधोलिखितानि पदानि सुमेलयत -

| | |
|---|---|
| (क) वेदव्यासः | धर्मः |
| (ख) सत्येन रक्ष्यते | अष्टादश |
| (ग) महाभारतम् | पुंसा न हातव्याः |
| (घ) षडेव तु गुणाः | महाभारतम् |
| (ङ) पर्वाणि | पञ्चमो वेदः |

## ५. अधोलिखितानां पदानां सन्धिविच्छेदं कृत्वा सन्धिसूत्राणि निर्दिशत -

| | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|
| (क) विद्यैका | .............. + .............. | ............................ |
| (ख) यन्नेहास्ति | .............. + .............. | ............................ |
| (ग) योऽधिगच्छति | .............. + .............. | ............................ |
| (घ) गुरुभक्तिश्च | .............. + .............. | ............................ |
| (ङ) शकुन्तलोपाख्यानम् | .............. + .............. | ............................ |
| (च) स्वर्गारोहणम् | .............. + .............. | ............................ |
| (छ) इत्येतत् | .............. + .............. | ............................ |
| (ज) पापांस्तुल्यः | .............. + .............. | ............................ |

## ६. अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासं निर्णयत -

| | | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | एकलव्यार्जुनयोः | .............................. | .............................. |
| (ख) | जीवनेतिहासः | .............................. | .............................. |
| (ग) | निश्चप्रचम् | .............................. | .............................. |
| (घ) | धर्मार्थकाममोक्षाः | .............................. | .............................. |
| (ङ) | महर्षिः | .............................. | .............................. |
| (च) | कृषिकर्मा | .............................. | .............................. |
| (छ) | विजितेन्द्रियः | .............................. | .............................. |

## ७. प्रयोगपरिवर्तनं क्रियताम् -

(क) यदि राजा प्रजाः न भुञ्ज्यात्।

(ख) अस्मद्भारतं कृषिप्रधानं राष्ट्रमस्ति।

(ग) महाभारतं पञ्चमो वेदः कथ्यते।

(घ) अन्तेवासिनो गुरुकुलं गत्वा अधीयते स्म।

(ङ) महाभारतकालिकसमाजः मातृ-पितृ-गुरूणां पूजनीयं स्थानं बिभर्ति।

(च) महाबलेन राज्ञा तानि चत्वारि वर्ज्यानि।

(छ) इतरे जनाः चक्षुभ्यां पश्यन्ति।

## ८. रेखाङ्कितपदान्याधृत्य कारकविभक्ती निर्णयत -

(क) अवमन्यन्ति भर्तारं संघर्षाद् <u>उपजीविनः</u>।

(ख) <u>भारतीयसंस्कृतसाहित्यस्य</u> सर्वोत्तमग्रन्थः श्रीमद्भगवद्गीता।

(ग) महाभारतग्रन्थस्य <u>उद्योगपर्वणि</u> विदूरनीतिः विद्यते।

(घ) अष्टौ गुणाः <u>पुरुषं</u> यथाशक्ति दीपयन्ति।

(ङ) <u>राजधर्मे</u> नष्टे सति समाजस्य राष्ट्रस्य च विनाशो निश्चप्रचं भवति।

## ९. कोष्ठकात् उचितपदं चित्वा रिक्तस्थानानि पूरयत -

| विधीयते, गत्वा, बिभर्ति, पूजनीयम्, अवस्थितिः, इष्यते, उक्तम्, अधिकारी |
|---|

(क) पूज् + अनीयर् ............................

(ख) गम् + क्त्वा ............................

(ग) इष् + य + ते ............................

(घ) अव-स्था + क्तिन् ............................

(ङ) वच् + क्त ............................

(च) अधिकार + इनि ............................

(छ) वि-धा + य + ते ............................

१०. रेखाङ्कितपदान्याश्रित्य प्रश्ननिर्माणं कुरुत -

(क) महाभारते अष्टादश पर्वाणि सन्ति।

(ख) लक्षश्लोकपरिमितं महाभारतं 'शतसाहस्रीसंहिता' इति नाम्ना प्रथितं वर्तते।

(ग) महाभारतस्यास्य प्रणेता श्रीवेदव्यासः बभूव।

(घ) अस्ति राजा राष्ट्रपुरुषाणां मेरुदण्डः।

(ङ) तदानीन्तनाः शिष्याः चतुर्दशविद्यासु नदीष्णाः भवन्ति स्म।

(च) मनुष्येण पिता माता अग्निः आत्मा च गुरुः च पञ्चाग्नयः प्रयत्नतः परिचर्याः।

११. महाभारतस्य सामाजिकमहत्त्वं साहित्यिकमहत्त्वञ्च स्वभाषया विवृणुत।

## योग्यता-विस्तारः

न कश्चिदपि जानाति किं कस्य श्वो भविष्यति।
अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान्॥ १॥

न कश्चित् कस्य चिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
कारणेन हि जायन्ते मित्राणि रिपवस्तथा॥ २॥

केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः।
केचिज्ज्ञानावलेपेन केचिन्नष्टैस्तु नाशिताः॥ ३॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥ ४॥

न सा सभा यत्र न सन्ति वृद्धा न ते वृद्धा ये न वदन्ति धर्मम्।
नासौ धर्मो यत्र न सत्यमस्ति न तत् सत्यं यच्छलेनाभ्युपेतम्॥

सत्यं रूपं श्रुतं विद्या कौल्यं शीलं बलं धनम्।
शौर्यं च चित्रभाष्यं च दशेमे स्वर्गयोनयः॥

गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम्।

अथ प्रच्छन्नपापानां शास्ता वैवस्वतो यमः॥

अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च।

वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन्॥

**अष्टचिरञ्जीविनः**

अश्वत्थामबलिर्व्यासो हनुमांश्च विभीषणः।

कृपः परशुरामश्च मार्कण्डेयतथाष्टमम्॥

“भारतं च इक्षुदण्डं च प्रतिपर्व रसोद्भवम्।”, “यन्न भारते तन्नभारतम्” इत्यादयः सूक्तयः। महाभारते सर्वशास्त्राणि शस्त्राणि च अन्तर्भवन्ति। अत एव महाभारतं सरस्वत्याः वृष्टिः इति श्लाघितं वर्तते।

# द्वादशः पाठः

## जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते

महाभारतस्य शान्तिपर्वणो मोक्षधर्मपर्वणि भरद्वाज-भृगुमहर्षयोः संवादे वृक्षाणामपि स्पर्श-श्रवण-दर्शन-घ्राण-रसन-पान-चैतन्यवृद्धिप्रभृतयः चैतन्यगुणाः सन्ति इति निरूप्यते। ते वृक्षाः सुखदुःखयोर्ग्रहणं कुर्वन्ति, अनुभवं प्राप्नुवन्ति, छिन्नो वृक्षो विरोहति, अत एव वृक्षे जीवोऽस्ति। वृक्षाः चैतन्यवन्तः। वृक्षाणां चेतनत्वं चिरात् महाभारते व्यवस्थाप्यत। अत एव मनुष्याणां रोगोपशमनं, दुःखशमनं, निर्वहणं यथा उद्यमेषु, संस्थासु वा भवति तथा वृक्षाणां वनौषधीनाम् अरण्यानां च निर्वहणं भवेत्। तृणेष्वपि दयाभावना भवेत्, किमुत वृक्षादिषु। अतस्तेषां पीडनं न कुर्यात्। प्रस्तुतेऽस्मिन् पाठ्यांशे महाभारतस्य शान्तिपर्वणः चतुरशीत्यधिकशततमाध्यायाद् भरद्वाजभृगुसम्बद्धाः श्लोकाः सङ्गृहीताः।

### भरद्वाज उवाच

**त एते धातवः पञ्च ब्रह्मा यानसृजत् पुरा।**
**आवृता यैरिमे लोका महाभूताभिसंज्ञिताः॥ १॥**

**अन्वयः** - ते एते पञ्च धातवः पुरा ब्रह्मा यान् असृजत्, यैः इमे लोकाः आवृताः महाभूताभिसंज्ञाताः।

**यदाऽसृजत् सहस्राणि भूतानां स महामतिः।**
**पञ्चानामेव भूतत्वं कथं समुपपद्यते॥ २॥**

**अन्वयः** - यदा सः महामतिः भूतानां सहस्राणि असृजत् (तदा) पञ्चानाम् एव भूतत्वं कथं समुपपद्यते।

### भृगुरुवाच

**अमितानां महाशब्दो यान्ति भूतानि सम्भवम्।**
**ततस्तेषां महाभूतशब्दोऽयमुपपद्यते॥ ३॥**

**अन्वयः** - अमितानां महाशब्दः भूतानि सम्भवं यान्ति। ततः तेषां अयं महाभूतशब्दः उपपद्यते।

**चेष्टा वायुः खमाकाशमूष्माग्निः सलिलं द्रवः।**
**पृथिवी चात्र संघातः शरीरं पाञ्चभौतिकम्॥ ४॥**

**अन्वयः** - अत्र चेष्टा वायुः, खम् आकाशम्, उष्म अग्निः, द्रवः सलिलम्, संघातः पृथिवी च (अस्ति) शरीरं पाञ्चभौतिकम्।

**इत्येतैः पञ्चभिर्भूतैर्युक्तं स्थावरजङ्गमम्।**
**श्रोत्रं घ्राणं रसः स्पर्शो दृष्टिश्चेन्द्रियसंज्ञिताः॥५॥**

**अन्वयः** - एतैः पञ्चभिः भूतैः स्थावरजङ्गमं युक्तं (अस्ति)। श्रोत्रं, घ्राणं, रसः, स्पर्शः, दृष्टिः च इन्द्रियसंज्ञिता (भवति)।

## भरद्वाज उवाच

**पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावरजङ्गमाः।**
**स्थावराणां न दृश्यन्ते शरीरे पञ्चधातवः॥६॥**

**अन्वयः** - यदि स्थावरजङ्गमाः पञ्चभिः भूतैः युक्ताः (सन्ति), (तर्हि) तु स्थावराणां शरीरे पञ्चधातवः (कथम्) न दृश्यन्ते।

**अनूष्माणामचेष्टानां घनानां चैव तत्त्वतः।**
**वृक्षाणां नोपलभ्यन्ते शरीरे पञ्चधातवः॥७॥**

**अन्वयः** - अनूष्माणाम् अचेष्टानां घनानां च वृक्षाणां शरीरे तत्त्वतः पञ्चधातवः न एव उपलभ्यन्ते।

**न शृण्वन्ति न पश्यन्ति न गन्धरससेविनः।**
**न च स्पर्शं विजानन्ति ते कथं पाञ्चभौतिकाः॥८॥**

**अन्वयः** - (वृक्षाः) न शृण्वन्ति, न पश्यन्ति, न गन्धरससेविनः (सन्ति), न च स्पर्शं विजानन्ति, ते पाञ्चभौतिकाः कथम् (भवितुम् अर्हन्ति) ?

**अद्रवत्वादनग्नित्वादभूमित्वादवायुतः।**
**आकाशस्याप्रमेयत्वाद् वृक्षाणां नास्ति भौतिकम्॥९॥**

**अन्वयः** - वृक्षाणाम् अद्रवत्वात्, अनग्नित्वात्, अभूमित्वात्, अवायुतः, आकाशस्य अप्रेमयत्वात् (च तेषाम्) भौतिकं नास्ति।

## भृगुरुवाच

**घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः।**
**तेषां पुष्पफलव्यक्तिर्नित्यं समुपपद्यते॥१०॥**

**अन्वयः** - घनानाम् अपि वृक्षाणाम् आकाशः अस्ति, (अत्र) संशयः न (अस्ति) तेषां पुष्पफलव्यक्तिः नित्यं समुपपद्यते।

**उष्मतो म्लायते पर्णं त्वक् फलं पुष्पमेव च।**
**म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते॥ ११॥**

**अन्वयः** - उष्मतः पर्णं म्लायते त्वक् फलं पुष्पम् एव च म्लायते शीर्यते अपि च तेन अत्र स्पर्शः विद्यते।

**वाय्वग्न्यशनिनिर्घोषैः फलं पुष्पं विशीर्यते।**
**श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः॥ १२॥**

**अन्वयः** - वाय्वग्न्यनिनिर्घोषैः (वृक्षाणाम्) फलं पुष्पं (च) विशीर्यते श्रोत्रेण शब्दः गृह्यते तस्मात् पादपाः शृण्वन्ति।

**वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति।**
**न ह्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः॥ १३॥**

**अन्वयः** - वल्ली वृक्षं वेष्टयते सर्वतः गच्छति एव च अदृष्टे च मार्गः नास्ति तस्मात् (सिध्यति यत्) पादपा पश्यन्ति।

**पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि।**
**अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः॥ १४॥**

**अन्वयः** - (वृक्षाः) पुण्यापुण्यैः तथा गन्धैः विविधैः धूपैः अपि च अरोगाः पुष्पिताः सन्ति तस्मात् पादपाः जिघ्रन्ति।

**पादैः सलिलपानाच्च व्याधीनां चापि दर्शनात्।**
**व्याधिप्रतिक्रियत्वाच्च विद्यते रसनं द्रुमे॥ १५॥**

**अन्वयः** - पादैः सलिलिपानात् व्याधीनां च अपि दर्शनात् व्याधिप्रतिक्रियत्वात् च द्रुमे रसनं विद्यते।

**वक्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत्।**
**तथा पवनसंयुक्तः पादैः पिबति पादपः॥ १६॥**

**अन्वयः** - यथा उत्पलनालेन वक्रेण जलम् ऊर्ध्वम् आददेत् तथा पवनसंयुक्तः पादपः पादैः (जलं) पिबति।

**सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात्।**
**जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते॥ १७॥**

**अन्वयः** - (वृक्षाणां) सुखदुःखयोः ग्रहणात् छिन्नस्य विरोहणात् च (अहं) वृक्षाणां जीवं पश्यामि (तेषाम्) अचैतन्यं न विद्यते।

**तेन तज्जलमादत्तं जरयत्यग्निमारुतौ।**
**आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते॥ १८॥**

**अन्वयः** - तेन तत् जलम् आदत्तम् अग्निमारुतौ जरयति आहारपरिणामात् च स्नेहः वृद्धिश्च जायते।

**एतेषां सर्ववृक्षाणां छेदनं नैव कारयेत्**
**चातुर्मासे विशेषेण विना यज्ञादिकारणम्॥ १९॥**

**अन्वयः** - एतेषां सर्ववृक्षाणां यज्ञादिकारणं विना छेदनं न कारयेत्, विशेषेण चातुर्मासे एव (एतेषां छेदनं न कारयेत्।)

## शब्दार्थाः

| | |
|---|---|
| आवृता | आच्छादिता |
| अमितानाम् | असीमितानाम् |
| समुपपद्यते | सम्भवति |
| पाञ्चभौतिकम् | पञ्चभूतात् जातः |
| स्थावरजङ्गमाः | जडचैतन्यम् |
| स्थावराणाम् | जडानाम् |
| अनूष्मणाम् | अतप्तानाम् |
| अचेष्टानाम् | अक्रियाणाम् |
| गन्धरसवेदिनः | गन्धरसौ जानन्ति ये |
| पुष्पफलव्यक्तिः | पुष्पफलानामुत्पत्तिः |
| अशनिः | विद्युत् |
| अप्रमेयत्वाद् | अज्ञेयत्वात् |
| म्लायते | म्लानं भवति/मूर्च्छति |
| शीर्यते | शुष्यति |
| वल्ली | लता |

| अरोगाः | अनामयाः |
|---|---|
| द्रुमे | वृक्षे |
| विरोहणात् | पुनरुद्गमनात् |
| जलमाददेत् | जलं भक्षयेत् |

## अभ्यासः

### १. सर्वान् प्रश्नान् समाधत्त -

(क) ब्रह्मा पुरा कान् असृजत् ?

(ख) पाञ्चभौतिकं किम् ?

(ग) स्थावराणां शरीरे के न दृश्यन्ते ?

(घ) आकाशस्याप्रमयेत्वाद् वृक्षाणां नास्ति भौतिकं कस्योक्तिरियम् ?

(ङ) पादपेषु कथं स्पर्शत्वं विद्यते?

### २. पूर्णवाक्येन प्रश्नाः समाधेयाः -

(क) कस्माच्छृण्वन्ति पादपाः ?

(ख) कस्मात् पश्यन्ति पादपाः?

(ग) कस्मात् जिघ्रन्ति पादपाः?

(घ) वृक्षेषु जीवं विद्यते वा न वा ?

(ङ) वृक्षाः जलपानं कथं कुर्वन्ति ?

### ३. रिक्तस्थानानि पूरयत -

(क) जीवं पश्यामि वृक्षाणाम् .......................................... ।

(ख) ...................................... स्नेहोवृद्धिश्च जायते।

(ग) तथा पवनसंयुक्तः ...................................... पादपः।

(घ) अरोगाः पुष्पिताः ...................................... जिघ्रन्ति पादपाः।

(ङ) न श्रृण्वन्ति न पश्यन्ति ...................................... ।

### ४. अधोलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत -

सन्धिः/सन्धिविच्छेदः

(क) ते + एते ........................

(ख) शब्दोऽयमुपपद्यते ................... + ...................

(ग) च + एव ..........................

(घ) तस्माच्छृण्वन्ति .................. + ....................

(ङ) आकाशः + अस्ति ..........................

(च) वाय्वग्न्यशनिनिर्घोषैः ................ + ................ + ................

(छ) सर्वतः + चैव ................................

(ज) तस्माज्जिघ्रन्ति ................. + ....................

(झ) यथा + ऊर्ध्वम् ....................

(ञ) अस्मिन्नेव .................. + .................

## ५. अधोलिखितानां पदानाम् अर्थं विलिख्य वाक्येषु प्रयोगं कुरुत -

| | अर्थम् | वाक्यप्रयोगः |
|---|---|---|
| (क) पादपाः | ............... | ............... ............... ............... |
| (ख) वल्ली | ............... | ............... ............... ............... |
| (ग) वेष्टयते | ............... | ............... ............... ............... |
| (घ) अरोगाः | ............... | ............... ............... ............... |
| (ङ) व्याधीनाम् | ............... | ............... ............... ............... |
| (च) द्रुमे | ............... | ............... ............... ............... |
| (छ) जायते | ............... | ............... ............... ............... |
| (ज) अचैतन्यम् | ............... | ............... ............... ............... |
| (झ) पिबति | ............... | ............... ............... ............... |
| (ञ) म्लायते | ............... | ............... ............... ............... |
| (ट) शीर्यते | ............... | ............... ............... ............... |
| (ठ) शृण्वन्ति | ............... | ............... ............... ............... |
| (ड) पश्यन्ति | ............... | ............... ............... ............... |
| (ढ) विरोहणात् | ............... | ............... ............... ............... |

## ६. प्रयोगपरिवर्तनं कुरुत -

(क) वृक्षाः सुखदुःखयोर्ग्रहणं कुर्वन्ति।

(ख) वृक्षे जीवोऽस्ति।

(ग) तृणेष्वपि दयाभावना भवेत्।

(घ) पुरा ब्रह्मणा एते धातवः असृज्यन्त।

(ङ) वृक्षाणां नोपलभ्यन्ते शरीरे पञ्च धातवः।

७. रेखाङ्कितपदान्याश्रित्य कारकविभक्ती निर्दिशत -

(क) वाय्वग्न्यशनिनिर्घोषैः फलं पुष्पं विशीर्यते।

(ख) वृक्षाणां पीडनं न कुर्यात्।

(ग) आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते।

(घ) जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते।

(ङ) द्रुमे रसनं विद्यते।

८. विग्रहवाक्यपूर्वकं समाससूत्रं लिखत -

| | विग्रहवाक्यम् | समाससूत्रम् |
|---|---|---|
| (क) पुण्यापुण्यैः | .............................. | .............................. |
| (ख) वाय्वग्न्यशनिनिर्घोषः | .............................. | .............................. |
| (ग) पुष्पफलव्यक्तिः | .............................. | .............................. |
| (घ) महाभूताभिसंज्ञिताः | .............................. | .............................. |
| (ङ) गन्धरससेविनः | .............................. | .............................. |

१०. अधोलिखिते श्लोके प्रयुक्तस्य छन्दसः नाम लिखत -

उष्मतो म्लायते पर्णं त्वक् फलं पुष्पमेव च।
म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते॥

११. अधोलिखितस्य श्लोकस्य स्वाशयं स्पष्टीकुरुत -

वाय्वग्न्यशनिनिर्घोषैः फलं पुष्पं विशीर्यते।
श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः॥

१२. पादपाः कथं पाञ्चभौतिकाः इति भृगुमतं स्पष्टीकुरुत।

## योग्यताविस्तारः

तस्माद्दयावता भाव्यं तृणेष्वपि विपश्चिता।
तृणान्यपि सजीवानि तेषां कुर्यान्न पीडनम्॥

*विष्णुधर्मोत्तरपुराणम् २९२*

तरुरेकोऽपि रूढोऽस्मिन् नोच्छेद्यः छाययान्वितः।
किं पुनर्गृहदारूणि सुखदानि सुखार्थिनाम्॥
इन्धनार्थं द्रुमच्छेदः स्त्रीहिंस्रौषधजीवनम्।
हिंस्रयन्त्रविधानं च व्यसनान्यात्मविक्रयः॥
असच्छास्त्राऽधिगमनमाकरेष्वधिकारिता।
भार्याविक्रयणं चैषामेकैकमुपपातकम्॥

*याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्याये २४० – २४२*

# त्रयोदशः पाठः

# नैषधीयचरितम्

संस्कृतमहाकाव्येषु यानि बृहत्त्रय्यां परिगणितानि सन्ति तानि - "किरातार्जुनीयम्" (भारविविरचितम्) "शिशुपालवधम्" (माघविरचितम्) एवञ्च महाकविश्रीहर्षविरचितं "नैषधीयचरितम्" इति। उपर्युक्तेषु त्रिषु महाकाव्येषु "नैषधीयचरितम्" इति महाकाव्यस्य सर्वोत्कृष्टं स्थानं विद्यते उक्तञ्च -

**तावद् भा भारवेर्भाति यावन्माघस्य नोदयः।**
**उदिते नैषधे काव्ये क्व माघः क्व च भारविः॥**

काव्येऽस्मिन् द्वाविंशतिः सर्गाः त्रिशदधिकाष्टाविंशतिशतं (२८३०) श्लोकाश्च विद्यन्ते। प्रथमे सर्गे सर्वत्र वंशस्थच्छन्दो वर्तते, परन्तु सर्गान्ते यथाक्रमं दोधका, वसन्ततिलका च छन्दो वर्तते। शार्दूलविक्रीडितच्छन्दांसि त्रिषु श्लोकेषु विराजन्ते। अवधेयम् अस्ति यत् सर्गान्ते 'आनन्द' इत्यस्य प्रयोगात् काव्यमिदं आनन्दाङ्ककाव्यम् इत्यभिधीयते। अत्र नायकः नलः नायिका च दमयन्ती वर्तते। अस्य महाकाव्यस्य रचयिता महाकविश्रीहर्षः। महाकविरयं काशीवास्तव्यस्य गढवालवंशोत्पन्नस्य विजयचन्द्रस्य सभापण्डित आसीत्। अस्य कवेः पिता हीरः माता च मामल्लदेवी आस्ताम्। स्वविषये कविना इत्थमुक्तम् -

**श्रीहर्षः कविराजराजि मुकुटालेकारहीरः सुतम्।**
**श्रीहरिः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्॥**
**तच्चिन्तामणिमन्त्रचिन्तनाफले श्रृङ्गारभङ्ग्या**
**महाकाव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः॥**

अनेन श्लोकमाध्यमेन महाकवेः परिचयपूर्वकं कवेः साधनस्य एवञ्च सर्गस्य विषयो ज्ञायते। प्रस्तुतेऽस्मिन् पाठ्यांशे प्रथमसर्गस्य केचन श्लोकाः संकलिताः। अस्मिन् महाकाव्ये निषधदेशस्य अधिपस्य नलस्य चरित्रं वर्ण्यते।

**निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधास्सुधामपि।**
**नलस्सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः॥१॥**

**अन्वयः -** क्षितिरक्षिणः यस्य कथां निपीय बुधाः सुधामपि न आद्रियन्ते सितच्छत्रितकीर्तिमण्डलः महसां राशिः (इव) महोज्ज्वलः स नलः आसीत्।

**रसैः कथा यस्य सुधावधीरिणी नलः स भूजानिरभूद् गुणाद्भुतः।**

**सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः॥२॥**

**अन्वयः -** यस्य कथा रसैः सुधावधीरिणी, भूजानिः सुवर्णदण्डैकसितातपत्रितज्वलत्प्रता-पावलिकीर्तिमण्डलः स नलः गुणाद्भुतः अभूत्।

**पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा।**

**कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति॥३॥**

**अन्वयः -** यत्कथा स्मृता अत्र युगे जगत्पवित्रम् आतनुते सा आविलाम् अपि स्वसेविनीम् एव मद्गिरं रसक्षालनया इव कथं न पवित्रयिष्यति।

**अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः।**

**चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्॥४॥**

**अन्वयः -** अयं चतुदर्शसु विद्यासु अधीतिबोधाचरणप्रचारणैः उपाधिभिः चतस्रः दशाः प्रणयन् स्वयं चतुर्दशत्वं कुतः कृतवान् [इति] न वेद्मि।

**अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम्।**

**अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्॥५॥**

**अन्वयः -** अमुष्य रसनाग्रनर्तकी विद्या अङ्गगुणेन विस्तरं नीता त्रयी इव नवद्वयद्वीपपृथग्जयश्रियां जिगीषया अष्टादशतां अगाहत।

**स्फुरद्धनुर्निस्वनतद्धनाशुगप्रगल्भवृष्टिव्ययितस्य सङ्गरे।**

**निजस्य तेजश्शिखिनः परश्शता वितेनुरिङ्गालमिवायशः परे ॥९॥**

**अन्वयः -** सङ्गरे परश्शताः परे स्फुरद्धनिर्निस्वनतद्धनाशुगप्रगल्भवृष्टिव्ययितस्य निजस्य तेजश्शिखिनः इङ्गालमिव अयशः वितेनुः।

**अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च।**

**दधौ पटीयान् समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने॥१७॥**

**अन्वयः -** दिनेश्वरश्रीः पटीयान् अयं देवः अजस्रम् अभ्यासम् उपेयुषा कविना बुधेन च मुदा समम् एव समयं नयन् दिने दिने उदयं दधौ।

**अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे।**

**तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्विकशर्वरीश्वरः॥२०॥**

**अन्वयः** - तदङ्घ्रिणा पद्मेषु घृणा अधारि, पल्लवे तच्छयच्छायलवः अपि क्व ? शारदः पार्विकशर्वरीश्वरः तदास्यदास्ये अपि अधिकारितां न गतः।

**न केवलं प्राणीवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः।**
**विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि॥ १३१॥**

**अन्वयः** - त्वदीक्षणाद् विश्वसितान्तरात्मनः मम वधः केवलं प्राणीवधः न, विश्वासजुषां द्विषामपि निबर्हणं धर्मधनैः विशिष्य विगर्हितम्।

**मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।**
**गतिस्तयोरेष जनस्तमर्दयन् अहो विधे! त्वां करुणा रुणद्धि न॥ १३५॥**

**अन्वयः** - अहो विधे ! मदेकपुत्रा जननी जरातुरा वरटा नवप्रसूतिः तपस्विनी एषः जनः तयोः गतिः तम् अर्दयन् त्वां करुणा न रुणद्धि।

## शब्दार्थाः

| | |
|---|---|
| क्षितिरक्षिणः | पृथ्वीपालकस्य/राज्ञः |
| यस्य | नलस्य |
| निपीय | नितराम् आस्वाद्य |
| सुधाम् | अमृतम् |
| सितच्छत्रितकीर्तिमण्डलः | श्वेतातपत्रीकृतयशसमूहः |
| महसाम् | तेजसाम् |
| सुधावधीरिणी | अमृतात् अतिरिच्य मानस्वादा |
| भूजानिः | भूपतिः (भूः जाया यस्य स भूजानिः) |
| गुणाद्भुतः | गुणैः शौर्यदाक्षिण्यादिभिः अद्भुतः |
| रसक्षालनयेव | जलप्रक्षालनया इव |
| अविलाम् | कलुषामपि |
| स्वसेविनीम् | केवलस्वकीर्तने संलग्नाम् |
| अधीतिबोधाचरणप्रचारणैः | अधीतिः, बोधः, आचरणम्, प्रचारणम् एतैः चतुर्भिः उपाधिभिः |
| प्रचारणम् | अध्यापनम् |
| रसनाग्रनर्तकी | रसनायाः जिह्वायाः अग्रभागे नर्तकी – नर्तनशीला |

| | |
|---|---|
| त्रयी इव | वेदत्रयी इव (ज्ञान – कर्म – उपासनाप्रधानैः) |
| नवद्वयद्वीपपृथग्जयाश्रियाम् | नवानां द्वम् इति नवद्वयम् अष्टादशतां अष्टादशानां पृथग्भूता या जयश्रीः तासाम् |
| जिगीषया | जेतुमिच्छया |
| अगाहत | अभजत् |
| उज्झित्ता | त्यक्ता |
| मित्रजिद् | मित्रं सूर्यं जयतीति तथाभूतः |
| विचारदृग् | चारैः गूढपुरुषैः पश्यतीति |
| अजस्रम् | सततम्/निरन्तरम् |
| मुदा एव | आनन्देन एव |
| तदङ्घ्रिणा | तस्य नलस्य  चरणेन |
| तच्छयच्छायलवः अपि | तस्य नलस्य शयः पाणिः |
| शारदः | शरदि भवः शारदः/शरत्कालिकः |
| पार्विकशर्वरीश्वरः | पर्वणि पौर्णमास्यां भव पार्विकः च असौ शर्वरीश्वरश्च, पूर्णचन्द्रः इति |
| तदास्यदास्ये | तस्य नलस दास्ये/कैकेयेऽपि |
| अधिकारिताम् | योग्यताम् |
| विश्वसितान्तरात्मनः | विश्वसितः विश्वासं प्राप्तः अन्तरात्मा मनो यस्य तादृशस्य |
| विश्वासजुषाम् | विस्रम्भभाजाम् |
| निबर्हणम् | हिंसनम् |
| धर्मधनैः | धर्म एव धनं येषां तैः (मन्वादिभिः) |
| विगर्हितम् | निन्दितम् |
| मदेकपुत्रा | अहमेव एकः पुत्रो यस्याः |
| अदयन् | पीडयन् |

# अभ्यासः

१. **सर्वान् प्रश्नान् समाधत्त -**

(क) नैषधीयचरितमहाकाव्यस्य रचयिता कः ?

(ख) निषधदेशस्य राजा कः आसीत् ?

(ग) श्रीहर्षप्रणीते महाकाव्ये कति सर्गाः विद्यन्ते ?

(घ) क्षितिरक्षिणः इति कस्य विशेषणम् ?

(ङ) 'निपीय' इति शब्दस्यार्थः कः ?

२. **सर्वे प्रश्नाः समाधेयाः -**

(क) बुधाः सुधाः कथं न आद्रियन्ते ?

(ख) सुधावधीरिणी इति कस्य विशेषणम् ?

(ग) भूजानि इति शब्दस्य विग्रहः कः ?

(घ) चतुर्दशसु विद्यासु पारङ्गतः कः? काः विद्याः?

(ङ) कस्य अङ्घ्रिणा पद्मेषु घृणा अधारि ?

३. **यथायोग्यं मेलयत -**

| | |
|---|---|
| (क) न केवलं | कविना बुधेन च |
| (ख) मुदैव देवः | जननी जरातुरा |
| (ग) मदेकपुत्रा | करुणा रुणद्धि नो |
| (घ) अहो विधे ! त्वां | प्राणिवधो वधो मम |
| (ङ) जनः | तमर्दयन् |

४. **पर्यायवाचिशब्दान् लिखित्वा वाक्यानि निर्मात -**

(क) क्षितिरक्षिणः ........................................।

(ख) बुधाः ........................................।

(ग) रसैः ........................................।

(घ) भूजानिः ........................................।

(ङ) जगत् ........................................।

## ५. अधोलिखितशब्दान् चित्वा प्रकृति-प्रत्ययौ विभजत -

| | प्रकृतिः | प्रत्ययः |
|---|---|---|
| (क) आद्रियन्ते | ............... ............... | ............... ............... |
| (ख) कीर्तिः | ............... ............... | ............... ............... |
| (ग) निपीय | ............... ............... | ............... ............... |
| (घ) ज्वलन्ती | ............... ............... | ............... ............... |
| (ङ) वेद्मि | ............... ............... | ............... ............... |

## ६. अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासं निर्दिशत -

| | विग्रहवाक्यम् | समासः |
|---|---|---|
| (क) क्षितिरक्षिणः | ............... ............... | ............... ............... |
| (ख) महोज्ज्वलः | ............... ............... | ............... ............... |
| (ग) तदङ्घ्रिणा | ............... ............... | ............... ............... |
| (घ) धर्मधनैः | ............... ............... | ............... ............... |
| (ङ) पार्विकशर्वरीश्वरः | ............... ............... | ............... ............... |

## ७. अधोलिखितपदानां सन्धिविच्छेदपूर्वकं सन्धिसूत्रं लिखत -

| | सन्धिविच्छेदः | सन्धिसूत्रम् |
|---|---|---|
| (क) महोज्ज्वलः | ............... + ............... | ............... ............... |
| (ख) तथाद्रियन्ते | ............... + ............... | ............... ............... |
| (ग) दशाश्वतस्त्रः | ............... + ............... | ............... ............... |
| (घ) मुदैव | ............... + ............... | ............... ............... |
| (ङ) प्रणयन्नुपाधिभिः | ............... + ............... | ............... ............... |

## ८. प्रयोगपरिवर्तनं कुरुत -

(क) रसक्षालनया इव कथन्न पवित्रयिष्यति मद्गिरम्।

(ख) तदङ्घ्रिणा पद्मेषु घृणा अधारि।

(ग) स नलः गुणाद्भूतः अभूत्।

(घ) तेजः अङ्गारम् इव अयशः वितेनुः।

(ङ) त्वां करुणा न रुणद्धि।

९. रेखाङ्कितपदान्यवलम्ब्य कारकविभक्ती निर्णयत -

(क) मम वधः केवलं प्राणीवधः न।

(ख) तदङ्गिणा पद्मेषु घृणा अधारि।

(ग) अयं चतुर्दशसु विद्यासु चतुर्दशत्वं कुतः कृतवान्।

(घ) त्वां करुणा न रुणद्धि।

(ङ) बृहत्त्रय्यां नैषधीयचरितं परिगण्यते।

१०. अधोलिखितश्लोकं पूरयित्वा स्ववाण्या सरलया पञ्चविंशत्या वाक्यैः व्याख्यात।

अधीतिबोधाचरणप्रचारणै .......................................।

## योग्यता-विस्तारः

➢ पाठेऽस्मिन् केचन श्लोका एव संगृहीताः, समग्राध्ययनाय मूलपुस्तकमेव पठितव्यम्।

➢ महाकवेः श्रीहर्षस्य कृतयः -

१ नैषधीयचरितम्

२. विजयप्रशस्तिः

३. खण्डनखण्डखाद्यम्

४. गौडोर्वीकुलप्रशस्तिः

५. अर्णववर्णनम्

६. छिन्दप्रशस्तिः

७. शिवशक्तिसिद्धिः

८. नवसाहसाङ्कचरितचम्पूः

९. स्थैर्यविचारप्रकरणम्

- अस्मिन् महाकाव्ये निषधदेशस्य नलस्य चरित्रं प्रस्तूयते।
- ग्रन्थेऽस्मिन् २२ सर्गाः, २८३० श्लोकाश्च सन्ति।
- कान्यकुब्जाधिपतेः सभायां सभापण्डित आसीत् श्रीहर्षः।

नैषधीयचरितस्य प्रथमसर्गे १४५ श्लोकाः उपलभ्यन्ते। छन्दश्शास्त्रदृष्ट्या सर्गेऽस्मिन् वंशस्थच्छन्दः किन्तु सर्गान्ते क्रमशः दोधक-वसन्ततिलका-शार्दुलविक्रीडितच्छन्दांसि त्रिषु श्लोकेषु विराजन्ते। ज्ञातमस्ति यत् सर्गान्ते आनन्द इति पदप्रयोगादिदं काव्यम् आनन्दाङ्ककाव्यम् इत्युच्यते।

# चतुर्दशः पाठः

## वेदभाष्यकाराः

वेदोऽखिलो धर्ममूलम् इत्युक्त्या ऋषिदृष्टाः अपौरुषेयाः वेदाः समग्रस्य धर्मस्य, भारतीयजीवनपद्धतेः, सर्वेषां मानवानां कर्तव्याकर्तव्ययोः बोधकाः सन्ति। वैदिक्यां संस्कृतभाषायां ऋषिभिः वेदाः दृष्टाः संप्रवर्तिताः च। प्राचीनकाले संस्कृतभाषा अखण्डे विशाले भारतवर्षे चतसृषु अपि दिक्षु भाषितभाषा आसीत् इति कारणतः सर्वे वेदाध्येतारः जनाः सुलभतया वेदार्थान् जानते स्म।

भारतीयसंस्कृतेः पोषयित्र्याः संस्कृतभाषायाः सकाशात् एव सुदीर्घकालात्परं बह्व्यः प्राकृतभाषाः समुत्पन्नाः, ताः तत्र तत्र प्रदेशेषु व्यवहारभाषाः समभवन्। इत्थं संस्कृतभाषायाः साक्षात् भाषितभाषात्वेन व्यवहारात् जनमानसात् च दूरंगमात् वेदार्थान् जनाः ज्ञातुमपारयन्। वैदिकज्ञानपरम्परायाः अविच्छिन्ना धारा जनमानसात् मन्दं मन्दं तिरोधानं गता। अतः यथावत् वेदार्थानाम् अवबोधने, अनुशीलने, गवेषणे च वैदिक-लौकिकसंस्कृतभाषाभेदात् विपश्चितः अपि क्लेशम् अन्वभवन्। सर्वस्यापि वेदार्थस्य सम्यक् ज्ञानाभावात् मानवजीवनं, समाजः, राष्ट्रं च संस्कारपथात् दूरं गच्छेत्, संस्कृतिः विनश्येत् इति विचिन्त्य वेदार्थचिन्तकाः वेदभाष्यकाराश्च वेदानां भाष्याणि विरचितवन्तः।

ते च यथा - आचार्यः स्कन्दस्वामी, श्रीभट्टभास्करः, सायणाचार्यः, श्रीवेङ्कटमाधवः, आचार्यः उव्वटः, आचार्यः महीधरः, आचार्यः हलायुधः, श्रीमाधवाचार्यः च वेदभाष्यकाराः। मन्त्राणां ऋषि-देवता-छन्दो निरूपणपूर्वकं वेदमन्त्राणां सम्यक् व्याख्या तैः वेदार्थज्ञापनाय मानवानां समुद्धाराय च कृता। आधुनिकाः व्याख्याकाराः स्वामी दयानन्दसरस्वती, आचार्यः श्री-अरविन्दः च आधुनिकदृष्ट्या वेदार्थान् आविश्चक्रुः।

**वेदभाष्यकारः स्कन्दस्वामी** -

ऋग्वेदसंहितायाः सर्वप्रथमभाष्यकारः स्कन्दस्वामी सौराष्ट्रस्य (गुजरातप्रदेशस्य) राजधानीरूपेण पुरा प्रथिते वलभी इत्याख्ये नगरे जनिम् अलभत। अस्य पिता भर्तृध्रुवः आसीत् इति अनेन श्लोकेन ज्ञायते -

**वलभीविनिवास्येतामृगर्थागमसंहतिम्।**
**भर्तृध्रुवसुतश्चक्रे स्कन्दस्वामी यथास्मृति॥**

स्कन्दस्वामिनः शिष्यः हरिस्वामी। आचार्यस्य स्कन्दस्वामिनः कालक्रमः विमर्शग्रन्थाध्ययनेन अवलोकनीयः ।

अनेन कृते भाष्ये ऋग्वेदस्य मन्त्राणां विशदचर्चा वर्तते। ऋग्वेदस्य प्रत्येकं सूक्तस्यारम्भे सूक्तस्य ऋषेः देवतायाश्च उल्लेखो दृश्यते। निघण्टु-निरुक्तादीनां विषय-नामोद्धरणान्यपि अस्मिन् भाष्ये समुपलभ्यन्ते। भाष्यमिदं सरलभाषया मिताक्षरीच्छन्दसा प्रणीतं विद्यते। स्कन्दस्वामिनः इदं भाष्यं केवलं चतुर्थाष्टकं यावत् कृतम्। अपरभागद्वयं नारायणोद्गीथाभ्यां कृतम्। तदेवोक्तं भेङ्कटमाधवेन -

**स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात्।**
**चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम्॥**

**वेदभाष्यकारः भट्टभास्करः**

वेदभाष्यकारेषु भट्टभास्करः महत्त्वपूर्णः अस्ति। भट्टभास्करः कृष्णयजुर्वेद-तैत्तिरीयसंहिताम् आश्रित्य ज्ञानयज्ञनामकं भाष्यं प्रणीतवान्। कतिपयानां लुप्तानां वैदिकनिघण्टूनाम् उल्लेखः अपि अनेन अत्र कृतः अस्ति। अत्र मन्त्राणां न केवलं यज्ञपरकः अर्थः कृतः, अपि तु अध्यात्मपद्धत्या, अधिदैवतया अपि अर्थः वर्णितः अस्ति।

**वेदभाष्यकारः सायणः**

वेदभाष्यकारेषु सायणाचार्यः मूर्धन्यः सर्वोपरि च वर्तते। समग्रस्य वेदवाङ्मयस्य भाष्याणि सायणाचार्यः रचयामास। अयं महाराजबुक्कस्य आज्ञया, भ्रातुः माधवस्य अभिप्रेरणया च वेदभाष्यरचनायां प्रवृत्तोऽभवत्। तदेवोक्तं तैत्तिरीयसंहितायाः भाष्योपक्रमणिकायाम् -

**तत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपतिः।**
**आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने॥**
**स प्राह नृपतिं राजन् सायणाचार्यो ममानुजः।**
**सर्वं वेत्त्येष वेदानां व्याख्यातृत्वे नियुज्यताम्॥**
**इत्युक्तो माधवाचार्येण वीरो बुक्कमहीपतिः।**
**अन्वशात् सायणाचार्यं वेदार्थस्य प्रकाशने॥**
**ये पूर्वोत्तरमीमांसे ते व्याख्यायति संग्रहात्।**
**कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः॥**

**सायणाचार्यप्रणीतानि** वैदिकवाङ्मयस्य भाष्याणि - तैत्तरीयसंहिता, ऋग्वेदसंहिता, सामवेदसंहिता, काण्वसंहिता, अथर्ववेदसंहिता, तैत्तिरीयब्राह्मणम्, तैत्तिरीयारण्यकम्, ऐतरेयारण्यकम्, ऐतरेयब्राह्मणम्, ताण्ड्यब्राह्मणम्, षड्विंशब्राह्मणम्, सामविधानब्राह्मणम्, आर्षेयब्राह्मणम्, देवताध्यायब्राह्मणम्, उपनिषद्ब्राह्मणम्, संहितोपनिषद्ब्राह्मणम्, वंशब्राह्मणम् इत्येतस्य समग्रस्य वैदिकवाङ्मयस्य सायणाचार्यः भाष्याणि प्रणिनाय।

सायणाचार्यः बुक्कमहीपतेः (१३६४ ई. तः १३७८ ई. यावत्) राजसभायामासीत् , तदादेशेन वेदभाष्याणि प्रणेतुं समारेभे। अतः सायणाचार्यो बुक्कमहाराजस्य समकालिकः इति ज्ञायते।

**वेदभाष्यकारो हलायुधः -**

सायणचार्यात् पूर्ववर्तिषु आचार्येषु हलायुधः ईदृशो विद्वान् आसीत्, यः काण्व-यजुर्वेदसंहितायाः स्वकीयम् उत्कृष्टं भाष्यं चकार। अस्य भाष्यस्य नाम ब्राह्मणसर्वस्वम् अस्ति। भाष्यस्य प्रारम्भे स्वकीयं परिचयं प्रददद् हलायुधः प्राह -

**बाल्ये ख्यापितराजपण्डितपदं श्वेतार्चिबिम्बोज्ज्वल-**
**च्छत्रोत्सिक्तमहामहस्तमुपदं दत्त्वा नवे यौवने।**
**यस्मै यौवनशेषयोग्यमखिलक्ष्मापालनारायणः,**
**श्रीमान् लक्ष्मणसेनदेवनृपतिः धर्माधिकारं ददौ॥**

अनेन श्लोकेन ज्ञायते यत् असौ बाल्यकालादेव राजपण्डितः अभवत्। नवयौवने श्वेतच्छत्रधारणस्य अधिकारम् अवाप्नोत्। वार्धक्ये च 'धर्माधिकारिणः' इति पदेन विभूषितः। अयं राज्ञः बल्लालसेनस्य समयकालिकः आसीत्। बल्लालसेनस्य सिंहासनारोहणकालः ११७०तमः खीष्टाब्दः। अत एव विपश्चिद्भिः हलायुधस्य अयमेव कालो निश्चियते। अनेन विदुषा ब्राह्मणसर्वस्वम्, मीमांसासर्वस्वम्, वैष्णवसर्वस्वम्, पण्डितसर्वस्वं चेति पञ्चग्रन्थाः प्रणीताः।

**वेदभाष्यकारो वेङ्कटमाधवः**

वेङ्कटमाधवः सम्पूर्ण-ऋक्संहितायाः भाष्यं चकार। अस्य पिता वेङ्कटाचार्यः, माता च सुन्दरी आसीत्। अयं चोलदेशवास्तव्यः त्रयोदशशततमात् वर्षात् (१३००) पूर्वम् एव आसीत्।

माधवस्य भाष्यं संक्षिप्तं वर्तते। तेनैवोक्तम् - वर्जयन् शब्दविस्तारं शब्दैः कतिपयैरिति। अस्य भाष्ये मन्त्रस्थपदानां व्याख्या एव कृता। वेदानां गूढार्थबोधने ब्राह्मणग्रन्थाः नितान्तोपयोगिन इति माधवेनोक्तम् -

**संहितायास्तुरीयांशं विजानन्त्यधुनातनाः।**

**निरुक्तव्याकरणयोरासीद्येषां परिश्रमः॥**

**अथ ये ब्राह्मणार्थानां विवेक्तारः कृतश्रमाः।**

**शब्दरीतिं विजानन्ति ते सर्वे कथयन्त्यपि॥**

**वेदभाष्यकारः उव्वटः**

कश्मीरकः विद्वान् उव्वटो यजुर्वेद-माध्यन्दिनसंहितायाः भाष्यकारेष्वन्यतमः। उव्वटकृते शुक्लयजुर्वेदभाष्ये उक्तम् -

**ऋष्यादींश्च पुरस्कृत्य अवन्त्यामुवटो वसन्।**

**मन्त्रभाष्यमिदं चक्रे भोजे राष्ट्रं प्रशासति॥**

यथा वा -

**आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना।**

**मन्त्रभाष्यमिदं क्लृप्तं भोजे पृथ्वीं प्रशासति॥**

भोजराजस्य शासनकाले अवन्त्याम् अद्यतन्याम् उज्जयिन्यां वसन् उव्वटः भाष्यं चकार इति ज्ञायते। भोजराजस्य समयः १०१८ ई. - १०६३ ई. भवति। अत उव्वटस्य समयः एकादशशतकस्य पूर्वार्द्ध आसीदिति निश्चयेन प्रमाणीकर्तुं शक्यते। अस्य भाष्यं अर्थगाम्भीर्येण पूर्णं, सरलं, प्रामणपरिष्कृतं चास्ति। अत्र मन्त्राणामर्थोऽध्यात्मपरतया व्यख्यातः अस्ति।

**वेदभाष्यकारो माधवाचार्यः**

चत्वारो माधवाचार्याः इतिहासलेखकैः उल्लिखिताः। तेषु चतुर्षु माधवेषु अन्यतमः कः सामवेदसंहितायाः भाष्यं चकार इति स्पष्टतरं नास्ति। माधवाचार्यः सामवेदसंहितायाः प्रथमं भाष्यम् अकरोत्। विवरणनामकं भाष्यमिदं सामवेदस्य द्वयोः आर्चिकयोः सम्पूर्णस्य

व्याख्यानम् उपस्थापयति। पूर्वार्चिकभाष्यं छन्दसिकाविवरणम्, उत्तरार्चिकभाष्यम् उत्तरविवरणम् इति नामभ्यां प्रसिद्धमस्ति।

**वेदभाष्यकारो महीधरः**

महीधरः प्रसिद्धवेदभाष्यकारेष्वन्यतमः नागरब्राह्मणवंशीयः काश्यां निवासमकरोदिति ज्ञायते। काश्यामध्ययनं विधाय 'वेददीप' इत्याख्यं शुक्लयजुर्वेदभाष्यं तथा सामवेदभाष्यं च रचयामास। सप्तदशशततमे ईसवीयवत्सरे (१७०० ई.) सामभाष्यस्य रचनामकरोत् इति ज्ञायते। अस्य भाष्ये उव्वटस्य प्रभावः परिलक्ष्यते। तत्र महीधरभाष्ये आदौ एषा पङ्क्तिः दृश्यते - "तत्रादौ ब्रह्मपरम्परया प्राप्तं वेदं वेदव्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तत्कृपया चतुर्धा व्यस्य ऋग्यजुस्सामाथर्वाख्यांश्चतुरो वेदान् पैल-वैशम्पायन-जैमिनि-सुमन्तुभ्यः क्रमादुपदिदेश, ते च स्वशिष्येभ्यः। एवं परम्परया सहस्रशाखो वेदो जातः।" इति।

न केवलम् इमे एव, अन्ये अपि आनन्दतीर्थ-आत्मानन्दप्रभृतयः भाष्यकाराः सन्ति, तेषां कृतयः अपि यथासमयं ज्ञेयाः।

**वेदभाष्यकारो दयानन्दसरस्वती**

गुर्जर-प्रान्तान्तर्गते टंकानगरे चतुर्विंशत्यधिकाष्टादशशततमे वर्षे (१८२४) लब्धजन्मा सामवेदीयौदीच्यब्राह्मणः मूलशङ्कर-नामको बालः, संन्यासात् परं स्वामी दयानन्दसरस्वती इति प्रसिद्धः वेदभाष्यकारेष्वन्यतमः, आधुनिकेषु वेदभाष्यकारेषु अग्रणीः। गुरुः पूर्णानन्दयतिः आसीत्। स्वामिवर्यः १८७५तमे वर्षे मुम्बई-नगरे आर्यसमाजस्य स्थापनां कृत्वा समाजस्य सर्वेषां जनानाम् उपकाराय वेदानां वैदुष्यपूर्णं भाष्यं रचयामास। स्वामिदयानन्दवर्यः वेदोऽस्माकं भारतस्य राष्ट्रियो निधिः इति समुद्घोषयन् सर्वजनोपकाराय वेदस्य समग्रं प्रचारं कृतवान्।

अस्य कृतिषु ऋग्वेदभाष्यम्, यजुर्वेदभाष्यम्, ऋग्वेदादिभाष्यभूमिका, सत्यार्थप्रकाशः इत्यादिग्रन्थाः वेदस्य प्रचारे प्रसारे च प्रमुखां भूमिकां निर्वहन्ति। अयं १८७५तमे वर्षे अक्टूबरमासस्य ३०तमे दिनाङ्के दीपावलीदिने दिवं जगाम।

**श्री-अरविन्दः**

आधुनिकवेदव्याख्याकारेषु महर्षेः अरविन्दस्य विचारः अत्यद्भुतः प्रशंसनीयः उपादेयश्चास्ति। The Secrets of the Vedas इति ग्रन्थे महर्षिः अरविन्दः प्राह यत् वेदमन्त्राः दिव्यस्रोतसः प्रस्फुटिताः ज्ञानराशयः, तेषु शाश्वतिकम् अपौरुषेयञ्च सत्यं निहितम् अस्ति। एतेषां मन्त्राणां द्रष्टारः ऋषयः आध्यात्मिकशक्तिसम्पन्नाः गूढज्ञानयुक्ताश्च अभूवन् इति।

न केवलम् इमे एव, अन्ये अपि वैदेशिकाः भारतीयाः व्याख्याकाराः शतशः सन्ति। यथासमयं यथावश्यकं तेषां कृतयः अपि ज्ञातुं शक्याः। इत्थं वेदभाष्यकाराणां विषये ज्ञात्वा सर्वे वेदच्छात्राः अध्ययनकाले यथासम्भवं वेदार्थज्ञानाय प्रयतेरन् इति निवेदनम् अस्ति।

## शब्दार्थः

| | |
|---|---|
| अनुशीलयितॄणाम् | पौनःपुन्येन अभ्यासकर्तॄणाम् |
| उपपत्तिक्रमेण | उपक्रमेण, प्रस्तावक्रमेण |
| प्रास्फुरत् | अकथयत् |
| जग्मुः | गमनं चकार |
| चकार | कृतवान् |
| नितान्तोपयोगिनः | अत्यन्तम् उपकारिणः |
| तुरीयांशम् | चतुर्थांशम् |
| विवादमानः | विवादं कुर्वाणः |

| | |
|---|---|
| विपश्चिद्भिः | पण्डितैः |
| वेदवेदाङ्गनिष्णातः | वेदेषु वेदाङ्गेषु च पारङ्गतः |

## अभ्यासः

१. **एकावाक्येन प्रश्नाः समाधेयाः।**

(क) वेदभाष्यकारः स्कन्दस्वामी कुत्र जन्म लेभे ?

(ख) हरिस्वामिनः गुरुः कः आसीत् ?

(ग) महाराजबुक्केन सह कस्य वेदभाष्यकारस्य सम्बन्धः ?

(घ) ब्राह्मणसर्वस्वम् इति वेदभाष्यं कस्य ?

(ङ) महीधरकृतस्य भाष्यस्य नाम किम् ?

२. **पूर्णवाक्येन उत्तरत।**

(क) ऋक्संहितायामेव सम्पूर्णं भाष्यं कः अकरोत् ?

(ख) ऋक्सर्वानुक्रमणीभाष्यं केन रचितम् ?

(ग) सामवेदसंहितायाः प्रथमं भाष्यं कः अकरोत्?

(घ) भाष्यकारः सायणः कति संहितासु भाष्यं व्यरचयत् ?

(ङ) स्वामिदयानन्दकृतानां भाष्याणां नामानि लिखत ?

३. **रिक्तस्थानानि पूरयत -**

(क) स्कन्दस्वामी ......................... गुरुरासीत्।

(ख) त्रयी व्याख्यान..........................मुखात्।

(ग) स प्राह .................................... नियुज्यताम्॥

(घ) यदाब्दानां .............................. भाष्यमिदं कृतम्॥

(ङ) अत एव व्याकरणबलेन ........................ प्रभवति।

४. **अधोलिखिनां शब्दानां प्रकृतिप्रत्ययौ विभजत -**

प्रकृति प्रत्ययः

(क) अङ्गीकृत्य ............+...............।

(ख) उक्तम् ............+...............।

(ग) ज्ञानवान् ............+...............।

(घ) वास्तव्यः ............+...............।

(ङ) गतवान् ............+...............।

(च) सप्तदशशततमः ............+...............।

(छ) अनुशीलयितारः ............+...............।

५. सन्धिविच्छेदं कृत्वा सन्धिसूत्राणि लिखत।

| | सन्धिविच्छेदः | सन्धिसूत्राणि |
|---|---|---|
| (क) अन्वभवत् | ........+............ | ....................। |
| (ख) यथोचितज्ञानाभावे | ......+.........+........... | .............। |
| (ग) नैव | ............+............ | ..................। |
| (घ) उपादेयश्चास्ति | ............+............ | ..................। |
| (ङ) ऋग्वेदस्य | ............+............ | ..................। |
| (च) चतुस्संख्यकानाम् | ............+............ | ..................। |

६. समुचितं युङ्ग्धम्।

| | |
|---|---|
| (क) स्कन्दस्वामी | वेददीपः |
| (ख) सायणाचार्यः | माधवाचार्यः |
| (ग) हलायुधः | वेङ्कटमाधवः |
| (घ) वेङ्कटाचार्यः | वैष्णवसर्वस्वम् |
| (ङ) महीधरः | सौराष्ट्रस्य |
| (च) विवरणभाष्यम् | सप्तदशग्रन्थानां भाष्यम् |

७. अधोलिखितानि पदान्याश्रित्य कारकविभक्ती निर्णयत।

(क) <u>वेदभाष्यकारेषु</u> सायणाचार्यस्य स्थानं सर्वोपरि वर्तते।

(ख) <u>हलायुधस्य</u> भाष्यस्य नाम ब्राह्मणसर्वस्वम् अस्ति।

(ग) माधवाचार्यस्य <u>भाष्यं</u> संक्षिप्तं वर्तते।

(घ) <u>विपश्चिद्भिः</u> चतुर्णां मधावनामनां वेदभाष्यकाराणामुल्लेखः क्रियते।

(ङ) वेदभाष्यकारः महीधरः काश्याम् <u>अध्ययनं</u> कृतवान्।

(च) माधवस्य समयः <u>त्रयोदशशततमात्</u> वर्षात् पूर्वमेव आसीत्।

८. प्रोयगपरिवर्तनं कुरुत।

(क) हलायुधः भाष्यस्य प्रारम्भे स्वकीयं परिचयम् अददात्।

(ख) मन्त्रमहोदधिः इत्याख्यः प्रसिद्धग्रन्थः महीधरेण विरचितः।

(ग) स्वामिदयानन्दः आधुनिकवेदभाष्यकारः वर्तते।

(घ) विपश्चिद्भिः हलायुधस्य कालः ११७०तमः वर्षः निश्चीयते।

९. भाष्यकाराणां कालक्रमानुसारेण नामानि विलिखत।

१०. भाष्यस्यकाराणां विषये स्वविचारान् संस्कृतभाषया प्रकटयत।

## योग्यताविस्तारः

वेदमेव सदाऽभ्यसेत् तपस्तप्यं द्विजोत्तमैः।
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥
योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥

*मनुस्मृतिः - २.१६६,१६८*

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षात् धर्मस्य लक्षणम्॥

*मनुस्मृतिः - २.१२*

आदित्याल्लब्धवान् यस्तु शाखाः पञ्चदशापराः.
तं याज्ञवल्क्यं वन्दे अहं मन्त्रभाष्यप्रसिद्धये।। उव्वटभाष्ये॥

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।
आक्षेपश्च समाधानं व्याख्यानं षड्विधं मतम्॥

स्मर्तारो द्रष्टारश्च ऋषय उच्यन्ते। सोऽयं हिरण्यगर्भपरम्परयाभिव्यक्तो नित्यो वेदः। उव्वटभाष्य

# पञ्चदशः पाठः

# पुराणानि

पुराणानि भारतीयसंस्कृतसाहित्यस्य प्राणभूतानि सन्ति। पुरातनः इतिहासः, भूगोलः, संस्कृतिः दर्शनं च पुराणेषु वर्णितम्। व्यासो हि वेदान् चतुर्धा विभज्य आत्मनः चत्वारः शिष्यानुपदिष्टवान्। पुराणानां धार्मिकदृष्ट्या महत्त्वमधिकं विद्यते। वेदविहितानां धर्माणां सरलसुबोधभाषया पुराणानि विरचितानि।

पुराणेषु मुख्यतः पञ्चतत्त्वानां समावेशः स्वीक्रियते। सर्गः सृष्टिः, पुष्टिः, प्रतिसर्गः सृष्टेर्लयः पुनश्च सृष्टिर्वंशः सृष्ट्यारम्भे वंशावली मन्वन्तराणि के के मानवाः कदा अजायन्त इति वर्णनं वंशानुचरितं सूर्यचन्द्रवंशयोर्विशिष्टवर्णनम् इदं वस्तुपञ्चकं पुराणेषु अपेक्ष्यते।

पुराणानां भौगोलिकमपि महत्त्वं वर्तते। येषु अष्टादशानां (१८) द्वीपानाम्, चतुर्दशानां (१४) भुवनानाम्, क्षीरसागरदीनां वर्णनम्, भूविभाजनम्, तीर्थानाम्, सागराणाम्, सरिताम्, गिरीणाम्, भौगोलिकमहत्त्वभाजाम् अन्येषां च स्थानानां यत्र तत्र वर्णनं भूगोलखगोलविदां कृते विशिष्टं महत्त्वमाधत्ते। पुराणानां सामाजिकमपि महत्त्वम् अवर्णनीयम्। वर्णाश्रमव्यवस्थाविवरणम्, विविधसंस्काराणां विवरणम्, पारिवारिकसम्बन्धस्य विवेचनम्, गुरुशिष्यसम्बन्धस्य वर्णनम्, राजधर्मादिवर्णनं च पुराणेषु उपस्थापितं वर्तते।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥

इत्यनेन वेदार्थबृंहणे माहात्म्यं स्वयमेव सिद्ध्यति। अथर्ववेदानुसारं वेदैः सह पुराणानि समुद्भूतानि। "ऋचः सामानि छन्दांसि पुराणं यजुषा सह उच्छिष्टाज्जज्ञिरे सर्वे" प्राचीनभारतीयजनजीवनं संस्कृतिः, सभ्यता, ज्ञानम्, विज्ञानम्, धर्मः, पुरुषार्थश्च इत्यादीनां यत्र सुष्ठु विवरणं प्राप्यते तत् साहित्यमेव 'पुराणम्' इत्युच्यते। एवं पुराणेषु विविधा विद्या यथास्थानं वर्ण्यते। पुराणेषु अग्निपुराणं विविधशास्त्रीयज्ञानसमन्वितत्वाद् विश्वकोशः इति स्वीक्रियते। अतिशयोक्तिशैली पुराणेषु दृश्यते। पुराणानां महत्त्वं सर्वथा प्रसिद्धम्। पुराणलक्षणप्रसङ्गे विष्णुपुराणे पुराणस्य पञ्चलक्षणानि निगदितानि। तानि यथा -

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**

**वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥**

*(विष्णुपुराणे )*

श्रीमद्भागवतानुसारं पुराणानां दशलक्षणानि विद्यन्ते। महापुराणेषु दश लक्षणानि लघुषु च पुराणेषु केवलं पञ्चलक्षणानि भवन्ति। श्रीमद्भागवत महापुराणे उक्तम् -

**दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।**

**केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया॥**

*(भा.पु. १२/७/२०)*

कतिपयेषु पुराणेषु पुराणानां व्युत्पत्तिरपि लभ्यते तद्यथा -

**वायुपुराणे** - पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्। अर्थात् प्राचीनपरम्परायां यत् वर्णनमुपलभ्यते तत् पुराणम्।

**पद्मपुराणे** -'पुरार्थेषु आनयतीति पुराणम्' अर्थात् प्राचीनार्थानां प्रतिपादकं काव्यं पुराणम्।

**ब्रह्माण्डपुराणे** - पुरा एतदभूदिति पुराणम्' अर्थात् प्राचीनानां घटनानां पुराणम्।

**मत्स्यपुराणे** - पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः।

**महाभारते** –'पुराणमाख्यं पुराणम्' अर्थात् प्राचीनाख्यानमेव पुराणम्।

केचन विद्वांसः अपि पुराणव्युत्पत्तिं परिभाषां वा उपस्थापयन्ति। एताः पुराणव्युत्पत्तयः परिभाषा वा इह प्रदीयन्ते।

**सायणः** - पुरातनवृत्ता- पुराणं तत्कथनरूपमाख्यानम्।

**यास्कः** - पुरा नवं भवति। अर्थात् प्राचीनत्वेऽपि नवीनत्वं पुराणत्वम्।

**पाणिनिः** - पुरा भवमिति पुराणम्। अर्थात् यत् पूर्वमभूत् तत् पुराणम्।

**मधुसूदनसरस्वती** -विश्वसृष्टेरितिहासः पुराणम्।

**राजशेखरः** - वेदाख्यानोपनिबन्धप्रायं पुराणम्।

पुराणानि अष्टादश सन्ति। उप पुराणान्यपि अष्टादश सन्ति। अनन्तरमष्टादश उपोपपुराणान्यपि सन्ति। अतः एतेषां सङ्ख्या चतुःपञ्चाशद् वर्तते। पुराणेषु भूताः वर्तमानाः भविष्यश्चार्था वर्ण्यन्ते। अष्टादशानां पुराणानां प्रदर्श्यतेऽत्र श्लोकानुसारेण

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।**
**अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते॥**

**मद्वयम्** - मत्स्यपुराणम् (१४,०००) मार्कण्डेयपुराणम् (९,०००) **भद्वयम्** - भविष्यपुराणम् (१४,५००) भागवतपुराणम् (१८,०००) **ब्रत्रयम्** - ब्रह्माण्डपुराणम् (१२,०००), ब्रह्मपुराणम् (१०,०००) ब्रह्मवैवर्तपुराणम् (१८,०००) **वचतुष्टयम्** - वामनपुराणम् (१०,०००), वराहपुराणम् (८१,०००), विष्णुपुराणम् (२३,०००), वायुपुराणम् (२४०००)**अनापलिङ्गकूस्कन्दानि** - अग्निपुराणम् (१६,०००), नारदपुराणम् (२५,०००), पद्मपुराणम् (५५,०००), लिङ्गपुराणम् (११,०००), गरुडपुराणम् (१९,०००), कूर्मपुराणम् (१७,०००), स्कन्दपुराणम् (८१,१००)।

श्लोकमाध्यमेन श्रीमद्भागवतमहापुराणे पुराणानां श्लोकसंख्या-
ब्राह्मं दश सहस्राणि पाद्मं पञ्चोनषष्टि च।
श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैवकम्॥
दशाष्टौ श्रीभागवतं नारदं पञ्चविंशतिः।
मार्कण्डं नव वाह्नं च दशपञ्च चतुःशतम्॥
चतुर्दश भविष्यं स्यात्तथा पञ्चशतानि च।
दशाष्टौ ब्रह्मवैवर्तं लैङ्गमेकादशैव तु॥
चतुर्विंशति वाराहमेकाशीतिसहस्रकम्।
स्कान्दं शतं तथा चैकं वामनं दश कीर्तितम्॥
कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश।
एकोनविंशत्सौपर्णं ब्रह्माण्डं द्वादशैव तु॥
एवं पुराणसन्दोहश्चतुर्लक्ष उदाहृतः।
तत्राष्टदशसाहस्रं श्रीभागवतमिष्टते॥

*श्रीमद्भागवतम् - १२,१३,४-९*

**श्रीमद्भागवतमहापुराणे वेदसम्मतः आचार्याभिर्होत्रोक्तः कर्मयोगः ।**
**कर्माकर्मविकर्मेति वेदवादो न लौकिकः।**
**वेदस्य चेश्वरात्मत्वात् तत्र मुह्यन्ति सूरयः॥ ११.३.४३॥**

**अन्वयः** - श्री-आविर्होत्रः उवाच - कर्म अकर्म विकर्म इति वेदवादः न लौकिकः, वेदस्य च ईश्वर-आत्मत्वात् सूरयः तत्र मुह्यन्ति।

**परोक्षवादो वेदोऽयं बालानामनुशासनम्।**
**कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा॥ ११.३.४४॥**

**अन्वयः** - अगदं यथा बालानाम् अनुशासनं विधत्ते (तथा) परोक्षवादः अयं वेदः कर्ममोक्षाय हि कर्माणि विधत्ते।

**नाचरेद् यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः।**
**विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः॥ ११.३.४५**

**अन्वयः** - यः स्वयम् अज्ञः अजितेन्द्रियः वेदोक्तं न आचरेत् सः विकर्मणा धर्मेण हि मृत्योः मृत्युम् उपैति।

**वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे।**
**नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः॥ ११.३.४६**

**अन्वयः** - निःसङ्गः ईश्वरे अर्पितं वेदोक्तम् एव कुर्वाणः रोचनार्था फलश्रुतिः नैष्कर्म्यां सिद्धिं लभते।

**य आशु हृदयग्रन्थिं निर्जिहीर्षुः परात्मनः।**
**विधिनोपचरेद् देवं तन्त्रोक्तेन च केशवम्॥ ११.३.४७॥**

**अन्वयः** - यः निर्जिहीर्षुः परात्मनः हृदयग्रन्थिं तन्त्रोक्तेन विधिना च (वेदोक्तमतिरिच्य) देवं केशवम् आशु उपचरेत्।

## शब्दार्थाः

| | |
|---|---|
| चतुर्धा | चतुर्विधम् |
| विहितानाम् | कृतानाम् |
| समावेशः | सङ्गोष्ठी |
| सृष्ट्यारम्भे | सृष्टेः आरम्भे |
| अपेक्ष्यते | प्रयोजनम् अस्ति |
| प्रदश्यते | प्रदर्शनं भवति |
| आधत्ते | आदधाति |

| | |
|---|---|
| अवर्णनीयम् | अतुलनीयम् |
| जज्ञिरे | अजायन्त |
| सर्गः | सृष्टिः |
| प्रतिसर्गः | लयः |
| वंशः | देवानाम् ऋषीणाञ्च कुलपरम्पराणां वर्णनम् |
| उपलभ्यते | प्राप्यते |
| समुपबृंहयेत् | वर्धयेत् |
| स्वीक्रियते | अङ्गीक्रियते |
| दृश्यते | दर्शनं भवति |
| परोक्षवादः | वेदः |
| अगदम् | औषधम् |
| विकर्मणा | शास्त्रविरुद्धकर्मणा |
| नैष्कर्म्याम् | भौतिककर्मणि |
| रोचनार्था | प्रोत्साहनार्था |
| निर्जिहीर्षुः | निहर्तुम् इच्छुकः / कर्तयितुमिच्छुकः |
| सन्दोहः | योगः |

## अभ्यासः

१. **अधोलिखितप्रश्नान् संस्कृतभाषया उत्तरत -**

(क) किं नाम पुराणम् ?

(ख) पुराणेषु कति तत्त्वानां समावेशः स्वीक्रियते ?

(ग) कति पुराणानि वर्तन्ते ?

(घ) श्रीमद्भागवतानुसारं पुराणानां कति लक्षणानि समुपलभ्यन्ते ?

(ङ) 'विश्वकोशः' इति रूपेण कस्य पुराणस्य स्वीकृतिः वर्तते ?

२. **सर्वे प्रश्नाः समाधेयाः -**

(क) भारतीयसंस्कृतसाहित्यस्य कानि प्राणभूतानि सन्ति ?

(ख) कति उपपुराणानि विद्यन्ते ?

(ग) विविधविद्या कुत्र यथास्थानं वर्ण्यते ?

(घ) इतिहासपुराणाभ्यां कं समुपबृंहयेत् ?

(ङ) "पुरा नवं भवति" इति मतं कस्याचार्यस्य ?

## ३. रिक्तस्थानानि पूरयत -

(क) ........................................ प्राणभूतानि सन्ति।

(ख) पुराणेषु .................................. वर्ण्यते।

(ग) पुराणानां ........................................ अपि महत्त्वम् अवर्णनीयम्।

(घ) पुराणेषु विविधा .................................. वर्ण्यते।

(ङ) पुराणानां महत्त्वं ................................................।

(च) पुराणेषु मुख्यतः .............................................. स्वीक्रियते।

(छ) सर्गश्च ............................................... पुराणं पञ्चलक्षणम्॥

## ४. सन्धिविच्छेदं कृत्वा सन्धिनाम लिखित -

| | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| (क) उच्छिष्टाज्जज्ञिरे | .............. + .............. | .............. .............. |
| (ख) सृष्ट्यारम्भे | .............. + .............. | .............. .............. |
| (ग) प्राचीणत्वेऽपि | .............. + .............. | .............. .............. |
| (घ) ऋषीणाञ्च | .............. + .............. | .............. .............. |
| (ङ) अथर्ववेदानुसारम् | .............. + .............. | .............. .............. |
| (च) चैव | .............. + .............. | .............. .............. |
| (छ) सर्गश्च | .............. + .............. | .............. .............. |

## ५. अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासं निर्दिशत -

| | विग्रहः | समासनाम |
|---|---|---|
| (क) इतिहासपुराणे | ...................... | ................................ |
| (ख) पञ्चलक्षणम् | ...................... | ................................ |
| (ग) सृष्ट्यारम्भः | ...................... | ................................ |
| (घ) अष्टादश | ...................... | ................................ |
| (ङ) विज्ञानम् | ...................... | ................................ |

## ६. कर्मणि वाक्यानि परिवर्तयत -

| | | |
|---|---|---|
| कृपया | पुस्तकं<br>पत्रं<br>मालां<br>फलं<br>चित्रं<br>पत्रिका<br>स्यूतः | खादतु<br>पश्यतु<br>आनयतु<br>ददातु<br>पठतु |

## ७. समुचितं संयोजयत -

| | |
|---|---|
| (क) इतिहासपुराणाभ्यां | पुराणं पुरातनवृत्तान्तकथनरूपमाख्यानम् |
| (ख) पाणिनिः | महर्षीणां राजर्षीणाञ्च चरित्रवर्णनम् |
| (ग) सायणः | सृष्टिः |
| (घ) सर्गः | वेदं समुपबृंहयेत् |
| (ङ) वंशानुचरितम् | पुराभवमिति पुराणम् |

## ८. सत्यकथनानां समक्षम् "आम्" असत्यकथनानां समक्षं "न" इति लिखत -

| | |
|---|---|
| (क) पुराणमाख्यं पुराणम् | |
| (ख) पञ्चदश पुराणानि सन्ति | |
| (ग) उपपुराणान्यपि अष्टादश सन्ति | |
| (घ) चतुर्दश भुवनानि सन्ति | |
| (ङ) पुराणानां महत्त्वं सर्वथा न प्रसिद्धम् | |

## ९. विभक्त्यनुसारं वाक्यानि लिखत -




## योग्यता-विस्तारः

प्रस्तुतपद्यभागः ब्रह्माण्डवराह-मार्कण्डेय-पद्म-नारदीय-विष्णुधर्मोत्तर-ब्रह्मपुराणेभ्यः सङ्गृहीतः।

**नमस्ते वासुदेवाय नमः सङ्कर्षणाय च।**
**प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः॥**
**नारायणाय ऋषये पुरुषाय महात्मने।**
**विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः॥**

*श्रीमद्भागवतम् - १२.५.२९-३०*

**विश्वस्य मातरस्सर्वाः सर्वाश्चैव महाफलाः।**
**तथा नद्यः स्वप्रकाशा शतशोऽथ सहस्रशः॥ १॥**

*(पद्मपुराणम्)*

**आफलक्षयणं विप्रो भुज्यतेऽन्यत्र जन्तुभिः।**
**अद्यापि देवा इच्छन्ति जन्म भारतभूतले॥ २॥**

*(नारदीयपुराणम्)*

महेन्द्रो मलयः सह्यः शक्तिमानृक्षपर्वतः।
विन्ध्यश्च पारियात्रश्च इत्येते कुलपर्वताः॥३॥

*(वराहपुराणम्)*

कापिले गोग्रहे सोमे तीर्थे चालाबु संज्ञिते।
मृत्युञ्जये क्रोडतीर्थे वासुके सिद्धकेश्वरे॥४॥

*(ब्रह्मपुराणम्)*

गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथापरा।
यमुनाश्च शातद्रुश्च वितस्तेरावती कुहुः॥५॥
अयं तु नवमस्तेषां दीपस्सागरसंवृतः।
योजनानां सहस्त्रं तु द्वीपोऽयं दक्षिणोत्तरात्॥६॥

*(ब्रह्माण्डपुराणम्)*

आयुः प्रमाणं लभते हि राजन् द्वीपेषु सर्वेषु नरोमयोक्तम्।
कृत्वा शुभं कर्म तु भारतेऽस्मिन् द्वीपेषु सर्वेषु नराः प्रयान्ति॥७॥

*(विष्णुधर्मोत्तरपुराणम्)*

स्वर्गापवर्गास्पदमार्गभूते धन्यास्तु ते भारतभूमिभागे।
गायन्ति देवाः किल गीतकानि भवन्ति भूयः पुरुषाः सुरत्वात्॥

*(शिवपुराणम् ५/१८/१९)*

कुररि विलपसि त्वं वीतनिद्रा न शेषे
स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः।
वयमिव सखि किञ्चिद् गाढनिर्भिन्नचेता
नलिननयनहासोदारलीलेक्षितेन॥

*(भागवतपुराणम् - २०/९०/१५)*

धन्याः खलु ते मनुष्याः ये भारते नेन्द्रियविप्रहीनाः।

*(भागवतपुराणम् - २/३/२६)*

# महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

## माध्यमेन सञ्चालिता प्रस्ताविता च राष्ट्रीयादर्शवेदविद्यालयः




# महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)


वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in